# A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

## 1922-23 TO 1924-25

FOR THE

## GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

Mahāmahōpādhyāya Vidyāvācaspati
Professor S. KUPPUSWAMI SASTRI, M.A., I.E.S.
CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS

*Prepared under the orders of the Government of Madras*

***Volume V—Part 1—Sanskrit A***

MADRAS
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS

1931

# TABLE OF TRANSLITERATION.

| — | Consonants. | Semi-vowels, sibilants and aspirate. | Vowels | Diphthongs. |
|---|---|---|---|---|
| Gutturals | k, kh, g, gh, ṅ | h, ḥ | a, ā | ē, ai |
| Palatals | c, ch, j, jh, ñ | y, ś | i, ī | |
| Linguals | ṭ, th, ḍ, dh, ṇ | r, s | ṛ, ṝ | |
| Dentals | t, th, d, dh, n | l, s | ḷ | |
| Labials | p, ph, b, bh, m | v | u, ū | ō, au. |

# ADDENDA AND CORRIGENDA.

| Page | Line | *For* | | *Read* |
|---|---|---|---|---|
| 6134 | 4 | धनाड्य | ... | धनाढ्य |
| 6138 | 29 | शुनःशफस्य | ... | शुनःशेफस्य |
| 6185 | 25 | Almost complete | .. | Breaks off in the 2nd Adhyāya. |
| 6224 | 26 | Kavīndracandra | . | Kavicandra |
| 6248 | 19 | Maṅgavaram | . | Nangavaram |
| ,, | 29 | Do | | Do. |
| 6249 | 6 | Do. | | Do |
| ,, | 18 | Do | | Do |
| 6258 | 34 | And | | And |
| 6275 | 24 | दक्षिणामर्त्यष्टकम. | .. | दक्षिणामूर्त्यष्टकम्. |
| 6280 | 20 | तकग्रन्थः | . | तर्कग्रन्थः |
| 6288 | 7 | Wita commentary | .. | With commentary |
| 6296 | 13 | Ratnāvalī | ... | Ratnālavāla |
| 6333 | 24 | Transcribed in 1923–24 from | | Prepared in the office on comparing the Library copy with |
| 6405 | 19 | R. No. 4961 | ... | R No 4361 |
| 6432 | 11 | Śakti | ... | Śiva |
| 6459 | 10 | Ajātaśatru | ... | Ajātaśatru |
| 6465 | 13 | (*a*) खादिरगृह्यसूत्रम् | ... | खादिरगृह्यसूत्रभाष्यम् |
| ,, | 14 | Khādiragṛhyasūtram | ... | Khādiragṛhyasūtrabhas-yam. |
| 6467 | 3 | *Add* after "Vol IX" | ... | The commentary is by Nārāyaṇatīrtha |
| 6483 | 1 | वराहमिहिरसंहिता | ... | बृहत्संहिता |
| ,, | 2 | Varāhamihirasaṁhitā | ... | Bṛhatsaṁhitā |
| 6534 | 12 | Contains III Adhyāya | | Begins in the I Adhyāya and breaks off in the same Adhyāya. Then begins in the course of III Adhyāya and ends with IV Adhyāya. This MS. supplies the portion wanting in the MS. described under R. No. 3604 ante. |

| Page | Line | For | Read |
|---|---|---|---|
| 6566 | 3 | *Add* after "complete" .. | in continuation of the work described R. No. 4193. |
| 6653 | 16 | इत्याश्वमेधिक .. | इत्याश्वमेधिके |
| 6662 | 9 | Tarkasaṅgrahavākhyārthaniruktiḥ. | Tarkasaṅgrahavākyārthaniruktiḥ. |
| 6672 | 26 | प्रयागविषयः | प्रयोगविषयः |
| 6714 | 1 | अष्टाध्याया .. | अष्टाध्यायी |
| 6731 | 6 | मणिमञ्जरी ... | मणिमञ्जीरा |
| 6746 | 28 | हारम् ... | हरिम् |
| 6756 | 15 | Bhustutiḥ .. | Bhūstutiḥ |
| 6761 | 28 | | *Add* Complete. |
| 6764 | 35 | Campurāmāyanam .. | Campūrāmāyaṇam |
| 6790 | 31 | ... | *Add* Same work as that described under No. 2139 of the D.C.S. MSS., Vol. IV, Part I. Complete. |
| 6823 | 11 | तिद्धान्तकौमुदीव्याख्या . | सिद्धान्तकौमुदीव्याख्या |
| 6832 | 1 | तिद्धान्तकौमुदी . | सिद्धान्तकौमुदी |
| 6850 | 11 | Mahabhāratam ... | Mahābhāratam |
| 6865 | 10 | .. | *Add* Complete |
| 6875 | 31 | उभयुक्तं .. | उपयुक्तं |
| 6879 | 32 | . | *Add* Complete |
| 6882 | 16 | Peddādīksita ... | Pettādīkṣita |
| 6896 | 19 | पहाभारतम् .. | महाभारतम् |

# INTRODUCTION.

The first part of the fifth volume of the Triennial Catalogue of manuscripts is prepared on the same plan as that of the first four volumes and as described in the introduction thereto. It similarly consists of three books, each dealing mostly with a year's collection. The number of the manuscripts and the pages of this part of the volume are in continuation of the fourth volume. Attention is drawn below to a few of the important works described in this part of the catalogue.

1. *Śrīcihnakāvyam*, *R. No.* 4156.—This is otherwise known as Gōvindābhiṣēka, vide R. No. 5156, Vol. VI, as it narrates the story leading on to the installation of Śri Kṛṣṇa as Gōvinda. The work under description consists of illustrations to the Sūtras contained in Vararuci's Prākṛtaprakāśa. Mr. E. B. Cowell has edited Prākrtaprakāśa with the commentary of Bhāmaha. The readings of the Sūtras as found in this manuscript differ to some extent from those in Cowell's edition. The commentator on Śrīcihnakāvya is Durgāprasādayati, a disciple of Kṛṣṇalīlāśuka. He says that Padmapāda, the teacher of Līlāśuka, lived at Kōdaṇḍamangalam. Durgāprasāda himself was a descendant of the youngest brother of Līlāśuka.

2. *Kṛṣṇalīlāmṛtam*, *R. No.* 4164.—The author of this drama, Kēsava, belongs to Atri gōtra and seems to have been a native of Bengal. The drama, it is stated in the prologue, was enacted in a place called Rāmasthalī on the occasion of a festival of Śri Kṛṣṇa. There are several poets called Kēśava and the identification of the present writer with any of them is not possible with the available information. The author does not speak anywhere in the work about his date and parentage or about any of his other works. From a sentence in the prologue it is inferred that he might have written some other works.

3. *Bōdhāyanakalpasūtravivaraṇam*, *R. No.* 4166.—This is a rare commentary by Dāmōdarasvāmin on the Bōdhāyana Kalpasūtras dealing with sacrificial rites. A certain writer, Dāmōdara by name, is known to have commented on several Vedic works, but no internal evidence is available to identify the present writer with this Dāmōdara. He contradicts in

some places the opinions of previous commentators, and this leads one to believe that there might have been similar commentaries on the same work which are not traceable now. He divides the work into three chapters, each containing several Adhyāyas, on the basis of subject-matter. The first deals with Darśapūrṇamāsa, the second with Paśuyāga and the last with Agniṣṭōma.

4. *Mīmāṁsānayavivēkadīpikā, R. No.* 4176.—This is a commentary by Varadarāja on Bhavanātha's Nayavivēka which is an exposition of some important Sūtras of Jaimini according to the Prābhākara school. The earliest manuscript of Nayavivēkadīpikā according to Mr. A. C. Burnell is dated 1650. Varadarāja was the son of Raṅganātha, grandson of Dēvarāja and great-grandson of Praṇatārtihara, belonging to the Kiḍāmbi family. Śrī Rāmānujācārya, 1017 A.D., had as his direct disciple one Praṇatārtihara known as Kiḍāmbi Āccān of Kiḍāmbi family. If these two could be said to be identical, the date of Varadarāja can be fixed somewhere in the twelfth century, leaving sufficient margin for the intervening period between Praṇatārtihara and Varadarāja.

A passage beginning with गङ्गापगातीरे' found in the manuscript described under R. No. 5301, which is the same as the one under notice, supports the inference that the ancestors of Varadarāja must have lived somewhere on the banks of the Ganges. But it would appear that गङ्गापगातीरे is a corruption of वेगापगातीरे ; and this conjecture is quite plausible in view of the fact that the names Varadarāja, Rānganātha, Dēvarāja, Praṇatārtihara, etc. are purely South-Indian and that Kāñcī, which is associated with the river Vēgavatī, is a place where numerous members of Kiḍāmbi family are found.

Varadarāja refers to several works on Mīmāṁsā ; two of them, namely Nibandha and Vivaraṇa may be mentioned in this connection. He says that these two were written by Prabhākara. Cf.: टीकाकारो हि प्रथमं विवरणटीकां कृत्वा पश्चा न्निबन्धनटीकां कृतवानिति किंवदन्ती । द्वितीयेनाध्यायेन द्वितीयेन निबन्धेन निबन्धनटीकया यन्निबध्यते तदेव भवेन निरवद्यं निगद्यत इति श्लोकार्थः। यद्यपि विवरणोक्तमपि अत्र वक्ष्यते । तथापि निबन्धनप्राधान्यार्थेयमुक्तिः । निबन्धनस्यापि शिष्यप्रशिष्यपरंपरया वर्तमानत्वात् निबध्यत इति वर्तमाननिर्देशः ।

Varadarāja's teacher was Sudarśanācārya. He is referred to by Varadarāja at the end of the second Adhyāya of the Dīpikā as a great Vēdāntin, cf.: यदुक्तिव्यीकारो निगमवचसां सोपनिषदाम् ।

There is a commentary on Śrībhāṣya written by one Sudarśanācārya. Varadarāja says that he was learned in Astrology, Medicine, Grammar, and Mīmāṁsā. Tārkikarakṣā, a work on Logic, is written by one Varadarāja; and its editor opines that its author is different from the author of Nayavivēkadīpikā. But towards the end of the Tārkikarakṣā, its author says that he was also a Mīmāṁsaka.

5. *Sarasvatīkaṇṭhābharaṇavyākhyā: Hṛdayahāriṇī, R. No.* 4179.—This is a commentary on Bhōjadēva's Sarasvatīkaṇṭhābharaṇa, a work on Grammar, which was described in the introduction to the previous volume. The commentator, Daṇḍanātha-Nārāyaṇabhaṭṭa, seems to be earlier than Mādhava of the fourteenth century, who mentions Daṇḍanātha in his Dhātuvṛtti. Bhōjadēva lived about the first quarter of the eleventh century. It is therefore evident that Daṇḍanātha lived somewhere between the eleventh and fourteenth centuries.

6. *Bhāmatītilakam, R. No.* 4190.—This is a commentary on Vācaspatimiśra's Bhāmatī. The manuscript in question is incomplete extending only to the end of the first Pāda of the third Adhyāya. The first 29 Sūtras in the first Pāda of the second Adhyāya are also wanting. This omission is however supplied by Brahmānanda, a disciple of Brahmaprajñapūjyapāda. The latter commentary called Bhāmatīnītitattva extends to the end of the second Pāda of the second Adhyāya. In this connection attention is invited to the following stanza found in the course of the commentary on II-2-19:—

नो लुप्ततिलका भाति भामती नूनमन्तरा ।
व्याख्याता नीतितत्त्वाख्या प्रसाधयति सख्यमूम् ॥

The author of the Bhāmatītilaka is Allālasūri. From the colophons found at the end of each Pāda, it is made out that he was the son of Trivikramācārya and Nāgamāmbā, and a resident of Kottikalāgrāma. He was a pupil of one Anantārya. In the beginning of the work, the author refers with reverence to Vyāsāśramamuni alias Amalānanda (author of Vēdānta Kalpataru).

7. *Ṣōḍaśādhyāyīṭippaṇī; Kēralīyā, R. No.* 4387.—This is a commentary on the twelve Adhyāyas of Jaimini's Pūrva-Mīmāṁsā and on the four Adhyāyas of Bādarāyaṇa's Uttara-Mīmāṁsā. The name of the commentator is unknown. There is another commentary evidently by a different writer, on Jaimini's Sūtras, also called Kēralīyā. The name Kēralīyā found in the colophons of the two works seems to have reference more to the land of their origin than to the work proper.

In the course of the commentary in question, the author refers to two different stories regarding the origin of the Mīmāṁsā system, and according to both Jaimini is a student of Bādarāyana. According to one story, Bādarāyaṇa seeing that the Vēdas were too voluminous and therefore impossible of being studied, divided them into four and wrote the eighteen Purāṇas and the Mahābhārata. He entrusted the task of writing the Pūrva-Mīmāṁsā Sūtras to his favourite disciple Jaimini: Cf. समस्तेषु स्वशिष्येषु विश्वासबहुमानाश्रयभूतमृषिवर्यं जैमिनिमाहूय 'वत्स जैमिने, त्वमिमां पूर्वमीमांसामन्तरेण शब्दं प्रवर्तमानां लोकानुग्रहार्थं सूत्ररूपेण शब्दैः संदृभ । अहमुत्तरमीमांसायामेवमेव सूत्राणि प्रणेष्यामि' इत्येवमनुशिष्य भगवान् ।

According to the other story, Mahēśvara is said to have taught Mīmāṁsā to Prajāpati, Prajāpati to Indra, Bṛhaspati and Manu. Manu taught to Vasiṣṭha, who in turn to Parāśara; and Parāśara taught the same to Kṛṣṇadvaipāyana (Bādarāyaṇa), from whom it came down to Jaimini. According to both these theories, Jaimini was held to be a pupil of Bādarāyaṇa.

8. *Sphōṭasiddhi, R. No.* 4376 (*a*).—This is one of the most important works in the collections of the present triennium. The author of this work is the famous Maṇḍanamiśra. The work deals with the doctrine of Sphōṭa. Maṇḍanamiśra herein re-affirms the doctrine of Sphōṭa as elucidated by Bhartṛhari, by refuting the views of the opponents of the Sphōtavāda of Grammarians, such as Kumārila Bhaṭṭa. Vide the stanza in the beginning:—

दुर्विदग्धैरवक्षिप्ते दर्शने पददर्शिनाम् ।
यथागमं यथाप्रज्ञं न्यायलेशो निदर्श्यते ॥

Gōpālikā, a commentary on the Sphōṭasiddhi, comments on this stanza thus: शिष्या हि भट्टपादाद्युक्तयुक्तिव्यामोहितान्तःकरणा वर्णानामेव वाचकत्वमभिमन्यमाना वैयाकरणसिद्धान्तमेवावजानते । कथयन्ति च

दुर्विदग्धा भूत्वा नैतत् वैयाकरणदर्शनं यत् वर्णातिरिक्तं पदमिति हारामिश्रादिभिरुक्तम् । नहि सूत्रवार्तिकयोः स्फोटो नामाङ्गीकृतः ।

9. *Sphōṭasiddhi*, *R. No.* 4376 (*c*).—This is another work on the same subject by Bharatamiśra. It is said herein that Audumbarāyaṇa was one of the earliest exponents of the Sphōṭavāda.

भगवदौदुम्बरायणादीनामपि मतं भगवदुपवर्षादिभिर्निमायापलपितमिति तत्समर्थनमपेक्षित ।

# ALPHABETICAL SYNOPSIS OF SUBJECT HEADINGS.

[Reference is given to the pages of the subject index.]

# SUBJECT INDEX

OF THE

# WORKS DESCRIBED IN THE SANSKRIT PART OF THE TRIENNIAL CATALOGUE OF MANUSCRIPTS.

## VOL. V.

[*Note.*—The letters in column 2 are used with the following significance :—

C C = no copy of the work is noticed in the Catalogus Catalogorum ;

D C = the work has not appeared in any Descriptive Catalogues ;

C T = there are not more than 3 copies in the Catalogus Catalogorum ;

L = there were no copies in the Library.

P = the manuscript contains a portion which was not available in the Library ;

T = there were not more than 3 copies in the Library ]

### *Saṁhitā and Brāhmana.*

#### *The Ṛgvēda*



#### *The Black Yajurvēda*



#### *The Sāma Vēda.*



#### *Vedic Literature—Sūktas and Mantras*

*Lexicography.*



*Prosody.*



*Itihāsa.*

*Purāṇa.*

*Upapurāṇa and Sthalamāhātmya.*

| | | R NUMBER |
|---|---|---|
| **Badarīvanamāhātmya** ... ... ... ... ... ... | | **4533 (a)** |
| **Avadhūtagītā** with commentary ... ... .. ... | | **4249** |
| **Dhanurmāsamāhātmya** ... ... ... ... ... | D.C L | **4246 (b)** |
| **Harikēśvarapurīmāhātmya** ... ... ... ... ... | | **4454** |
| **Hariścandrōpākhyāna** ... ... ... ... .. | | **4298** |
| **Haśtigirimāhātmya** ... ... ... ... ... .. | | **5522** |
| **Hēmasabhānāthamāhātmya** ... ... ... ... ... | | **4263 (b)** |
| **Kaiśikamāhātmya** with Tamil meaning . ... ... | | **4679 (e)** |
| **Kamalācalamāhātmya** ... ... ... ... ... .. | D C L | 4866 |
| **Kārtikamāhātmya** ... ... ... ... ... ... | | 4246 (a) 4590 (b) |
| Mahāyōgimāhātmya .. ... ... .. ... ... | | 4556 |
| **Sētumāhātmya** .. ... .. ... ... ... ... | | 4939 |
| **Śivagītā** ... ... .. ... ... ... ... | | 4259 (b) |
| **Śrīraṅgamāhātmya** ... ... ... ... . . ... | | 5012 |
| **Tulākāvērīmāhātmya** ... ... ... ... ... ... | | 4401, 4590 (a) |
| **Vēṅkaṭagirimāhātmya** . ... ... ... ... | | 4648 |
| **Vēṅkaṭēśamāhātmya** .. ... ... ... ... ... | | 4774 (b) |
| **Vīkṣāraṇyamāhātmya** ... ... ... . . ... | | 4527, 4951 |
| **Vyāghrapuramāhātmya** ... ... ... ... ... | | 4263 (a) |

*Dharmaśāstra (Original Smṛtis).*

| | | R NUMBER |
|---|---|---|
| **Āṅgirasasmṛti** .. . ... ... ... ... ... | | 4722 (c) |
| **Ātrēyadharmaśāstra** ... ... ... ... ... ... | | 4722 (e) |
| **Bārhaspatyasmṛti** ... ... ... ... ... ... | | 4722 (b), 4755 (f) |
| Bōdhāyanadharmapraśna ... ... ... ... ... | | 4641 |
| **Dakṣasmṛti** ... ... ... ... ... ... ... | | 4722 (g) |
| **Gautamadharmasūtra** ... ... ... ... ... ... | | 4966 (a) |
| Do Vṛtti : Mitākṣarā ... ... ... | | 4518, 4885 |
| **Hārītasmṛti** .. ... ... ... ... ... ... | | 4784 |
| **Likhitasmṛti** ... ... ... ... ... ... ... | | 4755 (d) |
| **Manusmṛti** ... ... ... ... ... ... ... | | 4294, 4723 |
| **Nāradadharmaśāstra** with commentary ... .. ... | D C.L. | 4325 |
| **Parāśarasmṛti** ... ... ... ... ... ... .. | | 4728, 4755 (a), 4775 (a) |
| **Saṁvartasmṛti** ... ... ... .. ... ... ... | | 4722 (i), 4755 (h) |
| **Śāṇḍilyasmṛti** ... .. ... .. ... .. ... | | 4748 (c), 4771, 4878, 4929 (c) |
| **Śātātapasmṛti** .. ... ... ... .. ... ... | | 4722 (h), 4755 (g) |
| **Vaiṣṇavadharmaśāstra** ... ... ... ... ... ... | | 4592 (b) |
| **Vāsiṣṭhasaṁhitā** ... ... ... ... ... ... | | 4173 (a), 5040 |
| **Vāsiṣṭhasmṛti** ... ... ... ... ... ... ... | | 4592 (a), 4755 (b) |
| **Vyāsasmṛti** ... ... ... ... ... ... ... | | 4722 (d) |
| **Yājñavalkyasmṛti** ... .. ... ... ... ... | | 4722 (j) |
| Do. with Ṛjumitākṣarā . ... | | **4912** |
| **Yamasmṛti** ... ... ... ... ... .. | | 4722 (f), 4755 (e) |

R. NUMBER

### *Systems of Indian Philosophy.*

#### *Nyāya.*



#### *Vaiśēṣika.*

### Advaita Philosophy.

*Viśiṣṭādvaita Philosophy.*

*Mahākāvya.*

*Laghukāvya*

R. NUMBER

*Drama.*



*Rhetoric and Poetics.*

R. NUMBER

*Astrology.*

| | R. NUMBER |
|---|---|
| Jyautisavişaya ... ... ... ... .. .. ... | 4291 (*c*), 4475 (*e*) |
| Kālādarśa ... ... ... ... ... ... ... | 4276 (*d*) |
| Kālanirṇaya ... ... .. .. ... ... ... | 4276 (*c*) |
| Kālaprakāśikā ... ... .. ... ... ... ... | 4594 |
| Kālavidhānapaddhati ... ... ... ... ... ... | 4840 (*a*) |
| Do. with commentary ... ... ... | 4469 |
| Muhūrtābharaṇa . ... ... ... ... ... | 4442 |
| Muhūrtadarśana ... ... ... ... ... ... | 4675 |
| Muhūrtapadavī ... ... ... .. ... ... | 4450 |
| Muhūrtaratna ... ... ... ... ... ... ... | 4465 (*a*) |

*Horoscopy.*

| | |
|---|---|
| Bhāvacintāvali ... ... ... ... .. ... ... | 4171 (*a*) |
| Bṛhajjātaka with commentary ... ... .. ... | 4499 |
| Daivajñabhūsaṇa ... ... ... ... ... ... | 4638 |
| Daivajñavilāsa .. ... ... ... ... . ... | 4705 |
| Daśāphala ... .. ... ... ... ... ... | 4297 (*b*) |
| Jātakābharaṇa ... .. ... ... ... .. ... | 4297 (*a*) |
| Jātakacandrikā with commentary ... ... ... ... | 4841 (*a*) |
| Jātakakarmapaddhati with commentary ... ... ... | 4546 (*a*) |
| Jyautisārṇava ... ... ... ... ... ... ... | 4173 (*b*) |
| Jyautisasaubhāgyadīpikā ... ... .. ... . | 4638 (*c*) |
| Jyōtiścandrōdaya . ... ... .. ... ... | 4416 |
| Mahāyātrā ... ... ... ... ... ... ... | 4203 (*b*) |
| Rājayōgalaksaṇavişaya ... ... ... ... ... | 4279 (*b*) |
| Śukranāḍī ... ... ... ... ... ... ... | 4180, 4374 |
| Ududaśāphala ... ... ... ... ... ... ... | 4857, 4867 |
| Uḍudaśāpradīpikā .. ... .. .. ... ... | 4638 (*b*) |
| Yallājīya... ... ... ... ... ... ... ... | 4910 |
| Yōgādhyāya ... ... ... ... ... ... ... | 4171 (*b*) |

***Prognostication and Divination.***

| | |
|---|---|
| Naralāñchana ... ... ... ... ... ... ... | 4215 (*a*) |
| Praśnaśāstra ... ... ... .. ... ... . | 4171 (*c*) |
| Praśnasaṅgraha .. ... ... ... ... ... ... | 4215 (*c*) |
| Sāmudrikalaşaṇa ... .. ... ... ... ... | 4838 (*c*) |
| Sāmudrasāra ... ... ... ... ... ... ... | 4203 (*a*) |

***Miscellaneous.***

| | |
|---|---|
| Adbhutasāgara ... ... ... ... ... ... ... | 4216 |
| Bhakticintāmaṇi ... ... ... ... ... ... | 4479 |
| Kṛṣṇāmṛtamahārṇava with commentary ... ... ... | 4165 |
| Kṛṣnarakṣōvijaya ... ... ... ... ... ... | 4437 |
| Raṇadīpikā .. ... ... ... ... ... . | 4215 (*b*) |
| Ratnadīpikā ... ... ... ... ... .. ... | 4494 (*a*) |
| Sālagrāmalakṣaṇa ... ... .. . ... ... | 4722 (*a*) |
| Ślōkāntādi ... ... ... ... ... ... .. | 4370 |
| Śukasaṁvādamañjarī ... ... ... ... ... ... | 4461 |

# AUTHOR INDEX

OF THE

# SANSKRIT PART OF THE TRIENNIAL CATALOGUE OF MANUSCRIPTS, VOLUME V.

R NUMBER

| | R. NUMBER |
|---|---|
| **Narasiṁhapaṇḍita—** | |
| Prasannarāghavavyākhyā : Phalavatī ... ... ... | 5085 |
| **Nārāyaṇa—** | |
| Prayōgataraṇi ... ... ... ... ... ... | 4161 |
| **Nārāyaṇa, son of Umā and Nārāyaṇa of Śivapura—** | |
| Viṣanārāyanīya ... . ... ... ... ... | 4167 |
| **Nārāyaṇa—** | |
| Śripādasaptati ... ... ... .. ... | 4208 (*b*) |
| **Nārāyaṇa, son of Padmanābha—** | |
| Śaṅgītanārāyana ... ... ... ... ... .. | 4212 |
| **Nārāyaṇa, son of Brahmadatta—** | |
| Śubhadrāharaṇa ... ... . ... ... ... | 4303 |
| Śubhadrāharana (with Vivaranam) ... ... ... | 4323 |
| **Nārāyana, pupil of Kṛṣna—** | |
| Raghuvaṁśavyākhyā · Padārthadīpikā ... . ... | 4361 |
| **Nārāyaṇa—** | |
| Viṣnusaṁhitāvyākhyā—Hārinī .. ... ... . | 4424 |
| **Nārāyaṇa—** | |
| Dharmapravṛtti ... ... ... ... .. ... | 4550, 4934 |
| **Nārāyaṇa , a disciple of—** | |
| Kauṣītakaśrautakārikā ... ... ... ... ... | 4339 |
| **Nārāyaṇabhaṭṭa (Daṇḍanātha)—** | |
| Śarasvatikaṇṭhābharaṇavyākhyā : Hṛdayahārinī ... | 4179 |
| **Nārāyaṇamuni—** | |
| Bhagavadgitāvyākhyā : Gītārthasangraha ... ... | 4979 |
| **Nārāyaṇanātha, son of Viṣṇuvāsudēvanātha, pupil of Dēvarājagīri—** | |
| Śaubhāgyamañjarī ... .. ... ... ... | 4475 (*a*) |
| **Nārāyanapaṇḍita, son of Trivikramapaṇḍita—** | |
| Saṅgraharāmāyaṇa ... ... ... ... ... | 4356 |
| **Nārāyaṇasūri, son of Dēvarāja—** | |
| Kārikāratna ... ... ... ... ... ... | 4481 |
| **Nārāyaṇatīrtha, pupil of Śri Rāmānandatīrtha—** | |
| Kṛsṇalilātarangiṇī ... ... ... ... ... | 5028 |
| **Nīlakaṇṭha—** | |
| Mahābhāratavyākhyā ... ... ... ... . | 5013 to 5016, 5018, 5020 to 5024, 5026 |
| **Nilakaṇṭhabhaṭṭa (son of Rāmabhaṭṭa)—** | |
| Tarkasaṅgrahadīpikāvyākhyā : Nīlakaṇṭhaprakāśikā | 4247, 4603 (*c*), 4819 |
| **Nīlakaṇṭhabhaṭṭa, son of Śaṅkarabhaṭṭa—** | |
| Bhagavantabhāskara ... ... ... ... ... | 4698 (*b*) |
| **Nṛsimhadēva of Śrīvatsagōtra—** | |
| Bhēdadhikkāraṇyakkāra ... ... ... ... ... | 4311 |
| **Paramānandatīrtha (pupil of Bhāratitīrtha)—** | |
| Avadhūtagitāvyākhyā ... ... ... ... .. | 4249 |
| **Paramēśvara—** | |
| Laghubhāskarīya with commentary ... ... ... | 4206 |
| **Pāpayārādhya—** | |
| Kalyāṇacampū ... ... ... ... ... ... | 4490 |

# A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

1922-23 TO 1924-1925.

## VOLUME V.

### PART I—SANSKRIT—A.

---

R. No. **4156.**

Paper. 10¾ × 9¾ inches. Foll. 204. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. K C. Tirunārāyaṇa Raja of Kottakkal, Malabar district.

श्रीचिह्नकाव्यम्, सव्याख्यानम्.

ŚRĪCIHNAKĀVYAM WITH COMMENTARY

Foll 1*a*—203*b*. Fol. 204 is left blank.

A poem in Prākṛta narrating the story of Lord Kṛṣṇa from beginning to end The work is so called because the word Śrī occurs in the last stanza of each Sarga. The author of the text is the well-known Kṛṣṇalīlāśuka, who, according to the commentator, was a disciple of Padmapāda (Śrī Śaṅkara's disciple?). The work is followed by a commentary by Durgāprasādayati who salutes in the beginning his Guru Kṛṣṇalīlāśuka and Vararuci, the author of Prākṛtaprakāśa. It is stated that a Vaiṣṇava named Rāma helped the commentator.

Complete in 12 Sargas

**Beginning:**

शिखण्डिपिञ्छोज्ज्वलकेश ईशः सुखण्डितारातिगणो गुणाढ्यः ।
अखण्डसच्चित्सुखविग्रहो वः स कुण्डलीन्द्रो हरिरस्तु भूत्यै ॥

संस्कृतप्रकृतेर्जाता भाषा प्राकृतसंज्ञिता ।
व्युत्पादिता येन वन्दे तं श्रीवररुचिं सदा ॥

श्रीकृष्णलीलाशुकनामधेयं नत्वा मुनिं तच्चरणाब्जभृङ्गः ।
श्रीचिह्नकाव्यस्य पदार्थमात्रं वक्तुं यते विस्तरभी(मी)हिताय ॥

श्रीपद्मपादमुनिवर्यविनेयवर्गश्रीभूषणं मुनिरसौ कविसार्वभौमः ।
श्रीकृष्णरूपपरमामृतपानशीलश्चक्रे तदीयचरितं बहुधा हिताय ॥

प्राकृतग्रथितमद्भुतं हि यत्तन्निबन्धनमबन्धनप्रदम् ।
तत्कनिष्ठकुलगोऽहमादरात् तत्र किंचिदभिवच्मि भक्तितः ॥
क्रोडमृद्विदितरामवैष्णवः काव्यदेवगुरुविप्रभक्तिमान् ।
अस्ति हन्त सहकारितां गतः स्वस्तये जगत उद्यतस्य मे ॥
भक्तिविलासो भूयाद्भगवति परमेश्वरे महाविष्णौ ।
प्राकृतरूपे नियतः परमात्मनि संस्कृते पथि प्रसरेत् ॥

तस्यास्य काव्यस्यायमाद्यः श्लोकः —
सामिद्धिं सअलजआणं सस्सङ्गाउं तेल्लोक्कप्पहवप्पहू ससङ्कवंसे ।
संजाओ विउलसमिद्धिपुण्णपुण्णे रूढं तं पउरकलंकमुद्धरन्तो ॥
(छा) समृद्धिं सकलजगतां शश्वत्कर्तुं त्रैलोक्यप्रभवप्रभुः शशाङ्कवंशे ।
सञ्जातो विपुलसमृद्धिपुण्यपूर्णे रूढं तं प्रचुरकलङ्कमुद्धरन् ॥

(व्या) आदौ समृद्धिपदप्रयोगेण मङ्गलाचरणमविघ्नेन परिसमाप्त्यादि-प्रयोजनार्थं कृतम्, अथवा भगवदवतारकथनात् परं किं मङ्गलाचरणम् । प्रभवपदमुपलक्षणं स्थितिसंहारयोरपि । त्रैलोक्यसर्जनादौ शक्तः, सृज्य विषयज्ञानप्रपूर्वत्वनियमात् सृष्टेस्सर्वज्ञस्सर्वशक्तिरिति यावत् । अत एव परं ब्रह्म श्रीनारायणः शास्त्रप्रसिद्धेः श्रीभागवतादिप्रसिद्धेश्च; शशाङ्कवंशे सोम-वंशे संजातः सम्यक् जातः श्रीविष्णुरूपेण स्वेच्छया जातः नान्यावतारवत् । वंशं विशिनष्टि—विपुलेति ।

* * * *

षडङ्गपद्यै रचितोऽत्र काव्ये श्रीचिह्नसंज्ञे विवृतोऽयमाद्यः ।
सदृष्टिकात्यायनसूत्रलक्ष्यो मुखे परिच्छेदवरे स सर्गः ॥

**Colophon:**

इति श्रीचिह्नकाव्ये प्रथमस्सर्गः परिसमाप्तो विवृतश्च ॥

**End:**

इदानीं कविः श्रीचिह्नकाव्यस्य शेषं नारदोक्तिप्रकारेण निबद्धमुपसंहरति इत्थमिति ।

* * * *

काव्यैर्हि सद्रसभरैरविचाररम्यैः स्त्रीजालसंग्रथितमत्र मनोवरैनम् ।
एतद्विमुच्य खलु भक्तिरसार्द्रकाव्यं कृष्णे प्रयोजयति साध्वमये स्वदेशे ॥
श्रीकृष्णबुद्धिपरिसंस्कृतचित्ररूपसुप्राकृतात्मकपदार्थसुवाक्यशाली ।
इष्टार्थकृद्विगतमत्सरसज्जनानां संवर्धतां मनसि भक्तिविलास एषः ॥

युक्तिस्थलालयशिवापदभक्तिलेशा(त्) दुर्गाप्रसादयंतिरित्यभिधां दधानः ।
कर्ताऽस्य यत्सुकृतम(ा)त्रफलान(न्य)भीप्सुः कृष्णेऽर्पयाम्यथ विशुद्धिकरा महान्तः॥

**Colophon** :

द्वादशस्सर्गस्समाप्तः ॥

पल्यङ्कितः पूर्वपकारशोभिद्विरूपतोपेतटवर्ण एषः ।
प्रवक्ति ए(ये)षां खलु नामधेयमागस्त्यकग्राममुवं गतानाम् ॥
ग्रहेषु यो दक्षिणभागसंज्ञे तेषूपजातात्मकलेवरोऽथ ।
मोक्षाश्रमी तेन परं निबद्धा व्याख्या मुदा शोधकसद्बलेन ॥
कोकारटमकारश्च णत्वद्वित्वोभ(प)शोभितः ।
क्रमाद्भवति यं(यो) रामसहकारि(री) स वैष्णवः ॥

---

## R. No. 4157.

Paper. 10¾ × 9¾ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS of M.R Ry. Nārāyaṇan alias Kṛṣṇa Nambūdiri Vaidikan, Thekkettu-mana, Kumaranallur, Malabar.

आश्वलायनगृह्यसूत्रव्याख्या.

ĀŚVALĀYANAGṚHYASŪTRAVYĀKHYĀ.

Foll. 1*a*—54*a*. Fol 54*b* is left blank.

Similar to the work described under R. No. 1088(*a*) ante By Cakrapāṇi.

Breaks off in the second Adhyāya.

**Beginning:**

आश्वलायनगृह्योक्तपाकयज्ञेषु कर्मसु ।
मन्त्राणां विनियुक्तानां व्याख्यानं क्रियतेऽधुना ॥
अत्युक्तानि दुरुक्तानि यान्यनुक्तानि च स्फुटम् ।
समादधतु विद्वांसस्तानि सर्वाणि बुद्धिभिः ॥

तत्र प्रथमं मन्त्रविनियोगो वक्तव्यः, तत आर्षकथनम्, ततः छन्दोनिर्देशः, ततो देवताभिधानम् । विनियोगादिचतुष्टयाज्ञानदोषः स्मर्यते श्रूयते च । तत्र स्मृतिः—

मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतविन्न यः ।
याजनाध्यापनादेति छन्दसां यातयामताम् ॥

स्थाणामृ(णुं वा ऋ)च्छति वा गर्तं वा पात्यते प्रमीयते वा पापीयान् भवतीत्यर्थः । एवं ब्राह्मणमाह—तमिति ।

* * * *

तत्र गृह्यकार आह—नमस्तस्मा इति । नमस्तस्मै तदेव भवति तस्यैवं पश्यतः समिदाधानान्येवयज्ञो भवतीत्यर्थः । तत आहुती(त्या) वेदेनेति चोभयत्र द्वितीयार्थे तृतीया । अन्यामप्याहुतिमग्नौ जुह्वद्यो मन्येत स्वध्वरोऽहमिति शेषः ।

* * * *

आश्वलायनगृह्योक्तपाकयज्ञेषु कर्मसु ।
मन्त्रा ये (वि)नियुक्तास्ते व्याख्याताश्चक्रपाणिना ॥

**Colophon:**

इति गृह्यमन्त्रव्याख्यायां प्रथमोऽध्यायस्समाप्तः ॥

अथ द्वितीयोऽध्यायः प्रारभ्यते—

श्रावण्यां पौर्णमास्यां श्रवणाकर्म इति ।

प्रकृत्यास्तमिते स्थालीपाकं श्रपयित्वैककपालं च पुरोडाशम् ।

**End:**

अथवा नप्त्य इति क्रियाशब्दो द्वितीयाबहुवचनान्तो बडबानामे(व) विशेषणार्थः । न न पतन्ति पतत्ये(न्त्ये) , . स्ता. नप्त्यः सततगामिनीरित्यर्थः ।

ताभिः याति । कीदृशीभिः स्वयुक्तिभिः याः स्वयमेव रथे युज्यन्ते ताः स्वयुक्तयः ताभिः स्वयुक्तिभिः ।

---

R. No. **4158.**

Paper. 10¾ × 9¾ inches. Foll. 51. Lines, 20 in a page. **Grantha** and Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. Nārāyaṇan alias Kṛṣṇa Nambūdiri, Vidvān, Tekkattu-mana, Kumaranallur post, Malabar.

(*a*) सन्ध्यानिर्णयः.

SANDHYĀNIRṆAYAḤ.

Foll. 1*a*—5*b*. Fol. 6 is left blank.

Authoritative passages taken from various Smṛtis, on the determination of proper time for the performance of Sandhyāvandana.

Complete.

**Beginning :**

तत्र दक्षः—

अहोरात्रस्य यस्सन्धिस्सूर्यनक्षत्रवर्जितः ।
सा तु सन्ध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः ॥

पितामहः—

नक्षत्रज्योतिरारभ्य सूर्यस्योदयदर्शनात् ।
प्रातस्सन्ध्येति तां प्राहुः श्रुतयो मुनिसत्तमाः ॥

**End :**

तत्र श्रुतिलक्षणमग्निहोत्रमेव कर्तव्यम् । न स्मार्तं बहिरुपासनम् । तस्य कल्प्यमूलत्वात् । इतरत्र क्लृप्तमूलत्वादित्यर्थः ॥

**Colophon :**

इति सन्ध्यानिर्णयः ॥

(*b*) आशौचचिन्तामणिः, सव्याख्या.

ĀŚAUCACINTĀMAṆIḤ WITH COMMENTARY.

Foll. 7*a*—49*b*. Foll 50 and 51 are left blank.

A treatise on the pollution to be observed consequent on the births and deaths of near relations. The work is followed by a commentary.

Incomplete.

**Beginning :**

संपूर्णं सच्चिदानन्दं शुद्धसत्त्वैकविग्रहम् ।
उपासे दक्षिणामूर्तिं गणनाथं गिरिं गुरून् ॥
नमामि निलयक्रोडनिलयं नीललोहितम् ।
अम्बागिरीन्द्रनिलयामम्बिकामपि सादरम् ॥

धर्मप्रतिष्ठापनजागरूकां(कान्) मत्वा(त्वा)दिकांस्तानखिलान् प्रणम्य ।
आशौचचिन्तामणिसंज्ञकस्य व्याख्यां प्रबन्धस्य करोमि लघ्वीम् ॥

इहादौ ग्रन्थकारोऽस्याविघ्नपरिसमाप्त्यादिफलसिद्धये शिष्टाचारमनुसरन् मङ्गलमाचरति—गणेशेत्यादिना—

(मू) गणेशवाणीगुरुदक्षिणेशान् वन्दे दयाब्धीन् वरदानशीलान् ।
जन्मादिमूलानि निरस्य चाघान्यमी दिशं चाशु ममात्मशुद्धिम् ॥

(व्या) अहं गणेशवाणीगुरुदक्षिणेशान् वन्दे इति सम्बन्धः । दक्षिणेशो दक्षिणामूर्तिः भजतां वैकल्यबाहुल्ये सत्यपि दयया स्वयमेव तद्भजनम् ।

* * * *

अनेनाशौचविषयः कश्चिद्ग्रन्थो मया रच्यते तत्सिद्धिममी ममानुगृह्णन्त्विति· भावः। जननमरणादिमूलास्पृश्यत्वाद्यावा(द्यापा)दको दशाहादिकालनिवर्त्यश्शास्त्रैकगम्यो धर्मः आशौचमित्युच्यते। अत्राशौचं विषयः, आशौचकालस्येयत्तावगतिः प्रयोजनम्, तज्जिज्ञासुरधिकारी, प्रतिपाद्यप्रतिपादकभावलक्षणस्सम्बन्धश्चेत्यनुबन्धचतुष्टयमप्यर्थात्सूचितमित्यवगन्तव्यम् ।

अथ विप्रादीनामाशौचकालस्येयत्तां क्रमेण दर्शयति विप्रेत्यादिना—

(मू) विप्रक्षत्रविडङ्घ्रिजास्त्विह दिशारुद्रार्कतिथ्युन्मिता-
हाशौचा रजसि स्त्रियस्त्र्यहमलास्स्युर्विप्रवत्सूत्रिणाम् ।
विद्ध(ड्व)त्पारशवस्य नो सुहृदघं बालाघभेदाश्च ना-
प्यन्तःपात्यतिकालजाद्यघभिदास्त्वब्राह्मणानां च नो ॥

(व्या) इह विप्रक्षत्रविडङ्घ्रिजास्तु दिशारुद्रार्कतिथ्युन्मिताहाशौचास्स्युः इत्यन्वयः ।

**End:**

पूर्वस्य सन्ध्यालक्षणं चोक्तं स्मृत्यन्तरे—

अहोरात्रस्य यस्सन्धिस्सूर्यनक्षत्रवर्जितः ।
सा तु सन्ध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः ॥ इति ।
यदा पूर्वा दिगाभाति सर्वाभ्यो दिग्भ्य आदितः ।
तदाप्रभृति सन्ध्या स्याद्यावदर्धोदयं रवेः ॥

---

R. No. **4159.**

Paper. 10¾ × 9¾ inches. Foll. 54. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. Rāghava Ayyaṅgār Avargaḷ, Ramnad.

**सूक्तिमुक्तावलिः, द्राविडटीकासहिता.**

**SŪKTIMUKTĀVALIḤ WITH TAMIL MEANING.**

R. NUMBER 4150



A collection of stanzas dealing with the following topics in accordance with the Jaina religion: by Sōmaprabha, pupil of Vijayasiṁhācārya, disciple of Ajitasēnācārya

Same work as that described under No. 12122 of the D.C.S. MSS; Vol. XX. The work is followed by a commentary in Tamil language

Date of transcription.—16th day of the solar month Vaiyāsi in the year Sarvajit. Name of the scribe—Anantanātha

Complete.

१. तीर्थकरसेवापद्धतिः.
२. गुरुसेवापद्धतिः.
३. जिनमतसेवापद्धतिः.
४. चतुस्सङ्घसेवापद्धतिः.
५. अहिंसाव्रतपद्धतिः.
६. सत्यपद्धतिः.
७. अस्तेयपद्धतिः.
८. ब्रह्मचर्यपद्धतिः.
९. परिग्रहपद्धतिः.
१०. क्रोधपद्धतिः.
११. मानपद्धतिः.
१२. मायापद्धतिः.
१३. लोभपद्धतिः.
१४. सौजन्यपद्धतिः.
१५. गुणसङ्घपद्धतिः.
१६. इन्द्रियनिग्रहपद्धतिः.
१७. धनपद्धतिः.
१८. दानपद्धतिः.
१९. तपःपद्धतिः.
२०. भावनापद्धतिः.
२१. वैराग्यपद्धतिः.
२२. जिनपूजा.

**Beginning:**

सिन्दूरप्रकरस्तपःकरिशिरःक्रोडे कषायाटवी-
दावार्चिर्निचयः प्रबोधदिवसप्रारम्भसूर्योदयः ।
मुक्तिश्रीकुचकुम्भकुङ्कुमरसः श्रेयस्तरोः पल्लवः
प्रोल्लासक्रमयोर्नखद्युतिभरः पार्श्वप्रभोः पातु नः ॥
सन्तस्सन्तु मम प्रसन्नमनसो वाचां विचारोद्यताः
सूतेऽम्भः कमलानि तत्परिमलं वाता वितन्वन्ति यत् ।
किं वाभ्यर्थनयानया यदि गुणोऽस्ता(स्त्या)सां ततस्ते वयं
कर्तारः प्रथनं न चेदथ यशःप्रत्यर्थिना तेन किम् ॥
त्रिवर्गसंसाधनमन्तरेण पशोरिवायुर्विफलं नरस्य ।
तत्रापि धर्मप्रवरं वदन्ति न तं विना यद्भवतोऽर्थकामौ ॥

भक्तिं तीर्थकरे गुरौ जिनमते सङ्घे च हिंसानृत-
स्तेयाब्रह्मपरिग्रहव्युपरमं क्रोधाद्यरीणां जयम् ।
सौजन्यं गुणसङ्गती(मि)न्द्रियदमं दानं तपो भावना
वैराग्यं च कुरुष्व निर्वृतिपथे यद्यस्ति गन्तुं मनः ॥

* * * *

**Colophon :**

इति तीर्थकरसेवापद्धतिः ॥

**End :**

सोमप्रभाचार्यसभावलोके वस्तु प्रकाशं कुरुते यथास्तु ।
तथायमुच्चैरुपदेशलेशः शुभोऽर्थवज्ज्ञानगुणांस्तनोति ॥
अभजदजितदेवाचार्यपट्टोदयाद्रिद्युमणिविजयसिंहाचार्यपादारविन्दे ।
मधुकरसमतां यस्तेन सोमप्रभेण रचितमुनिपराज्ञा सूक्तिमुक्तावलीयम् ॥

R. No. **4160.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 84. Lines, 20 in a page. Malayalam. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry. Gaṇapati Mus, Mathanasseri, Quilandy, Malabar district.

**क्रमकल्पलता, केरलभाषाव्याख्यासहिता.**

KRAMAKALPALATĀ WITH MALAYALAM MEANING.

Foll 1*a*—84*a*. Fol. 84*b* is left blank. Foll. 42*a*—50*b* contain the 7th Paṭala of Tantrasamuccaya

A treatise dealing with the procedure connected with the worship of Śiva, Nārāyaṇa, Durgā, Gaṇapati, Harihara, Rāma, Navagrahas, etc. The work is followed with meaning in Malayalam language.

**Beginning :**

स्वस्ति श्रीपरमशिवानन्दनाथपादाब्जाद्यशेषगुरुपारम्पर्यक्रमेण स्वगुरुनाथ-पादाम्बुजे यावत् तावत्प्रणौमि । मूर्ध्नि संवन्द्य गुं गुरुभ्यो नमः, गं गण-पतये नमः, पं परमात्मने नमः, दक्षिणवामपार्श्वहृदये संवन्द्य, ह्रः अस्त्राय फट् इत्यनेन करशोधनतालत्रयादिकं कृत्वा प्रणवेन द्वादशवारं प्राणानायम्य नाडीशोधनं कुर्यात् । इति त्रिवारं प्राणानायम्य दक्षिणनासया त्यजेत् ।

शैवपूजाप्रकारो विलिख्यते—

पादौ प्रक्षाल्याचम्य द्वारस्थानामर्घ्यं दत्वा, अस्त्रेण दीपं प्रज्वाल्याभिवाद्य दक्षिणपार्श्वे देवाभिमुखमुपविश्य भूतसंहारादिगणपतिजपान्तं कृत्वा ।

**End:**

गायत्र्या निजया स्वपञ्चमनुदिग्वाहुत्य सर्पिः क्रमात्
पश्चात्साष्टशतं जुहोतु समिधोऽश्वत्थोत्थिताः खादिराः ॥
स्त्राक्षी ब्रह्ममयी सपाटलपटोद्भूतास्स्वमूलाणुना
होमान्ते कलशेन देवमदसीयेनापि सिक्त्वा यजेत् ॥

## R. No. 4161.

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 102. Lines, 20 in a page. Grantha. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry C Vāsudēva Sōmayājipād, Vilayur, Pattambi, Malabar

प्रयोगतरणिः.

PRAYŌGATARAṆIḤ.

On the procedure to be observed in connexion with the performance of Sōmayāga (Sōma sacrifice). This is intended for the use of the followers of Bōdhāyana school By Nārāyaṇa.

Complete.

**Beginning:**

श्रीमन्तं जगतां नाथं प्रणम्य मधुसूदनम् ।
प्रयोगं सौमिकं वक्ष्ये बोधायनमतेन हि ॥

अग्निष्टोमेन यक्ष्यमाणो ब्राह्मणः पूर्वमेव तत्साधनानि संपादयेत् । कृष्णाजिनमनुपयुक्तं गुरूपयुक्तं वा कृष्णविषाणं त्रिवलिर्वा पञ्चवलिर्वा सर्वा पाशिन्या रज्वा परिस्तृणा(ना) शरमयी मेखलापि दर्भरचिता योक्त्रं च शरमयं त्रिवृद्द्वयमप्येकतमं पाशं दर्भपुञ्जीलानि बहूनि नवनीतमञ्जनं चतस्रश्शरैषिकाः औदुम्बरं दण्डम् ।

**End:**

अध्वर्युब्रह्मप्रस्तोतॄणां वरं ददाति । ततस्तान्यग्न्यायतनानि उद्धननन्यायेनोद्धृत्यावोक्ष्य, विहरणन्यायेनाग्नीन् विहरेत् । तत्काले तत्र ब्रह्मयजमानावुपविशतः । मन(यजमान)पत्नीं न विस्मरेत् ।

मनस्वतीहोमविधौ यात्रायां यत् घृतं कृतम् ।
न तदुत्तरकर्मार्थं तस्माद्भूयोऽपि निर्वपेत् ॥
अतः परं सायंप्रातरग्निहोत्रे प्रतिजुहोति ।

* * * *

नारायणेन शशी(शिति)कण्ठकृताङ्कनेन नारायणाङ्घ्रिसरसीरुहतत्परेण ।
एषा प्रयोगतरणी रचिता मयेत्थं यज्ञेश्वराङ्घ्रिकमलप्रणयप्रसादात् ॥

**Colophon:**

प्रयोगतरणीन¹(णिर्ना)म प्रयोगवृत्तिस्समाप्ता ॥

---

R. No. **4162.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 114. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. Maṅgāttammaṅgār, Vaḍakkuttirumaligai, Alwartirunagari.

श्रुतप्रकाशिकाटिका.

ŚRUTAPRAKĀŚIKAṬĪKĀ.

Foll. 1*a*—113*b*. Fol 114 is left blank.

A commentary on Sudarśanācārya's Śrutaprakāśikā which itself is a commentary on the Śrībhāsya of Rāmānujācārya.

The commentator salutes in the beginning Dēvarājaguru who knew both the Mīmāmsās and at whose instance the commentary was written.

Contains the first Sūtra incomplete.

**Beginning:**

प्रणम्य देवराजार्यं मीमांसाद्वयवेदिनम् ।
तापनीयरहस्यैकनिष्णातहृदयं सदा ॥
श्रुतप्रकाशिकामेव भजस्व श्रवणादिभिः ।
इति तैर्देवराजार्यैरनुशिष्टोऽहमादितः ॥
सुदर्शनादौ सत्येव तेनेमां भक्तिपूर्वकम् ।
आरिराधयिषुर्वक्ष्ये टीकामेतत्प्रसादिनीम् ॥

प्रारिप्सिताविघ्नपरिसमाप्त्यर्थं प्रचयार्थं च स्वाभीष्टां देवता शरणं प्रपद्यते—वरदमिति । प्रपत्तेस्सकलफलसाधनत्वाच्छाधि मां त्वां प्रपन्नमिति न्यायेनाविघ्नपरिसमाप्त्यर्थमिह प्रपदनं युक्तम्, मङ्गलं च रात्रिसत्रनयाज्जातेष्टिनयाच्चाविघ्नसमाप्त्यर्थमाचारानुमितचोदनाचोदितं संवलिताधिकारं कर्मेति

सिद्धान्तः । तदिह तन्नैमित्तिकं प्रपदनरूपं च युक्तं कर्तुम् । तत्र शरण्यत्वौपायिका भगवद्गुणा यथाक्रममिह विशेषणैस्समाख्याविशेषतया प्रमाणभूतैरौदार्यसौलभ्यतत्साम्राज्यहेतुवल्लभासम्बन्धकारुण्याश्रितेष्टविरोध्यनिष्टनिवर्तनशक्तिरूपाः प्रदर्श्यन्ते ।

* * * *

एवं मङ्गलमनुष्ठाय चिकीर्षितं प्रतिजानीते—श्रीरङ्गेति । प्रथमविशेषणेन स्वस्य धीविशेषं द्वितीयेन सत्त्वोत्तरत्वं चात्यर्थं प्रादर्शयत् । अचूचुदत् । श्रुतप्रकाशिकायामिति शेषः । नियुक्तास्त्रिभिः कर्म यत्राद्यं तदेकं तत्र यो नियुज्यते स द्वितीयः । अत्र भाष्यं मया व्याख्यायत इति प्रतिज्ञातं भवति ।

**End:**

अथ प्रश्नार्थत्वं दूषयति—प्रश्नपरत्वमपीति । वचनव्यक्तेः पदानामुद्देशरूपावस्थानस्य प्रश्नप्रतिवचनरूपभावमेव यथा दर्शयति । तदाहीति। तदेदं वाक्यं प्रश्नरूपं स्यात् तदा प्रतिवचनाभावेनासाकाङ्क्षं स्यात् । तत्कल्पनायां तु स एव वाक्यभेदागौरवादिति दोष इति भावः ॥

---

## R. No. 4163.

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry. Sārathi Kavicandra of Mandasa.

### सङ्गीतकौमुदी.

### SAṄGĪTAKAUMUDĪ.

Foll. 1*a*—13*a*. Foll. 13*b*—14 are left blank

A treatise on details connected with music singing (including tunes, modes, etc.) and dancing.

Contains the Pādas 1—7 complete.

१. स्वरनिरूपणम्.
२. रागनिरूपणम्.
३. तालस्वरूपनिरूपणम्.
४. तालनिरूपणम्.
५. बन्धनिरूपणम्.
६. ग्रहादिनिरूपणम्.
७. नृत्यनिरूपणम्.

**Beginning:**

प्रमदाजनचित्तमोहनास्त्रं नयनानन्दनिकेतनं नराणाम् ।
कमनीयतमालकान्तिकान्तं कलये किञ्चन धाम कामदायि ॥

स्वररागतालगीतादीनां लोके प्रसिद्धरूपाणाम् ।
क्रियते लक्षणमेषां बुद्ध्या सङ्गीतकौमुद्याम् ॥
गीतं वाद्यं च नृत्यं च त्रयं सङ्गीतमुच्यते ।
सामवेदादिकं शास्त्रं संजग्राह पितामहः ॥
सदाशिवः शिवो ब्रह्मा भरतः कश्यपो मुनिः ।
मतङ्गो याष्टिको दुर्गा शक्तिः शार्दूलकोहलौ ॥
विशाखिलो दत्तिलश्च कम्बलोऽश्वतरुस्तथा ।
वायुर्विश्वावसू (व्यासा)र्जुनौ नारदतुम्बुरू ॥
आञ्जनेयो मातृगुप्तो रावणो नन्दिकेश्वरः ।
स्वातिर्गणो देवराजः (भारती कुम्भसम्भवः) ॥
एते सङ्गीतशास्त्रस्य व्याख्यातारः पुरातनाः ।
अस्य गीतस्य माहात्म्यं कः प्रशंसितुमर्हति ॥
धर्मार्थकाममोक्षाणामिदमेकं हि साधकम् ।

उक्तं हि विष्णुपुराणे —

काव्यालापाश्च ये केचिद्गीतज्ञान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः ॥
सप्त स्वरास्त्रयो ग्रामाः मूर्च्छनास्त्वेकविंशतिः ।
द्वाविंशतिस्तु श्रुतयः तालाः पञ्चाशदूनकाः ॥
षड्जऋषभगान्धारौ मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च स्वराः सप्त प्रकीर्तिता ॥

* * * *

**Colophon:**

इति सङ्गीतकौमुद्यां स्वरनिरूपणो नाम प्रथमः पादः ॥

**End:**

ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ।
वंशादिकं तु सुषिरं कांस्यं तालादिकं घनम् ॥
विशेषलक्षणं तेषां नोक्तं विस्तरशङ्कया ।
परं हस्तकसारे तु वक्ष्ये हस्तकलक्षणम् ॥

सुधियां परितोषाय बोधायाल्पधियां तथा ।
स्वरादीनां लक्षणं च सङ्क्षेपेण मयोदितम् ॥
सङ्गीतकौमुदी सेयमज्ञानतिमिरान्तकृत् ।
सङ्गीतविद्याकुमुदमोदिनी कं न मोदयेत् ॥

**Colophon:**

इति सङ्गीतकौमुद्यां नृत्यनिरूपणो नामाष्टमः(म सप्तमः) पादः ॥

## R No **4164.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of Śrīmān Harihara Rājaguru, Cochinajagannāthapuram, Kodala post, Ganjam district.

कृष्णलीलामृतम्

KṚṢṆALĪLĀMṚTAM.

A drama in seven Acts describing the leading incidents that happened in the life of Lord Krsna from the time he was led from Gōkula to Madhurā by Akrūra under the orders of Kaṁsa till the killing of Kaṁsa by Krsna in single combat: by Kēśava

Complete.

**Beginning:**

राधावासगृहं प्रविश्य सहसा प्रातस्सखीवेषधृत्
कृष्णायैव मम स्थितौ सखि कथं ते दीनतैवं वदन् ।
हा सत्यं सखि लोकयामितमिति क्षिप्रं तयाऽऽलिङ्गितः
सन्तोषावधि चुम्बितः स्मितयुतः प्रीतो हरिः पातु वः ॥

अपि च—

यां वीक्ष्य व्रजपूर्णचन्द्रवदना यान्ति स्मराधीनता
मायान्ति स्म सखेति गोपतनयाः कैशोररम्याश्चलाः ।
बालोऽयं बहुदुःखभागिति जहात्यस्त्रं यशोदाकुला
सायं सा व्रजतो वनान्मुरभिदो मूर्तिस्सदा पातु वः ॥

* * * *

भो भो राधावदनारविन्दमत्तमधुकरस्य त्रिभुवनमौलिमण्डनमहानीलरत्नस्य श्रीमद्व्रजेन्द्रनन्दनस्य यात्रायां रामस्थलीकोपस्थिताः सभासदः ।

अद्य स्वप्नान्तरे आदिष्टोऽस्मि श्रीकृष्णपदारविन्दद्वन्द्वनिष्यन्दमानमकरन्द-बिन्दुसन्दोहास्वादनविस्पन्दनया बृन्दया । यथा जगदानन्दसन्दोहकन्दस्य नन्दनन्दनस्य रासोत्सवे नानादिग्देशादागताः साधवः—

* * * *

मधुसूदनसेवनप्रवीणस्सुकवीनो भुवि केशवाभिधानः ।
कविरस्ति सुभव्यकाव्यकर्ता लसदात्रेयकुलाब्धिपूर्णचन्द्रः ॥

* * *

अस्ति तेन कविना ग्रथितं कृष्णलीलामृतं नाम नवीनं नाटकं तेन सामाजिकानुपास्महे ।

* * * *

(नेपथ्ये) मङ्गलपाठक कुतो ज्ञातं त्वयाऽद्य दानलीला भविष्यतीति ।

सू—पुरोऽवलोक्य, एषा पौर्णमासी स्वशिष्यया बृन्दया सह किमपि मन्त्रयन्तीत एत्राभिगच्छति, तस्मादस्माकमवस्थानं न युक्तम् ।

* * * *

अनन्तरकरणाय सज्जीभवाव इति निष्क्रान्तौ ।

(इति प्रस्तावना)

ततः प्रविशति पौर्णमासी बृन्दा च ।

पौर्णमासी—बृन्दे अन्यदपि श्रूयताम् ।

बृन्दा—अवहितास्मि ।

पौर्ण—अद्य मधुरां कृष्णं नेतुं कंसाज्ञया अक्रूरः आगमिष्यतीति किंवदन्ती श्रूयते ॥

बृ—आः सत्यम् ?

पौ—अलमावेगेन एतादृशीश्वरघटना ।

बृ—(सविस्मयम्) सत्यं व्रजं त्यक्ष्यति कृष्णः ?

* * * *

**Colophon:**

इति श्रीकेशवकविरचिते कृष्णलीलामृताख्ये नाटके दानकेलिर्नाम प्रथमोऽङ्कः ॥

**End:**

नारदः—

नष्टे कंसे खलबृन्देन सार्धं त्वत्तः श्रीमन् कृतकृत्याश्च देवाः ।
सेक्तुं त्वां भोः कुसुमैर्नन्दनोत्थैः स्वो(सो)त्कण्ठैस्तैर्न चिरात्प्रेषितोऽहम् ॥

इति कुसुमान्युपरि क्षिपति ।

कृष्णः—कंसो मृतः, किमतः परं प्रियमुपकरिष्ये भवताम् ।

**Colophon:**

इति कृष्णलीलामृतनाटके सप्तमोऽङ्कः ॥

The scribe adds—

* * * *

श्रीकृष्णलीलामृतं नाम नाटकं हरिबन्धुनाम्ना लिखितम् ॥

---

## R. No. 4165.

Paper. 10¾ × 9¼ inches. Foll. 61. Lines, 20 in a page. Dēvanāgarī. Good

Transcribed in 1922–23 from a MS. of the Librarian, Sanskrit College, Tripanittura, Cochin State.

### कृष्णामृतमहार्णवः, सव्याख्यः.

### KṚṢṆĀMṚTAMAHĀRṆAVAḤ WITH COMMENTARY.

Foll. 1*a*—63*a*. Foll. 63*b*—64 are left blank.

A treatise with authoritative quotations from various Purāṇas and Smṛtis bringing out the importance of the worship of Lord Kṛṣṇa and observing the Ēkādaśīvrata The text is by Madhvācārya alias Pūrṇaprajña also called Ānandatīrthācārya and the commentary is by Kṛṣṇācārya.

Complete.

**Beginning:**

श्रीकृष्णं रुक्मिणीसत्यासहितं पाण्डवप्रियम् ।
नत्वा श्रीपूर्णबोधार्यान् गुरूनपि भजे गिरम् ॥
पूर्वं व्याख्याकृतो नत्वा बालबोधाय सादरम् ।
व्याख्यास्यामि यथाबोधं कृष्णामृतमहार्णवम् ॥
अस्मद्गुरुप्रसादेन कृष्णाचार्योऽहमञ्जसा ।

इह तापत्रयसन्तापार्तं सज्जनजातं पूर्णानन्दानुभवरूपामृतदानेन निरी(चि)-
कीर्षुः परमकारुणिकः श्रीमदानन्दतीर्थमुनिः श्रीकृष्णामृतमहार्णवाख्यं ग्रन्थं

कर्तुकामोऽधिकारिणामभ्यर्चनध्यानादिना मोक्षदातारं भगवन्तं वासुदेवं प्रति रक्षणं प्रार्थयते—भगवदर्चनादेश्च मोक्षसाधनत्वं वक्ष्यमाणप्रमाणैः—

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
यत्कीर्तन . . . . . . . कृष्णाय नमः ।
अर्चितस्संस्मृतो ध्यातः कीर्तितः कथितः श्रुतः ।
यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ॥

यत्स्मरणं यदीक्षणमिति भारतभागवतादिवाक्यैरवगन्तव्यम् । अर्चितः श्रौतस्मार्ततान्त्रिकाद्यभ्यर्चनविधिना पूजितः संस्मृता भगवन्माहात्म्यानुसन्धानपूर्वकं सम्यक् स्मृतः, तथा ध्यातः सच्चिदानन्दात्मत्वादिप्रकारेण ध्यातस्तथा कीर्तितः रामकृष्णादिनाम्नोच्चारितः ।

* * * *

(मू) तापत्रयेण सन्तप्तं यदेतदखिलं जगत् ।
वक्ष्यामि शान्तये ह्यस्य कृष्णामृतमहार्णवम् ॥

* * * *

(व्या) स्वचिकीर्षितस्य ग्रन्थस्य फलं वदन् शिष्यमनस्समाधानार्थं ग्रन्थनामाह—तापत्रयेणेति। तापत्रयेण—आध्यात्मिकादि(धि)दैविकाधिभौतिकाख्यतापत्रयेण, तथा कायिकवाचिकमानसिकप्राप्ततापत्रयेण वा, स्वर्गमर्त्यनरकवासजन्यतापत्रयेण वा, कामक्रोधलोभजन्यतापत्रयेण वा, बाल्ययौवनवार्धक्या(का)वस्थाजन्यतापत्रयेण वा, भगवद्विस्मरणदुष्टसंसर्गसत्सङ्गराहित्यजन्यतापत्रयेण वा, पुत्रेषणावित्तेषणादारेषणाजन्यतापत्रयेण वा, गर्भवासजन्ममरणजन्यतापत्रयेण वा, सम्यक् तप्तं व्यथितमेतत् प्रत्यक्षादिसिद्धमखिलं समग्रं जगत् सज्जनजातं यद्वर्तते । अस्य भक्तजनजातस्य शान्तये तापत्रयपरिहाराय, अस्य विविधतापत्रयदुःख(ा)[ता]र्तस्य भक्तजनस्य शान्तये मोक्षाय वा कृष्णामृतमहार्णवं कृष्णस्यामृतमहागुणार्णवप्रतिपादकं ग्रन्थम् । कृष्णेन भक्तेभ्यो दीयमानस्वरूपसुखात्मकामृतमहासमुद्रसाधनमिति वा । कृष्णामृतमहार्णवाख्यग्रन्थसन्दर्भं वक्ष्यामीत्यर्थः ।

**End :**

(मू) श्रीमदानन्दतीर्थार्यसहस्रकिरणोत्थिता ।
गोततिः सततं सेव्या गीर्वाणैः शुद्धिदो भवेत् ॥

**Colophon :**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः कृष्णामृतमहार्णवस्समाप्तः॥

(व्या) श्रीमदानन्दतीर्थेति । श्रीमन्तो ये आनन्दतीर्थार्यास्त एव सहस्रकिरणस्सूर्यस्तेनोत्थितः प्रकाशितः गोततिः किरणसमूहरूपोऽयं ग्रन्थः तथा सहस्रकिरण(स्य) सूर्यस्य गोततिः किरणसमूहो यथा सर्वैस्सेव्यस्तथा श्रीमदानन्दतीर्थार्यमुखनिस्सृतनिर्दुष्टवाक्समूहरूपोऽयं ग्रन्थः गीर्वाणैः सततं सेव्यो भवेत् । कुत इत्यत उक्तं शुद्धिद इति । देवानामपि मनःशुद्धिप्रदत्वादयं ग्रन्थः तैः सेव्यः किल किं वक्तव्यं भगवद्भक्तैः मनुष्यैस्सेव्य इति ।

पूर्णप्रज्ञाचार्यकृतः कृष्णामृतमहार्णवः ।
कृष्णाचार्येण व्याख्यातस्तेन प्रीतोऽस्तु मे हरिः ॥
श्रीमन्मध्ववरदश्रीगोपालकृष्णः प्रीयतां मम सन्ततम् ।

* * * *

**Colophon :**

इति कृष्णामृतमहार्णवव्याख्या समाप्ता ॥

R. No. **4166.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 140. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry Kṛṣṇa Nambūdiri Vaidikan, Tekkattu-mana, Kumaranallur, Malabar district.

**बोधायनकल्पसूत्रविवरणम्.**

BŌDHĀYANAKALPASŪTRAVIVARAṆAM.

Foll. 1*a*—139. Foll. 139*b*—140 are left blank.

An exposition of Bōdhayana's Kalpasūtras, dealing with the ritualistic procedure relating to the performance of Śrauta sacrifices: by Dāmōdara who mentions one Ācārya.

Name of the scribe—Śankara.

Complete.

**Beginning :**

वेदशाखानां बहुत्वादेकैकस्यां च(स्याश्च)सर्वशः(क्त)प्रत्य(त्ये)यत्वात् ग्रन्थादेवाशक्तेरपि ज्ञेयत्वात्सर्वजन्यत्वान्मा(त्वसामा)न्यात्सर्ववेदार्थतत्त्वज्ञसर्वतत्वा(ज्ञावगतत्वात )संप्रत्यविस्तरेण काम्यनैमित्तिकाजस्री(स्रि)काणामनुष्ठानप्रतिपादनार्थं सर्वेषां त्रैवर्णिकानामनुष्ठानं सूक्ष्ममध्यमन्दबुद्धीनां क्रमानुष्ठानेनेष्टार्थलाभ इति तत्र तत्र सम्बन्धस्याविनाभावित्वाद्दद . . . त्वादिदमप्येकवाक्यत्वेन व्यावर्त्यते ।

गर्भाधानादिसंस्कारैस्संस्कृतः क्रमवर्तिभिः ।
वेदाध्ययनसम्पन्नस्ततो दारपरिग्रहात् ॥
पुराअ(ह्य)धीतवेद(त्वात् )स्नात(क)श्च[क्रतु]स्त(स्तु त)तः परम् ।
सर्वासिद्धानृध (द्धो ध)नाढ्यश्च कर्मणामधिकारभाक् ॥
आमावास्येने(न वे)त्यादि योजयेत्तदनन्तरम् ॥

तत्र त्वेषां कर्मणां समस्तविधानं विद्यते। प्रवर्ग्य इति। तत्र चोदना-लिङ्गसामान्येनातिदेशकं कुर्वतां प्रकृतिसंज्ञा । तस्मादग्निहोत्रस्य प्रकृतिसंज्ञा न विद्यते । नामधेयेन धर्मातिदेशो विद्यते । प्रवर्ग्याधानकौण्डपायिनामयना-दिषु प्रवर्ग्यस्य च न प्रकृतित्वं भवति ।

* *

(सू) आमावास्येन वेत्यादि—

इहानुष्ठानक्रमेणाधानं किमिति नारभ्यते । प्रथमं पौर्णमास्युपक्रमत्वे च सत्यमावास्यायां प्रथमोच्चारणं कथमिति वेदस्यादौ दर्शपूर्णमासमन्त्राः पठिताः । तत्राप्यामावास्यस्यैव प्रथमो मन्त्र इषे त्वेत्यादि । तस्मात् मन्त्र-क्रमात्प्रथमारम्भः । तथाधानेष्टीनां दर्शपूर्णमासप्रकृतीनामेतत्परिज्ञानं विनानु-ष्ठातुमशक्यत्वाच्च । एतौ पुनर्निरपेक्षौ । तस्मादनयोरेव प्रथमारम्भः । आमावास्यस्य च निरपेक्षत्वात् प्रथमारम्भो दाक्षायणयज्ञे शाखाछेदनादि न साधारणं(णो) धर्मः । पौर्णमास्यस्य च गृहीतव्यमिति ।

* * * *

आचार्येणापि आमावास्येन वेति भेदेनैकवचननिर्देशात् स एवार्थो दर्शितो भवति । इतरथा दर्शपूर्णमासाभ्यामित्येव (अ)वक्ष्यन्(त् ।) फले लुक् पुनः साहित्य . . . . . फलसम्बन्धः—

वायुर्वा त्वेति दृष्टत्वाद्वाशब्दस्स्यात् समुच्चये ।
प्रत्येकं चैव सम्बन्धो यक्ष्यमाणपदेन तु ॥
व्यामोहोऽत्र न कर्तव्यस्समुच्चय इतीरणात् ।
अतिवादनलिङ्गाच्च तत्र भेद इति ध्रुवः ॥

* * * *

**Colophon:**

इति दामोदरस्वामिनः कृतौ बोधायनकल्पविवरणे प्रथमोऽध्यायः ।

**End:**

षोडशिनि प्रातरग्निहोत्रस्यैवाकरणपक्ष एव सिद्धान्तः । सन्तिष्ठतेऽ-ग्निष्टोम इति वीप्सा क्रतुकरणादीनां विधानाभावान्न भवेत् । उक्थ्यादि-

समाप्तिः संमोह इति । एतस्य समाधिः प्रोक्ताधिकारविच्छेदः । प्रयोजनम(नं) वीप्सा च शान्तिपुष्टिसिद्ध्यर्थम् ॥

**Colophon:**

इति दामोदरस्वामिकृतौ बोधायनकल्पविवरणे तृतीयस्य सप्तमोऽध्यायः समाप्तः ॥ अग्निष्टोमश्च समाप्तः ॥

Scribe—

शङ्करेण लिखिता इयं कल्पव्याख्या दामोदरकृता ॥

## R. No 4167.

Paper. 10¾ × 9¼ inches. Foll. 138 Lines, 20 in a page. Grantha. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry. Śaṅkara Nambūdiri, Avanaparambu.

### विषनारायणीयम्.

### VIṢANĀRĀYAṆĪYAM.

Foll. 1*a*—138*a*. Fol. 138*b* is left blank.

Same work as that described under R. No. 3837 ante. By Nārāyaṇa, son of Umā and Nārāyaṇa of Śivapura. The author had a sister called Gaurī and a maternal uncle by name Śivaparamēśvara.

Date of transcription—Monday, the 9th day of the bright fortnight of the month Cittirai in the Kollam year 1245. Name of the scribe—Anantanārāyaṇan of Tōpiṅgatti-maṭham

Complete in 32 Paṭalas.

**Beginning:**

श्रीवल्लभं महादेवं विहगानामपि प्रभुम् ।
प्रणम्य शिरसा वन्दे गुरून् लोकोपकारिणः ॥
यावत्सामर्थ्यमस्माभिस्सर्वलोकहितैषिभिः ।
शिवायोगादितन्त्रेभ्यः क्रियते सारसंग्रहः ॥
विषग्रहामयध्वंसाः क्षुद्रं नर्म च कामिकः ।
इति षट्कर्मिकं तन्त्रमेतत्सिद्धिद्वयास्पदम् ॥
मन्त्रध्यानौषधकथा मुद्रेज्या यन्त्रमुष्टयः ।
वक्ष्यन्ते वहुधान्ये व(च) प्रयोगा इष्टशक्तयः ॥

उद्ध्रियन्तेऽत्र बीजानि मन्त्रा व्यत्ययिताक्षराः ।
मालामन्त्राणां व्यत्यासः किञ्चिदादौ विधीयते ॥

**End:**

ग्रामो यस्य शिवास्पदं शिवपुरं राजा . . .
गेहं मुण्डमुखाय यस्य जनको नारायणो वेदवित् ।
यस्योमा जननी पतिप्रियगुणा यस्यापि गौरी स्वसा
तत्तुल्यः परमेश्वराश्शिवपरो यस्याभवन्मातुलः ॥

नानाजातिक्रियाढ्यान् जगति बहुविधान् मन्त्रपादाननेका-
नालोच्यालोड्य कर्माण्यभिमतमखिलं सारमादाय तेभ्यः ।
तेन श्लोकैस्सहस्रद्वितयपरिमितैस्तन्त्रमेतत्प्रणीतं
निष्पैशुन्येन तन्त्रेष्वनिशमनिमिषाक्षेण नारायणेन ॥
एतस्मिन् मन्त्रपादे भुवनहितकरे सर्वमन्त्रार्थकोशे
नाम्ना नारायणीये प्रचुरपरिल(च)यः श्रद्दधानः पुमान् यः ।
संप्राप्ताशेषकामस्स भुवि चिरतरं कामचारी चरित्वा
दिव्यानिष्टांश्च भोगाननिमिषपतिवत् प्राप्नुयात् दिव्यदेहः ॥

---

R. No. **4168.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 82. Lines, 20 in a page. Grantha. Good.

Transcribed in 1922–23 from a MS of the Raja's Library, Khallikote, Ganjam district

Fol. 82*b* is left blank

**मुकुन्दमुक्तावली, कान्तिमतीसहिता.**

MUKUNDAMUKTĀVALĪ WITH KĀNTIMATĪ.

A commentary on Rūpagōsvāmin's Mukundamuktāvalī, which work has been described under R No 3053(*l*) ante: by Anangabhīmadēva.

Complete.

**Beginning:**

(मू)—

नवजलधरवर्णं चम्पकोद्भासिकर्णं
विकसितनलिनास्यं विस्फुरन्मन्दहास(स्य)म् ।

कनकरुचिदुकूलं चारुबर्हावचूलं(डं)
कमपि निखिलसारं नौमि गोपीकुमारम् ॥

(व्या)—

प्रोल्लसत्स्वर्णवर्णाभस्सर्वभक्तगणैर्वृतः ।
नृत्यन् सङ्कीर्तनारम्भे स गौरो मे गतिस्सदा ॥
प्रणम्य श्रीगुरोः पादान् श्रीराधामाधवौ तथा ।
मुकुन्दमुक्तावल्याख्यस्तोत्रटीकां करोम्यहम् ॥

अथ सकलभागवतोत्तमः श्रीरूपगोस्वामी श्रीकृष्णस्य श्रीमन्नारायणब्रह्मविष्ण्वादिसकलावताराणां मूलकारणत्वेन स्वयं भगवत्त्वं निश्चिन्वानस्तस्य सर्वोत्तमताव्यञ्जनया मुकुन्दमुक्तावलीनाम स्तोत्रं प्रकाशयन् सर्वाद्भुतचमत्कारनरलीलं तं यशोदाकुमारं वर्णयन् ग्रन्थारम्भे तत्प्रतिबन्धकविघ्नौघविघाताय भजनीयस्वेष्टदेवतानमस्कारस्यावश्यकर्तव्यत्वात् शिष्टाचारपरम्परागतत्वाच्च नमस्कारपूर्वकं नौति

* * * *

इत्यादिश्रीभागवतीयस्कन्दपुराणीयपद्यप्रामाण्येन मङ्गलस्वरूपमिदमिति बोधयति— नवेति । सर्वातिशाय्यसाधारणगुणगणशालित्वेन अनिर्वचनीयं गोपीकुमारं यशोदानन्दनं श्रीकृष्णं नौमि नमस्कारपूर्वकं स्तौमीत्यर्थः ।

**End :**

(मू)—

वन्दे श्रीकृष्णचैतन्यं कलिकल्मषनाशनम् ।
प्रेमामृतप्रवाहेण प्लावयन्तं जगत्त्रयम् ॥

(व्या)—

अथ टीकाकारष्टीकापरिसमाप्तौ सत्याममन्दपरमानन्दभरितस्सन् आत्मनः तच्चरणनलिनसेवैकलालसत्वमन्तर्विभाव्य निजभक्तिप्रवर्तनेन कलियुगपावनावतारं विशेषतस्स्वाश्रयपदकमलं स्वेष्टदेवं श्रीकृष्णचैतन्यं स्वयं भगवन्तं नमस्करोति—वन्द इति । श्रीकृष्णचैतन्यं कृष्णश्चासौ चैतन्यश्चेति । यद्वा कृष्णनामा चैतन्यः ।

*

कृष्णावतारं वर्णयति । तद्रूपं लीलामाधुर्यं सर्वत्रोपदिशतीति तं साङ्गोपाङ्गेत्यादिकमुभयपक्षेऽपि अप्रच्छन्नत्वाभ्यां तुल्य एवार्थ इति ॥

मनामि वा . . . . नामि पुष्णामि स्वमतं परम् ।
शुद्धं लिखाम्यशुद्धं वा क्षमन्तां साधवोऽखिलाः ॥

प्रणम्य वैष्णवान् सर्वान् तत्पादभजनोन्नतेः ।
टीका कृता कान्तिमती सद्भक्तिसुखदा हि या ॥
साधवो वत्सला धीरा दीनत्राणपरास्सदा ।
वाचालभावापन्नस्य क्षमध्वं चापलं मम ॥

**Colophon:**

इति श्रीनन्दनन्दनचरणनलिनदासदासेन पुरुषोत्तमानङ्गभीमदेवेन विरचिता कान्तिमतीनाम्नी मुकुन्दमुक्तावलीटीका समाप्ता ॥

---

R. No. **4169.**

Paper. 10¾ × 9¾ inches. Foll. 32. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS of M.R.Ry. Śaṅkaran Nambūdiri, Ālamballi-mana, Kavalappara post, Shoranur.

छन्दोदेवतानुक्रमणी.

CHANDŌDĒVATĀNUKRAMAṆĪ.

Foll 1*a*—30*b*. Foll. 31 and 32 are left blank.

An index of Chandas (metre) of all the Ṛks in every Sūkta of the Ṛg-Vēda together with an index of Dēvatās in each Sūkta.

Breaks off in the middle; otherwise complete.

**Beginning:**

यैर्वेदमन्त्रास्सकलास्स(श्र)दृष्टा येन चार्षानुक्रमणी प्रदिष्टा(?) ।
नमोऽस्तु तेभ्यो मुनिपुङ्गवेभ्यो भवन्तु ते चापि मयि प्रसन्नाः ॥
शौनकाय नमः—

ऋग्वेदगतसूक्तानां सूक्तस्थानामृचामपि ।
यानि छन्दांसि विद्यन्ते तानि वक्ष्याम सम्प्रति ॥
गायत्रं नवसूक्तानि मधुच्छन्दस आदितः ।
आनुष्टुभे परे ज्ञेये दशमैकादशे उभे ॥
मेधातिथेस्तु सूक्तेषु गायत्रेषूत्तमोष्विति ।
पुर उष्णिक् परानुष्टुप् तिस्रश्चान्त्या अनुष्टुभः ॥
शुनःशफस्य सूक्तानि गायत्राण्येव तत्र तु ।
त्रिष्टुभौ प्रथमस्याद्ये षष्ठाद्याश्च तथा दश ॥

**End:**

प्राग्नये सूक्तमाग्नेयं जातवेदसमुत्तरम् ॥
आयं गौरिति यत्सूक्तं सार्पराज्यारुषं परम् ।
त्रिस्थानविष्ठिता वा श्वा सूर्यो वा तस्य देवता ॥
उपान्त्यं खलु तत्सूक्तं भाववृत्तं प्रचक्षते ।
आग्नय्यसंसमित्येषा सूक्तं संज्ञानदेवतम् ॥

**Colophon:**

देवतानुक्रमणिका समाप्ता ॥
अशेषमन्त्रैरिह या प्रतीता सा देवतानन्दमयी समस्ता ।
सङ्कीर्तितास्माभिरनुक्रमेण सा चापि नस्सर्वसुखप्रदा स्यात् ॥

---

R. No. **4170.**

Paper. 10¾ × 9¾ inches. Foll. 108. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry. Gōvindarājaguru, Padempura Śāsanam, Berhampur, Ganjam district.

**शास्त्रदीपिकाव्याख्या—युक्तिस्नेहप्रपूरणी.**

ŚĀSTRADĪPIKĀVYĀKHYĀ: YUKTISNEHAPRAPŪRAṆĪ

Foll. 1*a*—107*b*. Fol. 108 is left blank.

A commentary on Pārthasārathimiśra's Śāstradīpikā, which work has been described under No. 4179 of the D.C.S. MSS., Vol. IX: by Rāmakṛṣṇabhaṭṭa, son of Mādhava of Parāśaragōtra.

This is also called Siddhāntacandrikā.

Contains from the beginning of the second Pāda of the second Adhyāya up to the end of the fourth Pāda of the same Adhyāya.

**Beginning:**

"शब्दान्तरे कर्मभेदः" अनन्तरवृत्तासङ्गविचारणासङ्गतिमाशङ्क्योपोद्घातेन सङ्गतिं दर्शयितुमाह—गतमिति । उपोद्घातो भावार्थाधिकरणम् । पूर्वभेद उक्तस्तदपवादार्थत्वेन तानि द्वैधमुक्तम् । तत्प्रसङ्गान्मन्त्रगताख्यातविशेषो विचार(रि)तः । तदनु प्रसक्त्या च मन्त्रलक्षणमित्युपोद्घातप्रसक्तानुप्रसक्तम् । समाप्तमित्यर्थः । ऋक्सामादिलक्षणमपि मन्त्रलक्षणानुप्रसक्तं चेति चशब्दप्रतिज्ञातम् । तदपि निरूपितमिति भावः । इदानीमिति । उपोद्घाते वृत्ते प्रकृतविचारावसरो भवतीत्यर्थः । शब्दान्तरादिभिर्भेदो विधीयत इत्य-

युक्तम् । तस्य प्रतिनियतयागदानादिरूपस्वार्थाभिधायकत्वात् । अथ शब्दान्तरादिप्रमाणकः कर्मभेदो विचार्यत इत्यर्थः । सोऽपि न तदप्रमाणत्वादाद्यस्यैव तत्प्रमापकत्वेनात्र विचार्यत्वात । एतस्य वा तत्प्रमाणत्वे तद्वैयर्थ्यभेदकावगतभेदस्यानेन न्यक्कोधनवैयर्थ्याच्च(?) ।

उच्यते । लक्षणार्थः कर्मभेदो विधीयते निरूप्यते शब्दान्तरादिभिरित्यनेनादिशब्दोपात्तो विधिरपि गृह्यते । न च विधिनैव भेदसिद्धौ शब्दान्तरादिवैयर्थ्यमिति वाच्यम् । तेन विना तदसिद्धेः श्रुत्यादिवत् ।

* * * *

**Colophon:**

इति श्रीमत्पराशरगोत्रसकलशास्त्रविशारदमाधवात्मजरामकृष्णभट्टविरचितायां शास्त्रदीपिकाटीकायां युक्तिस्नेहप्रपूरण्यां द्वितीयस्याध्यायस्य द्वितीयः पादः॥

* * * *

**Colophon:**

इति श्रीमत्पराशरसगोत्रसर्वशास्त्रविशारदश्रीमाधवात्मजश्रीरामकृष्णभट्टविरचितायां शास्त्रदीपिकाटीकायां युक्तिस्नेहप्रपूरणायां सिद्धान्तचन्द्रिकायां द्वितीयाध्यायस्य तृतीयः पादस्समाप्तः ॥

**End:**

दूरेणेति । प्रकरणान्तरमुक्तम् इत्युक्तप्रकारेण शब्दान्तरादिभि सहायैः या कीता सापवादो . . . . उत्पत्तिविधानात् साधित इत्यर्थः । उत्तरं प्रस्तौति—अतः परमिति । शेषशेषिविशिष्टभेदनिरूपणाधानत्वादेतदनन्तरं तद्विचारावसर इत्यर्थः ।

चिन्ताजर्जरचित्तोऽहं भेदलक्षणसौरिणा[म्] ।
ग्रस्तः कथञ्चिन्निर्मुक्तो रघुवीरपदस्मृतेः ॥
नानाग्रन्थविलोकनेन भवति ज्ञानं मनीषावता
मायामादरशीलिनां च न पुनर्ग्रन्था मिलन्त्येकतः ।
ग्रन्थेऽस्मिन् सकलार्थसङ्ग्रहवति स्पष्टार्थरूपेऽनखे(घे)
(भू)गोलाभकृदुज्झितार्थनिचयप्रज्ञानहानिप्रदः ॥

**Colophon:**

इति श्रीमत्पराशरसगोत्रसकलशास्त्रविशारदश्रीमाधवात्मजश्रीरामकृष्णभट्टविरचितायां शास्त्रदीपिकाटीकायां युक्तिस्नेहप्रपूरण्यां द्वितीयाध्यायस्य चतुर्थः पादः ॥

R. No. 4171.

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 30. Lines, 20 in a page. Grantha. Good.

Transcribed in 1922-23 from a MS. of M R Ry. Ittiri Vāriyar, Karakattu desam, Kavalappara post, Malabar district.

(*a*) भावचिन्तावली.

BHĀVACINTĀVALĪ

Foll. 1*a*—18*b*.

Similar to the work described under R. No. 271(*b*) ante.

Complete.

**Beginning :**

नत्वा गणेश्वरं वाणीं चित्रभानुं गुरून् ग्रहान् ।
भक्त्या विलिख्यते किंचिद्भावचिन्तावली मया ॥
मूर्ति पदा[व] स्वशरीरं स्वस्थानं स्थितिसुखार्थकीर्तिजयात् ।
वृष्टिसरित्कूपादौ जलोत्तमं चोत्तमाङ्गमपि विद्यात् ॥
(स कु)डुम्बात् भर्तव्यं मुखं च वाग्दक्षिणाक्षि पूर्वार्थान् ।
विद्याद्भुक्तिविशेषान् विद्यामात्मप्रभेदांश्च ॥

* * * *

भावे तदीश्वरे वा बला(न्वि) ते(तैः)स्वग्रहैः स्वपतिना वा ।
यदि सहिते दृष्टे वा भावाना(नां)निर्दिशेव(च परि) पुष्टिम् ॥
अशुभैः शुभैश्च दृष्टे भावर्क्षे भावपेऽथवा बालिनि ।
भावा भवन्ति चपला हीना वा निष्फलाश्चापि ॥
हीनबले भावर्क्षे भावे(शे) चोग्रशत्रुयुतदृष्टे ।
चपला अपि न भवेयुर्भवन्ति चेदाशु नश्यन्ति ॥

* * * *

**Colophon :**

इति मिश्रकाध्यायः प्रथमः ॥

**End :**

नवमे शुभसंयुक्ते सपापेऽस्तेऽष्टमेऽपि वा ।
पतिपुत्रयुता नारी मोदते नात्र संशयः ॥
आर्द्राश्लेषं वारुणं तिष्यमूलं चित्रा ज्येष्ठा कृत्तिका वर्जनीया ।
स्त्रीणां सूतौ भ्रातृपुत्रादिशोकं मृतिं स्वतन्त्रं कलहं च विद्यात् ॥

**Colophon:**

इति पुत्रादिचिन्ताध्यायः तृतीयः पादः ॥
भावचिन्तावली समाप्ता ॥

---

(b) योगाध्यायः.

YŌGĀDHYĀYAḤ

Foll 19a—28b. Foll. 29 and 30 are left blank.

Similar to the work described under No. 13697 of the D.C.S MSS., Vol. XXIV.

Complete

**Beginning:**

प्रणम्य भास्करं भक्त्या स्वल्पमध्यचिरायुषाम् ।
वक्ष्यामि कतिचिद्योगं दैवज्ञहितकाम्यया ॥
कुजक्षेत्रगतो वक्री चतुर्थाष्टमषष्ठगः ।
कुजदृष्टा बलो मन्दा मृत्युदो वत्सरत्रय ॥
क्षीणेन्दुर्लग्ननाथस्य मरणस्थानमाश्रितः ।
शुभैरदृष्टो(दृष्टोऽ)न्यैर्मृत्युदो वत्सरद्वये ॥
अदृष्टे भृगुणा जीवे मन्दारार्केन्दुवीक्षिते ।
मृत्युगे भौमवेश्मस्थो मृत्युदो वत्सरद्वये ॥

* * *

**End:**

केन्द्राष्टमत्रिकोणेभ्यो बहिः पापे बलश्चिरम् ।
सर्वैः(र्वे) पूर्वार्धगे दीर्घमायुर्धत्तेऽधियोगवत् ॥
सर्वापरार्धके दीर्घमायुर्धत्ते न तु श्रियम् ।
यज्ञे तापे स्वररसजायायागेषु मेषेन्दु ॥
ध्याने स्थाने जयस्वरमदनन्तनीलेषु वृषभेन्दुः ।
तनुजनपुरहरनाथे मत्ते मोहे च मिथुनेन्दुः(?) ॥
धनपटुचित्रातुङ्गे कर्किन्दुर्मनिचये(?) ।
भगे हसे गते तु नये कन्यागतश्चन्द्रः ॥
जाने स्थाने घनसुरसङ्गे हंसे गते तुलाचन्द्रः ॥

**Colophon:**

इति योगाध्यायस्समाप्तः ॥

(c) प्रश्नशास्त्रम्.

PRAŚNAŚĀSTRAM.

Foll. 19a—30.

A short treatise on divination.

Incomplete.

**Beginning:**

अस्तु त्रैलोक्यदीपाय भक्ताभिमतदायिने ।
समस्तविद्यानिर्माणकवये रवये नमः ॥
श्रीसूर्यादीन् सुसंवेद्यनिग्रहानुग्रहान् ग्रहान् ।
जगत्सृष्टिस्थितिलयज्ञानहेतू नुपास्महे ॥
अर्केन्द्वारज्ञदेवेड्यशुक्रमन्दान् सराहुकान् ।
सकेतून् कालरूपस्य विष्णोरंशान्नमाम्यहम् ॥

* * *

स्वस्थचित्तो विविक्तस्थस्समभ्यर्च्य गणाधिपम् ।
निजान् गुरून् देवताश्च सूर्यादींश्च नवग्रहान् ॥
कस्य पक्तिरिति ज्ञातुमिदानीं पूर्वकर्मणाम् ।
इहार्जितं च विज्ञातुं कर्मप्रश्नो विधीयते ॥
प्रश्नस्स्यात्प्रत्यहं राज्ञां प्रतिमासं द्विजन्मनाम् ।
मण्डलं प्रति वैश्यानां शूद्राणां प्रतिवत्सरम् ॥

जन्मन्युक्तफलानि—वेदाध्यायी ।

ज्यौतिषफलमादेशः फलार्थमारम्भणं भवति लोके ।
तस्माद्यत्नः कार्यो ह्यादेशे ज्यौतिषज्ञेन ॥

**End:**

रोगमृतिदेषु योगेष्वशुभदशा चेच्च रोगमृत्युकरी ।
शुभदभशाषां? रोगो गुणैश्शमं याति मृत्युमपि जयति ॥
अत्यनिष्टविहगस्य दशायां दुर्बलस्य रिपुनीचगतस्य ।
सूर्यरश्मिविहितस्य वा मृतिर्नो भवेत् बलवतोऽनुगुणस्य ॥ इति ॥

---

R. No. **4172**.

Paper. 10¾ × 9½ inches. Foll. 354. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry. K. V. Paramēśvara Vādyār Nambūdiri, Āchipura, Kottakal post, Malabar district.

निरुक्तभाष्यटीका.

NIRUKTABHĀṢYAṬĪKĀ.

Foll. 1*a*—354. Fol. 354*b* is left blank. Bound in two volumes.

A commentary on the Niruktabhāṣya of Yaska.

Contains the commentary by Mahēśvara on the first Pāda of the first Adhyāya; that by Skandasvāmin on Pādas 3 to 6 of the sixth Adhyāya and 1 to 5 Pādas of the seventh Adhyāya; the commentary of Mahēśvara on the sixth Pāda of the seventh Adhyāya and the eighth Adhyāya, the commentary of Skandasvāmin on Adhyāyas 9 to 11; 12—17 of Mahēśvara.

**Beginning:**

पुरुषस्य प्रवृत्त्यर्थं निवृत्त्यर्थं च प्रत्यक्षादिभिः प्रतिपत्तुमशक्यस्य हित-फलस्याग्निहोत्रादेरहितफलस्य च ब्राह्मणवधादेः प्रतिपादनार्थो वेदः । तस्याङ्गानि षट्—व्याकरणशीक्षाकल्पसूत्राणि छन्दो (ज्यौतिषं) निरुक्तं च । तत्र व्याकरणमर्थविशेषाश्रयेण प्रकृत्यादिविभागेन साधुशब्दानन्वाचक्षाणं शब्दार्थप्रतिपादनेनैव । यथाग्ने प्रकृतौ हि द्विदेवत्येऽग्नीषोमीयपशौ अघ-स्तामित्येतदाम्नातम् । तस्य यदा विकृतावेकदेवत्ये बहुदेवत्ये च व(प)शाव(वू)-हस्तदा यत्तदूह्यते शब्दरूपम्; तदघसदक्षन्नित्येतद्व्याकरणयतरे(रीत्या) प्रकरण-(णे) न शक्यं प्रतिपत्तुम्। एवमन्यत्रापि सर्वत्रोहे प्रवरनामधेयादौ च शब्द-रूपप्रतिपादनेनैव व्याकरणमुपयुज्यते । शीक्षा त्वध्ययनकालेऽपि कर्मणि च मन्त्राणां प्रयोगकाले भू(ध्मा)तादिवर्णदोषादुष्टस्य शब्दस्योच्चारणाप्रतिपादनेनो-पयुज्यते । कल्पसूत्राण्यपि प्रतिशाखं शाखान्तराधीतेन न्यायप्राप्तिरूपेण चाङ्गेनोपेतस्य निजशाखाप्रतिपन्नस्य कर्मणः प्रतिपादनेन, छन्दोविचिति-रपि कर्मणः स्तोत्रादेरङ्गत्वेन श्रुतस्य गायत्रादेः छन्दोरूपप्रतिपादनेन, ज्यौ-तिषमपि दर्शपूर्णमासाद्यङ्गभूतस्य पौर्णमास्यमावास्यादेः कालस्य स्वरूपप्रति-पादनेनोपयुज्यते(न्ते)। निरुक्तं तु मन्त्रार्थप्रतिपादनेनेति । तथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यत इत्यत्र साक्षेपप्रतिसमाधानं वक्ष्यामः । तस्य निरुक्तस्य यः गोमर्जिमे(गौर्ग्मर्ज्मे)त्येवमादयो निघण्टवः। तेषां व्याख्यानार्थं षष्ठ-प्रभृति समाम्नायः समाम्नात इत्यादि भगवतो यास्कस्य भाष्यम् । तस्य पूर्वं टीकाकारैः [व्याख्यास्यामि] भगवद्दुर्गप्रभृतिभिः विस्तरेण व्याख्या-तस्य तद्वचनैकदेशानुच्चित्योच्चित्याल्पक्लेशेनाभ्याससिद्ध्यर्थमभ्यर्च्य ग्रन्थावृत्ति-

लिख्यते । समाम्नायः समित्येकीभावे आङ् आभिमुख्ये । म्ना अभ्यासे एकत्र संभूयैवाध्येतृभिः वेदवदाभिमुख्येनाभ्यस्यमानत्वात् । समाम्नायशब्देनात्र गवादिन(दे)वपत्स्यभृ(त्यन्तः) शब्दसमूह उच्यते । [न वेदं] समाम्नातम्(:)—सम्भूयाभिमुख्येनाभ्यस्य(स्तः) ग्रन्थीकृत्ये(त इ)त्यर्थः । स व्याख्यातव्यः अर्हे कृत्यप्रत्ययः । व्याख्यानार्ह इत्यर्थः ।

**Colophon:**

आचार्यमहेश्वरकृतायां निरुक्तभाष्यटीकायां प्रथमस्याध्यायस्य प्रथमः पादः

अथ निपाताः—

उक्ते नामाख्याते उपसर्गाश्चानन्तरं निपाता वक्ष्यन्ते । उच्चावचेष्वित्यादितः ।

* * * *

**Colophon:**

इति स्कन्दस्वामिकृतायां निरुक्तटीकायां षष्ठस्य तृतीयः पादः ॥

**End:**

पुनरुपन्यासः तस्माच्छन्दस्सु तस्या एतस्य(।) निरुक्तविद्याया निराकाङ्क्षाय(।) ऋचादा(च अ)र्धर्चशेषा उपेक्षितव्याः। अस्माच्चोपदेशात् सर्वत्रोपक्षेपिता एवाथेत्यादिना पारगमनेनाशेषमन्त्रफलं दर्शयति—यां यां देवतामित्यादिना . . . . . षयदेवता तत्तद्भाप्य स पदनुभव फलमिति सिद्धम् (?)॥

निरुक्तमन्त्रभाष्यार्थपूर्ववृत्तिसमुच्चयः ।
महेश्वरेण रचितस्सूनुना पितृशर्मणः ॥

**Colophon:**

इति महेश्वररचिता निरुक्तभाष्यटीका समाप्ता ॥

## R. No. 4173.

Paper. 10¾ × 9¼ inches. Foll. 240. Lines, 20 in a page. Grantha. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūdalūr, Nareri-mana, Tritala.

(*a*) **वासिष्ठसंहिता.**

**VĀSIṢṬHASAṀHITĀ.**

Foll. 1*a*—23*b*. Fol. 24 contains a portion of Muhūrtadīpikā.

Deals with the ceremonies to be performed in relation to a person from conception to marriage.

Contains the following subjects :—

१. निषेकाध्यायः.
२. पुंसवनम्.
३. सीमन्तविधिः.
४. नामकर्मविधिः.
५. निष्क्रमणविधिः.
६. अन्नभोजनाध्यायः.
७. कर्णवेधाध्यायः.
८. क्षौरकर्माध्यायः.
९. उपनयनाध्यायः.
१०. कृषिकर्मविध्यध्यायः.
११. बीजावापनाध्यायः.
१२. आग्रयणविधिः.
१३. स्थापनाविधिः.
१४. विद्यारम्भाध्यायः.
१५. अभिषेकाध्यायः.
१६. विवाहप्रकरणम्.

**Beginning** :

वसिष्ठं वाग्विदांश्रेष्ठं त्रिकालज्ञानमुत्तमम् ।
अभिवाद्य सुखासीनं माण्डव्यः परिपृच्छति ॥
पुत्रहीनस्य सुगतिः नास्तीत्युक्तं त्वया पुरा ।
तस्मान्मुनिवरश्रेष्ठ पुत्रोत्पत्तिः कथं भवेत् ॥
सर्वं ते श्रोतुमिच्छामि . . . . . . ।
. . . . . . . . . . . श्चित्रितयं तथा ॥
मूकान्धबधिरात्यङ्ग(कुणि) कुब्जजडादयः ।
बहुप्रकारा दृश्यन्ते कर्तारतव(तुस्तत्) संभवः कथम् ॥
इत्येवमुक्तो भगवानाह ज्ञानभृतां वरः ।
हन्त ते कथयिष्यामि शास्त्रं परमदुर्लभम् ॥
लोकोपकरणार्थाय शृणु वत्स यथातथम् ।
नास्ति लोके मनुष्य(स्य पुत्रहीनस्य सद्गतिः) ॥
(नास्ति लोके) मनुष्याणामपुत्राणां त्रिविष्टपम् ।
तेषां दानफलं नास्ति नास्त्येव तपसां फलम् ॥
नरकं पूतिमि(पुतीरि)त्याख्यं तस्मिन् पत्त(त)नपालनात् ।
पुत्रेति तेन लोकेऽस्मिन् विश्रुतस्तनयस्तथा ॥
तस्माद्यत्नेन कर्तव्यं पुत्रोत्पादनमुत्तमम् ।
स्त्रीजन्मराशेश्चन्द्रस्तु धनबन्धुसुतेषु च ॥

. . . . . . . . . . . . . लयगो भवेत् ।
तदार . . युक्ते वा आर्तवं स्त्री प्रपद्यते ॥
यथाकाले तथाभूत आधानक्षममार्तवम् ।
न भवश्च(वेच्चा)न्यथा वेत्तुं गर्भाधानक्षमं त्वृतौ ॥
* * * *

**Colophon:**

इति वासिष्ठसंहितायां निषेकाध्यायः प्रथमः ॥

**End:**

महिषाणां भृगोर्वारमंशकादि विवर्जयेत् ।
पशूनां भौमवारं च मन्दवारं तु वाजिनाम् ॥
हस्तिनामर्कवारं च सिंहस्य करणं तथा ।
पशूनां व्याघ्रकरणं दूरतः परिवर्जयेत् ॥
सायाह्ने पूर्वरात्रौ च गोकामो न प्रदीयता:(म्) ।
क्षीरं दधि घृतं तद्वद्भौमवारे तथैव च ॥
इति वासिष्ठहोरायां सत्यं तेन महात्मना ।
उक्तस्यार्थस्य सम्पात्तिः पुनरस्मिन् प्रकीर्तितः(ता) ॥

**Colophon:**

इति वासिष्ठसंहितायां विवाहकरणं नाम पञ्चदशोऽध्यायः ॥

(*b*) ज्यौतिषार्णवः.

JYAUTIṢĀRṆAVAḤ.

Foll. 25*a*—240*a*. Fol 240*b* is left blank.

A treatise on astrology dealing with a variety of subjects

Contains the following Adhyāyas :—

१. आर्तवाध्यायः.
२. आधानगर्भस्वरूपवन्ध्याचिकित्सा.
३. पुंसवनविधिः.
४. सीमन्तविधिः.
५. जातकसद्योमरणनक्षत्रदोषविधिः.
६. नामकरणविधिः.
७ दैवज्ञस्वभावः.
८. निष्क्रमणाविधिः.
९. आराहणावरोहणम्.
१० धान्यार्णवविधिः.
११. आग्रयणविधिः.

१२. अग्न्याधानम्.
१३. अङ्कुरार्पणम्.
१४. अन्नप्राशनम्.
१५. कर्णवेधनम्.
१६. चौलकर्म.
१७. उपनयनम्.
१८. विद्यारम्भः.
१९. व्रतविधिः.
२०. समावर्तनविधिः.
२१. दम्पत्यानुकूल्यविधिः
२२. प्रश्नविधिः.
२३. विवाहनिमित्तानि.
२४. पिण्डप्रकरणम्.
२५. शुभाशुभशकुनम्.
२६. दम्पत्योर्ग्रहनिर्णयः.
२७. कन्यालक्षणम्.
२८ पुरुषलक्षणम्.
२९. विवाहयोग्यकालः.
३०. . . . . . . .
३१. संवेशनविधिः.
३२. वृक्षायुर्वेदः.
३३. बीजावापनम्.
३४. कृषिकर्म.
३५. बीजावापनम्.
३६. राजाभिषेकः.
३७. राजयोगः.
३८. देवस्थापनविधिः.
३९. वास्तुविधिः.
४०. ग्रामविन्यासः.
४१. गृहप्रवेशः.
४२. शङ्कुमानविधिः.
४३. यात्राविधिः.
४४. गोयात्रा.
४५. नौकायात्रा.
४६. वस्त्राभरणविधिः.
४७. तिथिनक्षत्रवारयोगविधिः.
४८. योगशतकम्.
४९. एकांशकयोगविधिः.
५०. ग्रहयोगविधिः.
५१. दोषनिरूपणम्.
५२ to ५९. नवग्रहचारः.
६०. सप्तर्षिचारः.
६१. उल्कालक्षणम्.
६२. दिग्दाहविधिः.
६३. इन्द्रचापविधिः.
६४. गन्धर्वनगरविधिः.
६५. भूकम्पविधिः.
६६. नक्षत्रविधिः.
६७. नक्षत्रराज्यविधिः.
६८. to ७०. नक्षत्रविधिः.
७१. तिथिविधिः.
७२. करणविधिः.
७३. वारविधिः.
७४. ग्रहराज्यविधिः.
७५. माणिक्यवज्रविधिः.

R. NUMBER 4173 6149

**Beginning :**

नारायणं जगन्नाथं केशवं केशिसूदनम् ।
पद्मनाभं हृषीकेशं वन्दे चन्द्रनिभाननम् ॥
देवदेवं महादेवं लोकनाथं जितेन्द्रियम् ।
त्रिलोचनं गुरुं शम्भुं वन्दे कन्दर्पसूदनम् ॥
चतुर्मुखं गुरुं शम्भुं शास्त्रकायं महामतिम् ।
वेदास्यं मन्त्रवर्णाङ्गं वन्दे मेरुगिरिस्थितम् ॥
हस्तिवक्त्रमुमापुत्रं पाशपाणिं महोदरम् ।
लघुकायं महात्मानं वन्दे विघ्नविनायकम् ॥
हिताय सर्वलोकानां ब्राह्मणानां विशेषतः ।
आलोक्य सर्वशास्त्राणि वक्ष्येऽहं ज्यौतिषार्णवम् ॥
आर्तवाधानजन्म च सीमन्तं पुंसवं तथा ।
जन्म च जातकं नामानिष्क्रामणमतः परम् ॥
अन्नाशनं च चौलं च द्विजत्वं ज्ञानमेव च ।
व्रतस्नानं च वैवाह्यमग्निकार्यं श्रियावहम् ॥
दर्शनं क्षेत्रसस्यं च कृषिकर्म म(त)तःपरम् ।
वृष्टिमग्नीन्धनं धान्यं व्याधिं दुर्भिक्षतस्करम् ॥
निमित्तं शाकुनं सर्वदर्शनं नृपदर्शनम् ।
ग्रामारम्भं गृहारम्भं सीमसूत्रविशेषणम् ॥
पार्थं देवविभागं च नक्षत्रं च ततः परम् ।
स्वप्न सुप्तफलं सौख्यं यज्ञकार्यं वनागमम् ॥
इष्टसिद्धिं महावश्यं भक्ष्यभोज्यपराजयम् ।
युद्धप्रयाणवाणिज्यमृणरोगविनाशनम् ॥
दुर्निमित्तनिमित्तं च उत्पातशान्तिमेव च ।
प्रोक्षणं कूपवाप्यादि मण्टपस्थितिमेव च ॥
अभिषेकं विवादं च आयुर्लक्षणमेव च ।
शताभिषेकं प्रतिष्ठा च श्राद्धसंस्कारमेव च ॥
अष्टकायोगसङ्क्षेपमशुभानां समुच्चयम् ।
एवमादीनि कार्याणि वक्ष्येऽहं ज्यौतिषार्णवे ॥

मन्वादिसर्वर्षिमतान् वृत्त्या कापिष्ठलादयः ।
पिण्डीकृत्य समस्तांश्च वक्ष्येऽहं ज्यौतिषार्णवम् ॥
नास्ति लोके मनुष्याणामपुत्राणां त्रिविष्टपम् ।
तेषां दानफलं नास्ति नास्त्येव तपसः फलम् ॥
नरकं पुतिरित्याख्यं तस्मिन् पतनपालनात् ।
पुत्रेति तेन लोकेऽस्मिन् विश्रुतस्तनयस्तथा ॥
तस्माद्यत्नेन कल्पाख्यः(तोऽयं) पुत्रोत्पादनमारभेत् ।

* * * *

**Colophon:**

इति ज्यौतिषार्णवे आर्तवं नाम प्रथमोऽध्यायः ॥

**End:**

इन्दुभुजमणीनां प्रवालं चन्द्रको मरतकादीनां च.
सपुष्यरागोत्तमचम्पकानां . . . जीवो स्फाटिकवज्रकानाम् ।
नीलेन्दुनीलोन्नतवैष्णवानां मन्दो हि नाथस्सह मोदकानाम् ॥
माणिक्यमुक्ताफलसंप्रवालवैडूर्यगोमेधकपुष्यरागाः ।
वज्रेन्द्रनीलो हरिरुत्प्रदिष्टा विद्वज्जनै रत्ननवावलोके ॥

**Colophon:**

इति ज्यौतिषार्णवे माणिक्यवज्रविधिः पञ्चसप्ततितमोऽध्यायः ॥

R. No. **4174.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 79. Lines, 20 in a page. Grantha. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. P. Śrīnivāsa Ayyangār Avargaḷ, Terali, Sattangudi post, Tirumangalam taluk.

(*a*) प्रयोगपारिजातः.

PRAYOGAPĀRIJĀTAḤ.

Foll. 1*a*—45*a*.

On the procedure relating to the performance of funeral rites: by Puruṣōttamabhaṭṭa, son of Dēvarājārya.

Apparently complete.

**Beginning :**

> व्रजेश्वरं विभुं देवं यज्ञानां फलदायिनम् ।
> श्रीभूमिनीलासहितं नौमि सर्वार्थसिद्धये ॥
> पुरुषोत्तमभट्टेन देवराजार्यसूनुना ।
> पैतृमेधानुक्रमोऽयं सुस्पष्टं क्रियतेऽधुना ॥

अथ पैतृमेधप्रसङ्गात् दहनविधिरुच्यते—

आहिताग्नेर्मरणसंशये अग्नी(न्) विहृत्याजस्रान् कुर्यात् । आदहनान्ता-द्व्याधिमोचनाद्वा । यद्यपरपक्षे मरणं शङ्केत तदा यावन्त्योऽपरपक्ष(?) व्यति-शिष्टाः सायंप्रातराहुतयस्तावन्त्यस्तदानीमेव क्रमेण हुत्वा अमा(वा)स्येष्टा (स्ययेष्ट्या) यजेत । केचित्तु पक्षहोमतन्त्रेण होममिच्छन्ति । इष्ट्यसंभवे चतुर्गृहीतान्याज्यानि तस्यै तस्यै प्रधानदेवतायै पुरोऽनुवाक्यामनूच्य याज्यया जुहुयात् । प्रक्रान्तायामिष्ट्यां हविः(प्रक्र)प्त्यसंभवे चतुर्गृहीतैरेवाज्यैर्यजेत । हविष्षु क्लृप्तेषु सत्सु यदि क्रियेत; सर्वेभ्यः प्रधानहविर्भ्यः समवदाय सर्वाः प्रधानदेवताश्चतुर्थीविभक्त्योद्धृत्य स्वाहाकारेण जुहुयात् ।

* * * *

> अनाहिताग्निमप्येवं संस्कुर्यात् गृहवह्निना ।
> त्रेताग्निपात्रसम्बन्धस्तदभावान्निवर्तते ॥

**End :**

पितृमात्रादिपिण्डेष्वेव पिण्डसंयोजनं च भवतीति विशेषो द्रष्टव्य इति सपिण्डीकरणवदेवानुमासिकेष्वाब्दिकादिषु च निमित्तवरणवर्जं प्रयोगो द्रष्टव्य इति विवेकः ॥

> पुरुषोत्तमभट्टेन देवराजार्यसूनुना ।
> प्रयोगपारिजातोऽयं कृत उत्तरकर्मस ॥

(*b*) पितृमेधप्रयोगः.

PITṚMĒDHAPRAYŌGAḤ.

Foll. 15*b*—70*b*.

Similar to the work described under No. 3681 of the D.C.S. MSS., Vol. VII.

Complete.

**Beginning:**

प्रयाणकाले पुत्रः पाणिपादौ प्रक्षाल्याचम्यास्यां पुण्यतिथौ गोत्रस्य शर्मणः पितुः प्राणवायोस्सुखोत्क्रमणसिद्ध्यर्थमुत्क्रान्तिगोदानं करिष्ये इति सङ्कल्प्य, प्रतिग्रहपूजां कृत्वा ।

दानमन्त्रः—

अत्युत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये ।
तुभ्यं संप्रददे धेनुमिमामुत्क्रान्तिसंज्ञिकाम् ॥

**End:**

आ मा वाजस्य प्रसवा जगम्यादिमे द्यावापृथिवी विश्वशम्भु (म्भू) । आ मा गन्तां पितरं मातरं युवा वाचा(मा) सेमो अमृतत्वाय गम्यादिति आचारमनुव्रज्य, देवर्षिपितृतर्पणं कृत्वा, वस्त्रपीडनं कृत्वा, आत्मसमारोपणं कृत्वा, ग्रासावरार्ध्यं प्राश्नीयात् ॥

(c) पितृमेधसूत्रम्.

PITṚMĒDHASŪTRAM.

Foll 71*a*—79*a*. Fol 79*b* is left blank.

Original Sūtras attributed to Gautama, dealing with the performance of funeral rites for the Sāmavēdins.

Contains the Paṭalas one and two complete.

**Beginning:**

प्रयाणकाले प्राक् स्मृतिवियोगात् पितरं मातरं भ्रातरं गुरुमन्यं वा सुहृदं ब्राह्मणं तत्स्वर्गार्थेन निमित्तेनेमानि छन्दांसि संस्कर्ता श्रावयेत् । वेदादिवेदान्तानि त्रीण्याज्यदोहानि आदिकूपत्नस्य रेतसो द्वयन्तमस उन्नया मीति श्रुतपूर्वाणां च तवश्यावीयाणि सामानि मरणकाले अभिप्रन्नाप्सुदक्षास्सेतुषाम च दक्षिणे कर्णे जपत्युत्क्रान्ते प्रजापतेर्हृदयं मनसा ध्यायेत, ऊर्ध्वं स्नापयित्वा, शवं देशजातिकुलधर्मेणापचितिमलङ्कारेणालङ्कृत्य बध्वा देशना(दशया)ङ्गुष्ठौ पादयोः पाण्योश्चौदुम्बर्यामासन्द्यां दक्षिणाशिरसमुत्तानं संवेश्योदग्दशेनाङ्ग(ग)तेन वाससा प्रच्छादयति ।

* * * *

**Colophon:**

इति पितृमेधसूत्रे प्रथमः पटलः ॥

**End:**

सार्वस्वारिकं परिगाणं स एष यज्ञायुधीयं यजमान(ः) स्वर्गं लोकमेतीति ब्राह्मणं भवतीत्याहुतिं जुहोति । पुत्रो भ्राता वा यो वा यज्ञियो वा

ब्राह्मणस्तस्मात् त्वमसि जातोऽसि त्वदयं जायतां पुनरसौ स्वर्गाय लोकाय स्वाहेति शान्तिर्वै वामदेव्यं शान्तिर्वै वामदेव्यम् ॥

**Colophon :**

इति गौतममुनिना कृतपितृमेधसूत्रे द्वितीयः पटलस्समाप्तः ॥

R. No. **4175.**

Paper 10¾ × 9¼ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of the India Office Library, London.

प्रासादमण्डनम्.

PRĀSĀDAMANḌANAM.

Foll. 1a—25a. Foll 25b—26 are left blank.

A treatise laying down rules for the construction of temples, mansions, storied buildings, and towers connected therewith. The work is attributed to Maṇḍanasūtradhara.

Deals with the following subjects :—

१. मिश्रकलक्षण.
२. प्रासादजगती.
३. सूर्यायतन.
४. गणेशायतन
५. विष्ण्वायतन.
६. चण्डिकायतन.
७. शिवायतन.
८. पीठलक्षण.
९. मण्डोवरलक्षणभेद.
१०. गर्भगृहप्रमाणादि.
११. उदुम्बरार्धचन्द्रनागरादिलक्षण.
१२. प्रासादद्वारलक्षण.
१३. त्रिशालादिशालालक्षण.
१४. प्रासादोर्ध्वलक्षण.
१५. ध्वजलक्षण.
१६. केसर्यादिप्रासादभेद.
१७. नवमेरुलक्षण.
१८. द्वादशमण्टपलक्षण.
१९. देवपुरराजपुरलक्षण.
२०. मठलक्षण.
२१. स्थावरप्रतिष्ठा.
२२. सूत्रधारपूजा.
२३. प्रतिष्ठाविधि.
२४. जिनप्रतिष्ठा.
२५. वास्तुपुरुषविन्यास.

Complete in eight Adhyāyas.

Date of transcription—Tuesday, the 15th day of the lunar month Māgha in the Śaka year 1868. Name of the scribe—Rājārāma-pāṭhaka.

**Beginning:**

विश्वकर्मोवाच तस्मै निर्विघ्नं सिद्धिहेतवे ।
आदिगौरी समाभूता तेजसस्सम्भवाय वै ॥
महामायेति या गीता चिन्मयी मुनिसत्तमैः ।
करोति(तु) वाग्विलासं मे जिह्वायां सा सरस्वती ॥
शास्त्रेषु सूत्रधारस्य प्रसादाद्विश्वकर्मणः ।
प्रासादमण्डनं ब्रूते सूत्रधारेषु मण्डनम् ॥

* * *

ईशानादग्निकोणाद्वा शिला स्थाप्या प्रदक्षिणा ।
मध्ये कूर्मशिला पश्चाद्गीतवादित्रमङ्गलैः ॥
बलिदानं च नैवेद्यं विविधान्नं घृताक्षुतम् ।
देवताभ्यस्सुधीर्दद्यात् कूर्मन्यासे शिलासु च ॥

पीठस्य निर्गमो बाह्ये तथैव छाद्यकस्य च ।
त्रिपञ्चसप्तनवभिः फालनाभिर्विभाजयेत् ॥
प्रासादा अङ्गसंस्था वा वारिमार्गान्तरास्थिताः ।
फलानाकर्णमूलास्याद्भद्रं बुद्धिगणं मतम् ॥
सामान्योऽयं विधिस्तुल्यो हस्ताङ्गुलविनिर्गमः ॥

**Colophon:**

इति श्रीसूत्रधारमण्डनविरचिते प्रासादमण्डने वास्तुशास्त्रे मिश्रकलक्षणं (नाम) प्रथमोऽध्यायः ॥

**End:**

दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः[द] शेषयक्ष्मा च रोगो जानुनि संस्थितः ॥
नागो मुख्यश्च भल्लाटस्सोमो गिरश्च बाहुगाः(?) ।
अदितिः स्कन्धदेशे च वामे कर्णे दितिः स्थिता ॥

*   *   *   *

दिवि क्रूरान् यमादींश्च मासान्तैस्सुरयाभिधैः ।
अपरान् घृतपक्वान्नैस्सर्वान् स्वर्णसुगन्धिभिः ॥

इति वास्तुपुरुषविन्यासः ॥

एकेन शास्त्रेण गुणाधिकेन विना द्वितीयेन पदार्थसिद्धिः ।
तस्मात् प्रकारान्तरतो विलोक्य मणिर्गुणाढ्योऽपि सहायकाङ्क्षी ॥
सा विश्वकर्मगणनाथमहेशचण्डी श्रीविश्वरूपजगदीश्वरसूत्रदेवः ।
प्रासादमण्डनमिदं रुचिरं चकार श्रीमण्डनो गुणवतां भुवि सूत्रधारः ॥

**Colophon:**

इति श्रीसूत्रधारमण्डनविरचिते प्रासादमण्डने वास्तुशास्त्रे अष्टमोऽध्यायः॥

---

R. No. **4176.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry. Nārāyana Nambūdirippād, Puliyanūr-mana, Tiruppanittura post, Cochin State.

नयविवेकदीपिका.

NAYAVIVEKADĪPIKĀ.

Same work as that described under R No 1552 ante By Varadarāja, son of Raṅganātha of Ātrēyagōtra and disciple of Sudarśanacarya.

Contains the first Pāda of the sixth Adhyāya almost complete

**Beginning:**

सितपद्मासनासीनामिन्दुकान्तोपमां शुभाम् ।
सर्वविघ्नोपशान्त्यर्थं वन्दे वागीश्वरीमहम् ॥

चतुर्भुजं पुस्तकवित्तिमुद्रे रथाङ्गशङ्खौ च सदा दधानम् ।
श्रिया च मह्या च सहोपविष्टं नुमस्तुरङ्गाननमिन्दुवर्णम् ॥

नत्वा सुदर्शनमहं वरदः करोमि
तां दीपिकां नयविवेकविबोधनाय ।
यामन्तरेण कुनिबन्धमहान्धकार-
दुर्गे नियोज्य विषये चरितुं न शक्यम् ॥

"द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः" ॥

नन्वत्राध्यायान्तरवद्भाष्ये हेतुत्वेन किमिति वृत्तं न कीर्तितम् । हेतुत्वस्य स्फुटत्वादिति चेन्न, सिद्धेरन्यत्राप्यकीर्तनापत्तेश्चेत्यत्राह—अत्रेति । कथमहेतुतेत्यत्राह—हेतुतेति । वर्तिष्यमाणस्य विशिष्टन्यायप्रतिपादकग्रन्थसन्दर्भरूपस्याध्यायस्यैव स्वार्थं प्रति साक्षाद्धेतुता नान्यस्य वृत्ताध्यायार्थस्येति न तत्कीर्तितम् । नन्वेवमन्यत्रापि वृत्तस्य कीर्तनं न स्यादित्यत्राह—तदिति । सत्यमध्यायस्यैव स्वार्थं प्रति साक्षाद्धेतुत्वं तथापि तत्प्रतिपादने जिज्ञासोत्पत्तिद्वारानुग्राहकतया वृत्तस्यापि हेतुतेति युक्तमन्यत्र तत्कीर्तनमित्यर्थः ।

**End:**

अत्रेति। युक्तं रथकारे रूढेर्योगात् बलवत्तया त्रैवर्णिकेतरजातिपरत्वम्। इह तु जात्यन्तरेऽपि योगाद्वृत्तिः त्रैवर्णिकेऽपीति स्वतो विद्याग्निमत्तया त्रैवर्णिकपरतैव युक्तेति तत्रैवाधिकारोपसंहृतेः सङ्गतिद्वयमित्यर्थः। ननु षष्ठीसमासपक्षे षष्ठ्यर्थलक्षणकर्मधारये तु स एव युक्त इति कथं पूर्व.

---

R. No. **4177.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 156. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry. Dēvulapalli Rāmakrsnabrahma Śāstrigāru, Repalli, Guntur district.

Foll 24*a* and 156*b* are left blank.

आश्वलायनगृह्यसूत्रव्याख्या—आनन्दचन्द्रिका.

ĀŚVALĀYANAGṚHYASŪTRAVYĀKHYĀ : ĀNANDACANDRIKĀ.

A commentary on the Āśvalāyanagṛhyasūtras described under R. No. 1871(*a*) ante : by Ānandarāya, who mentions the prior commentator Dēvasvāmin.

Breaks off in some places; otherwise complete.

**Beginning:**

. . . . शाखिनममन्दकृपारसार्द्रं
मन्दाकिनीजलपरिष्कृतमौलिभागम् ।

(तं नौ)मि साम्बमनिशं शरणं महेशम् ॥

स्वकीये पादाब्जे बुधगणनुते भक्तिमव(च)ञा-
मनन्यामुत्पाद्यान्तरतिमिरविच्छेदजननीम् ।
प्रणम्र(म्रं)प्रह्लादं तनि(द्वि)तुमुदितश्रीविलसितो
नृसिंहस्वामी मे हृदि वसतु नित्यं गुरुवरः ॥

निषीदन्त्या नित्यं मनसि भगवत्या निरवधि-
दयाभूमात्यर्थं मुखरयति मामज्ञमपि यत् ।
स्तुतिर्वा निन्दा वा तदिह विषये मे न भवतो
जयश्रीरन्या वा न खलु भरभ्येति जगति ॥

आनन्दराययज्वेन्दुरक्षरस्वरसानुगाम् ।
आश्वलायनसूत्रस्य वृत्तिं वितनुते सुधीः ॥

. . . परायणमानम्य तातं राधां च मातरम् ।
क्रियते कृतिरानन्दचन्द्रिका विदुषां मुदे ॥

देवस्वामिपुरोगमैर्विरचिता वृत्तिः स्फुटार्था पुरा
स्वीकुर्वन्ति समन्ततो जगति तां सर्व(र्वे बु)धाप्य(द्य)त्र तु ।
योऽर्थो भाति पदाक्षरस्वरसतस्सूत्राकराशब्दितोऽ-
प्याचार्यस्य स एव सम्मत इति व्यङ्क्तुं प्रवर्तामहे ॥

* * * *

उक्तानि वैतानिकानि । गृह्याणि वक्ष्यामः । निरूपितानि त्रेताग्निसाध्यानि कर्माणि, गृह्याणि गृहसाध्यानि, गृहशब्दश्शालाभार्योभयवचनः, तन्निमित्तोऽग्निर्गृह्यः, तत्र कर्तव्यानि कर्माणि गृह्याणि, तानि वक्ष्यामः वदिष्याम इत्यर्थः । एतच्च अथैतस्य समाम्नायस्येत्यादि, द्वादशाध्याय्या सह वक्ष्यमाणगृह्यसूत्रस्य चैकशास्त्रत्वसिद्ध्यर्थम् । तेन तत्रत्यानां केषांचिद्धर्माणामत्रापि प्राप्तिस्सिध्यति । अन्यथा द्वादशाध्यायसमाप्तौ "नमः परमऋषिभ्यो नमः परमऋषिभ्यः" इत्याचार्यैः ऋषिनमस्कारात्मकमङ्गलाचरणावगमात्तदन्तमेकं शास्त्रं, वक्ष्यमाणं चान्यदिति शास्त्र(द्वैविध्यं) स्यात् । गृह्याणीत्ये(तत्तु) त्रिन्यायेन लाक्षणिकं तथा च केषांचिदग्न्यसाध्यत्वेऽपि न विरोधः ।

* * * *

एवं ब्रह्मयज्ञेऽपि प्रश्नस्याध्ययनाशक्तावेकामप्यृचं यजुः साम वाधीयीत ।

यत्स्वाध्यायमधीयीतैकामप्यृचं यजुस्साम वा तद्ब्रह्मयज्ञस्सन्तिष्ठत इति श्रुतेः । अन्यान्यप्यथर्वाङ्गिरसब्राह्मणकल्पादीनि च यथाशक्त्येकं परां(दम्) एकं वाक्यं वा अध्येतव्यानि, अयं चानुकल्पः देवयज्ञादिष्वेव भवति । तेषामेव समनन्तराम्नानात् । न पार्वणस्थालीपाकादौ, विप्रकर्षात् । अत एव न हुतान्तरेषु । तत्र तु यन्मुख्यं गौणं वा सूत्रोक्तं द्रव्यं तेनैव करणम् ॥

**Colophon:**

इति प्रथमः खण्ड. ॥

**End:**

एवं च अथेतस्य समाम्नायस्येत्यारभ्य एतदन्तमेकं शास्त्रमित्युक्तं भवति । "उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः" इति प्रतिज्ञा च । नमः परमऋषिभ्य इति नमस्कारात्मकमङ्गलस्य शास्त्रसमाप्त्यर्थत्वशङ्काव्युदासेन एकशास्त्रत्वदृढीकरणद्वारा वैतानिकोक्तानां धर्माणामत्र प्राप्त्यर्थेत्युक्तमधस्तात् । क्वचिन्मध्यमियान्मध्यमियान्नमश्शौनकाय नमश्शौनकायेत्युभयत्र वी . . . मध्यमियादिति . . . . . . . नमश्शौनकाय . . . . . . नमस्कारात्मकं मङ्गल इ(मि)ति ॥

**Colophon:**

इति श्रीमदानन्दरायवाजपेययाजिकृतायामाश्वलायनगृह्यसूत्रव्याख्यायामानन्दचन्द्रिकायां दशमः खण्डः ॥

## R. No 4178.

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of Central Library, Baroda.

रामचरितम्.

RĀMACARITAM.

Foll. 21*b* and 22 are left blank.

Abhinanda composed a Mahākāvya on the life of Rāma and called it Rāmacarita Bhīmakavi wrote Sargas 37—40 apparently as a supplement to the Rāmacarita of Abhinanda. In this connexion it has to be pointed out that Abhinanda also wrote Sargas 37—40 and a complete copy of his work in 40 Sargas is available in this Library. vide R. No 3632 ante.

Contains the Sargas 37—40 of Bhīmakavi.

**Beginning:**

तत्राथ तं हनुमता निहतं निकुम्भं
वीक्ष्य प्लवङ्गपतयो जयघोषणाभिः ।
उद्यत्प्रमोदरससंभृतमानसास्ते
व्यालोलकुण्डलितवालधयो ववल्गुः ॥
तेषां स कोऽपि रणमूर्धनि वानराणां
तर्द्वीषु(?)रुद्धतजयध्वनिरुच्चचार ।
श्रोत्राध्वना दशमुखस्य मनः प्रविश्य
शोकेन यस्सपदि सङ्क्रमयांबभूव ॥
पुत्रेषु बन्धुषु सुहृत्सु सुहृज्जनेषु
भृत्येषु तेषु न तथा युधि निष्ठितेषु ।
विश्वत्रयस्य जयिनस्स यथानुजस्य
प्रीत्या शुशोच किल कुम्भनिकुम्भनाथे ॥

* * *

पौलस्त्यस्य त्रिभुवनरिपोर्मुख्यरक्षःप्रवीरे
नीते नाशं दशरथभुवा तत्र पुत्रे खरस्य ।
अङ्गैरुद्यद्बहुलपुलकैः पद्मनालायमानैः
वीरध्यानं किमपि कपयः प्रीतिभाजो ववल्गुः ॥

**Colophon:**

इत्यभिनन्दकृतौ रामचरिते महाकाव्ये भीमकृतौ सप्तत्रिंशस्सर्गस्समाप्तः ॥

**End:**

नीतं विजित्य धनदं दशकन्धरेण
हत्वा परं रघुपतिः स्वयमग्रहीष्यत् ।
संशुद्धया हुतभुजि प्रियया विमानं
तच्चानुजेन सह पुष्पकमारुरोह ॥
प्रह्वं प्रहित्य सरथं दिवि शक्रदूतं
सार्धं ससैन्यकपिराजविभीषणाभ्याम् ।
सिद्धाङ्गनाभिरभिगीतजयाव(प)दानो
देवो जगाम नगरीं निजराजधानीम् ॥

रामस्यासीद्वसिष्ठप्रमुखमुनिवरैरेत्य सम्यक् प्रणीतः
सुग्रीवादिष्टहृष्टप्लवगशतसमानीततीर्थोदकेन ॥
मूर्छन्माङ्गल्यतूर्यध्वनिमिलितमनोहारिगेयप्रपञ्च
स्फीतो राज्याभिषेकस्त्रिभुवनजनतानन्दकृत्सुन्दरेऽह्नि ॥

**Colophon:**

इति [श्री]अभिनन्दमहाकाव्ये कायस्थजातिकुलतिलकेन महाश्रीदेवपाल- तनयेन महाश्रीभीमेन कृता सर्गचतुष्टयी चत्वारिंशत्तमः समाप्तेति ।

चत्वारिंशत्तमस्सर्गः समाप्तः ॥

---

R. No. **4179.**

Paper $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 298. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of Mahāmahōpādhyāya Nārāyana Nambūdirippād Avargal, Kunnankulam, Cochin State

Fol. 297*b* contains the name of the owner of the original MS Fol. 298 is left blank.

## सरस्वतीकण्ठाभरणव्याख्या—हृदयहारिणी.

## SARASVATĪKANṬHĀBHARAṆAVYĀKHYA: HṚDAYA- HĀRIṆĪ.

A commentary on Bhōjadēva's Sarasvatīkaṇṭhābharaṇa, which work has been described under R No. 3279 ante: by Dandanātha Nārāyaṇa-bhaṭṭa.

Contains the Adhyāyas one to three complete and breaks off in the fourth Adhyāya

**Beginning:**

. . . मकारमितं करोति प्रत्याहारार्थम् । तस्योच्चारणं चतुर्भिः "चयःशश्छोऽमि" इत्यकारेण, शावयम इति यकारेण, "यरो ञमि ञम् वा" इति ञकारेण, "ङमो ह्रस्वादच(ङ्घे)" इति ङकारेण । 'झभञ्' झभः इति वर्णानुपदिश्य पूर्वाश्रान्ते ञकारमितं करोति . . . प्रत्याहारार्थम्, तस्योच्चारणमेकेन, "अत आद्यञि" इति यकारेण । "घढधष्" घढध इति वर्णानुपदिश्य पूर्वोपान्ते षकारमितं करोति प्रत्याहारार्थं तस्योच्चारणं भवति द्वाभ्यां

सू—सिद्धिः क्रियादेर्लोकात् ।

क्रियागुणद्रव्यजातिकालादीनां लोकतो वैयाकरणसमयविदः सिद्धिरवगन्तव्या । ते यथावसरमुदाहरिष्यन्ते ।

सू—भूवादिः क्रियावचनो धातुः ।

कारकाणां प्रवृत्तिविशेषः क्रिया, तद्वाचिनः भू इत्येवमादयः धातुसंज्ञा भवन्ति, भवति, एधते । भूवादिग्रहणं किम्? आणवेयि इत्यादौ मा भूत् । क्रियावचन इति किम्? क्रियावाचिनो धातुसंज्ञा भवन्ति . . . . जवना . . . . स्कभ्नाति ॥

* * * *

सू—लिङाशिषि ।

आशिषि यो लिङ् तदादेशास्तिङ आर्धधातुकसंज्ञा एव भवन्ति । भविषीष्ट, एधिषीष्ट । आशिषीति किम्? स्यात्, पुनीयात् ।

**Colophon:**

इति श्रीदण्डनाथनारायणभट्टविरचितायां सरस्वतीकण्ठाभरणस्य वृत्तौ हृदयहारिण्यां प्रथमस्याध्यायस्य प्रथम. पादः ॥

* * * *

सू—अव्ययं प्रवृद्धादिभिः ॥

अव्ययं प्रवृद्धादिभिः सुबन्तैस्सह समस्यते । तत्पुरुषश्च समासो भवति । पुनः प्रवृद्धं बर्हिः, पुनरुक्तं वचः, स्वर्गीतः, अन्तर्भूतः, श्वःश्रेयसम्, श्वोवसीयसम ।

**Colophon:**

इति श्रीदण्डनाथनारायणभट्टविरचितायां सरस्वतीकण्ठाभरणवृत्तौ हृदयहारिण्यां द्वि(तृ)तीयस्याध्यायस्य द्वितीयः पादः ॥

* * * *

सू—खलतिकादिषु वचनम् ।

खलतिकादिषु तद्धितस्य लुपि सति प्रकृतेरिव वचनमेव भवति, न व्यक्तिः । खलतिको नाम पर्वतः, तस्यादूरभवानि वनानि खलतिः, वरणादेश्चेत्यणो लुप् । तत्र खलतिकस्यैकत्वादेकवचनं विधीयते । लिङ्गं पुनर्वचनसम्बन्ध्येव भवति, आदिग्रहणाद्यथादर्शनमन्यत्रापि लुपि कृते वचनमवगन्तव्यमिति ॥

**Colophon:**

इति श्रीदण्डनाथनारायणभट्टविरचितायां सरस्वतीकण्ठाभरणवृत्तौ हृदयहारिण्यां तृतीयस्याध्यायस्य तृतीयः पादः ॥

**End:**

सू—बहूज्गुरूपान्तानार्ष[ग्रे] गोत्राणिञोरन्त्यस्य ष्यङ्। बह्वचौ गुरूपान्तावनार्षगोत्रविहिताणिञन्तौ यौ तयोरन्त्यस्य स्त्रियां ष्यङादेशो भवति। करीषगन्धोऽप ॥

R. No. **4180.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 2091. Lines, 20 in a page. Grantha. Good.

Transcribed in 1922-23 from a MS. of the Raja of Ettiyapuram, Ettiyapuram post, Tinnevelly district.

Bound in four volumes and each volume contains two parts.

Foll. 522 and 2090 are left blank Fol. 1015*b* contains the name of the owner of the original manuscript.

## शुक्रनाडी.

## ŚUKRANĀḌĪ.

Same work as that described under Nos. 13902 and 13903 of the D.C.S. MSS., Vol. XXIV. An index of the Lagnas together with the Aṁśas treated in this MS. is given below with the corresponding folio noted against each :—

| Vol. I. | Foll. | Vol. I. | Foll. |
|---|---|---|---|
| कुबेरांशम्, तुलालग्नम् ... | 1 | वसुधांशम्, कुम्भलग्नम् ... | 60*a* |
| वागीशांशम्, कुम्भलग्नम् ... | 12*a* | पङ्कजांशम्, धनुर्लग्नम् ... | 69*b* |
| सुमनांशम्, मिथुनलग्नम् ... | 18*a* | श्रीजीविन्यंशम्, Do. ... | 74*a* |
| पारिजातांशम्, सिंहलग्नम् ... | 26*a* | श्रीधरांशम्, Do. ... | 75*b* |
| सुप्रभांशम्, धनुर्लग्नम् ... | 30*b* | किन्नरांशम्, मिथुनलग्नम् ... | 80*b* |
| कोमलांशम्, सिंहलग्नम् ... | 39*a* | पङ्कजांशम्, वृषभलग्नम् ... | 86*b* |
| त्रैलोक्यांशम्, मीनलग्नम् ... | 46*a* | शिवदांशम्, कन्यालग्नम् ... | 103*b* |
| ब्राह्मचंशम्, वृषभलग्नम् ... | 52*a* | सुप्रभांशम्, तुलालग्नम् ... | 112*b* |
| शारदांशम्, मीनलग्नम् ... | 55*b* | सुखदांशम्, Do. ... | 117*b* |

R. NUMBER 4180



| Vol. I. | Foll. |
|---|---|
| शरभांशम्, कटकलग्नम् ... | 125a |
| कमलांशम्, वृश्चिकलग्नम् .. | 131b |
| वसुधांशम्, धनुर्लग्नम् .. | 143a |
| मञ्जुलांशम्, वृषभलग्नम् ... | 152b |
| मायांशम्, Do. | 154b |
| सुप्रभांशम्, वृश्चिकलग्नम् ... | 162a |
| नन्दांशम्, कटकलग्नम् | 167b |
| कमलांशम्, कुम्भलग्नम् ... | 171b |
| कुमारांशम्, मिथुनलग्नम् ... | 176b |
| ब्राह्मचंशम्, कटकलग्नम् ... | 186a |
| कुमुदांशम्, तुलालग्नम् . | 198b |
| वसुधांशम्, Do. ... | 203b |
| कमलांशम्, सिंहलग्नम् ... | 208a |
| शारदांशम्, मिथुनलग्नम् ... | 216b |
| लक्ष्मीशांशम्, कटकलग्नम्... | 22[illegible]a |
| त्रैलोक्यांशम्, कुम्भलग्नम् ... | 232b |
| कमलांशम्, सिंहलग्नम् ... | 242b |
| वैष्णवांशम्, तुलालग्नम् ... | 258b |
| किन्नरांशम्, Do. ... | 273b |
| पङ्कजांशम्, सिंहलग्नम् ... | 277b |
| सुधांशम्, मिथुनलग्नम् ... | 287a |
| पङ्कजांशम्, मेषलग्नम् ... | 295a |
| कुसुमांशम्, Do. ... | 300b |
| किन्नरांशम्, मीनलग्नम् ... | 306b |
| लक्ष्मीशांशम्, धनुर्लग्नम् . | 310b |
| सुप्रभांशम्, कुम्भलग्नम् .. | 317b |
| Do. मीनलग्नम् ... | 324a |
| लक्ष्मीशांशम् तुलालग्नम् ... | 331a |
| वसुधांशम्, कन्यालग्नम् ... | 347b |
| Do. तुलालग्नम् ... | 355b |
| सुप्रभांशम्, Do. .. | 358b |
| कुसुमांशम्, मिथुनलग्नम् ... | 374b |
| सुमनांशम्, कन्यालग्नम् .. | 383b |
| श्रीधरांशम्, तुलालग्नम् ... | 392a |
| पङ्कजांशम्, मेषलग्नम् ... | 403b |
| कुमारांशम्, Do. ... | 415a |
| शारदांशम्, कन्यालग्नम् ... | 431b |
| सुप्रभांशम्, वृश्चिकलग्नम् ... | 451b |
| Do. धनुर्लग्नम् ... | 463b |
| कुमुदांशम्, Do ... | 475b |
| देवलोकांशम्, सिंहलग्नम् .. | 480a |
| परंज्योत्यंशम्, कुम्भलग्नम् . | 484a |
| सुप्रभांशम्, मिथुनलग्नम् .. | 505b |
| मङ्गलांशम्, मीनलग्नम् ... | 512b |

| Vol. II. | |
|---|---|
| शोभनांशम्, .. | 1a |
| धनदांशम्, मिथुनलग्नम् . | 4a |
| Do. वृषभलग्नम् . | 13a |
| धनञ्जयांशम्, मीनलग्नम् . | 22a |
| श्रीधरांशम्, मिथुनलग्नम् . | 29b |
| मायांशम्, तुलालग्नम् . | 54b |
| पारिजातांशम्, धनुर्लग्नम् . | 60b |
| मालिन्यंशम्, कुम्भलग्नम् .. | 68a |
| सुप्रभांशम्, Do. . | 77b |
| लक्ष्मीशांशम्, कटकलग्नम्... | 85a |

| | Vol. II. Foll. |
|---|---|
| लक्ष्मीशांशम्, सिंहलग्नम् ... | 91b |
| पङ्कजांशम्, कन्यालग्नम् ... | 97a |
| शारदांशम्, वृषभलग्नम् ... | 104b |
| सुप्रभांशम्, मीनलग्नम् ... | 112a |
| लक्ष्मीशांशम्, धनुर्लग्नम् ... | 116a |
| शिवदांशम्, कन्यालग्नम् ... | 120b |
| कोमलांशम्, कटकलग्नम् ... | 125b |
| शिवदांशम्, मिथुनलग्नम् ... | 129a |
| लक्ष्मीशांशम्, कटकलग्नम् .. | 132a |
| कुटिलांशम्, तुलालग्नम् ... | 135b |
| ब्राह्मचंशम्, Do. ... | 141b |
| कमलांशम्, मेषलग्नम् ... | 117b |
| वैष्णवांशम्, कुम्भलग्नम् ... | 153b |
| सोदरांशम्, सिंहलग्नम् ... | 158b |
| कुमुदांशम्, तुलालग्नम् .. | 162b |
| मङ्गलांशम्, धनुर्लग्नम् .. | 171a |
| शारदांशम्, मकरलग्नम् ... | 186a |
| कुसुमांशम्, तुलालग्नम् ... | 195a |
| शिवदांशम्, कन्यालग्नम् . | 201b |
| सुमनांशम्, मकरलग्नम् .. | 230b |
| शिवङ्कर्यंशम्, Do. ... | 236b |
| शोभनांशम्, Do. ... | 248b |
| कोमलांशम्, कटकलग्नम् ... | 257b |
| सुमनांशम्, मकरलग्नम् ... | 260a |
| सर्वाङ्गसुन्दरांशम्, वृश्चिकलग्नम्. | 262a |
| सुप्रभांशम्, वृषभलग्नम् ... | 267a |
| त्रैलोक्यांशम्, धनुर्लग्नम् ... | 271a |
| त्रैलोक्यांशम्, कुम्भलग्नम् ... | 277a |
| कमलांशम्, मेषलग्नम् ... | 283a |
| पुष्करांशम्, कन्यालग्नम् ... | 287b |
| सुधांशम्, मेषलग्नम् ... | 317a |
| मायांशम्, मीनलग्नम् ... | 321b |
| कमलांशम्, कुम्भलग्नम् ... | 323b |
| गिरिजांशम्, वृश्चिकलग्नम्... | 328b |
| कुमुदांशम्, वृषभलग्नम् ... | 335a |
| पारिजातांशम्, मिथुनलग्नम्.. | 340a |
| दिगम्बरांशम्, धनुर्लग्नम् ... | 345a |
| पङ्कजांशम्, मकरलग्नम् ... | 348b |
| सुखदांशम्, सिंहलग्नम् .. | 352a |
| शारदांशम्, धनुर्लग्नम् ... | 357a |
| कूर्मांशम्, मिथुनलग्नम् ... | 366a |
| ध्रुवांशम्, सिंहलग्नम् ... | 370b |
| सुप्रभांशम्, मिथुनलग्नम् ... | 380b |
| भद्रांशम्, मकरलग्नम् ... | 392b |
| सुधांशम्, कन्यालग्नम् ... | 402a |
| विक्रमांशम्, सिंहलग्नम् .. | 420b |
| सुमनांशम्, कुम्भलग्नम् ... | 427b |
| सुप्रभांशम्, सिंहलग्नम् ... | 433a |
| सुमत्यंशम्, Do. ... | 440a |
| वसुधांशम्, वृषभलग्नम् ... | 446b |
| सुप्रभांशम्, कन्यालग्नम् ... | 452a |
| वसुधांशम्, वृषभलग्नम् ... | 454b |
| कलुषांशम्, कन्यालग्नम् ... | 456a |
| शुभांशम्, मिथुनलग्नम् ... | 469b |
| कुसुमांशम्, सिंहलग्नम् ... | 474b |

| Vol. III. | | Foll. |
|---|---|---|
| लक्ष्मीशांशम्, | सिंहलग्नम् .. | 1a |
| पङ्कजांशम्, | मीनलग्नम् ... | 6b |
| सुमनांशम्, | वृषभलग्नम् ... | 14b |
| पुष्करांशम्, | मिथुनलग्नम् ... | 20a |
| चिरजीविन्यंशम्, | वृश्चिकलग्नम् | 43a |
| मङ्गलांशम्, | धनुर्लग्नम् ... | 60b |
| धनञ्जयांशम्, | कुम्भलग्नम् .. | 65b |
| कुमारांशम्, | तुलालग्नम् ... | 75a |
| सुधांशम्, | मीनलग्नम् ... | 91b |
| मायांशम्, | वृषभलग्नम् ... | 99a |
| वसुधांशम्, | मीनलग्नम् ... | 105a |
| शारदांशम्, | मेषलग्नम् ... | 113b |
| पुष्करांशम्, | मकरलग्नम् ... | 122b |
| कुमुदांशम्, | मेषलग्नम् ... | 132a |
| Do. | वृश्चिकलग्नम् . | 138b |
| सुधाकरांशम्, | कटकलग्नम् ... | 148b |
| कुमुदांशम्, | वृश्चिकलग्नम् | 156b |
| मधुरांशम्, | धनुर्लग्नम् ... | 168a |
| कुमुदांशम्, | मेषलग्नम् ... | 175a |
| कुसुमांशम्, | वृषभलग्नम् ... | 181a |
| करालांशम्, | वृश्चिकलग्नम् .. | 190b |
| समांशम्, | मिथुनलग्नम् ... | 196a |
| पङ्कजांशम्, | तुलालग्नम् .. | 204a |
| चम्पकांशम्, | कन्यालग्नम् . | 210b |
| सुप्रभांशम्, | सिंहलग्नम् . | 215b |
| धनदांशम्, | Do. ... | 247b |
| पङ्कजांशम्, | कुम्भलग्नम् ... | 259b |
| मायांशम्, | Do ... | 268b |

| Vol. III. | | Foll. |
|---|---|---|
| मालिन्यंशम्, | मकरलग्नम् ... | 277b |
| कलुषांशम्, | कन्यालग्नम् ... | 283a |
| सुप्रभांशम्, | मिथुनलग्नम् ... | 297b |
| Do. | सिंहलग्नम् ... | 302b |
| सुमत्यंशम्, | Do. ... | 311a |
| वसुधांशम्, | वृषभलग्नम् ... | 318b |
| कमलाकरांशम्, | धनुर्लग्नम् ... | 327a |
| पङ्कजांशम्, | मकरलग्नम् . | 332a |
| कमलांशम्, | Do ... | 340b |
| पारिजातांशम्, | Do. ... | 352a |
| चिरजीव्यंशम्, | धनुर्लग्नम् ... | 357b |
| लक्ष्मीशांशम्, | मकरलग्नम् ... | 381b |
| सोमवल्ल्यंशम्. | वृश्चिकलग्नम्. | 404a |
| कुङ्कुमांशम्, | Do. . | 424b |
| कुमुदांशम्, | कुम्भलग्नम् ... | 429a |
| विभवांशम्, | कटकलग्नम् ... | 438a |
| कमलांशम्, | वृषभलग्नम् ... | 440a |
| मञ्जुलांशम्, | कटकलग्नम् ... | 449a |
| वागीशांशम्, | सिंहलग्नम् ... | 454b |
| मञ्जुलांशम्, | वृषभलग्नम् ... | 463a |
| हेरम्बांशम्, | कटकलग्नम् ... | 469b |
| धनदांशम्, | मकरलग्नम् ... | 486a |
| कमलांशम्, | तुलालग्नम् ... | 493a |
| Do. | मिथुनलग्नम् ... | 501b |
| Vol. IV. | | |
| विक्रमांशम्, | कन्यालग्नम् ... | 1a |
| त्रैलोक्यांशम्, | मकरलग्नम् ... | 8a |
| कुमुदांशम्, | कन्यालग्नम् ... | 26b |

| Vol IV. | Foll. |
|---|---|
| कमलांशम्, कन्यालग्नम् ... | 39*a* |
| सुन्दरांशम्, धनुर्लग्नम् ... | 49*a* |
| पारिजातांशम्, कटकलग्नम् ... | 55*b* |
| शाङ्कर्यंशम्, कन्यालग्नम् ... | 63*a* |
| लक्ष्मीशांशम्, तुलालग्नम् ... | 70*b* |
| कोमलांशम्, मकरलग्नम् ... | 98*b* |
| सुप्रभांशम्, मिथुनलग्नम् | 102*a* |
| मञ्जुलांशम्, तुलालग्नम् ... | 114*b* |
| शारदांशम्, कन्यालग्नम् ... | 124*a* |
| रमांशम्, वृश्चिकलग्नम् ... | 133*b* |
| सुप्रभांशम्, धनुर्लग्नम् ... | 139*b* |
| वसुधांशम्, कुम्भलग्नम् ... | 146*a* |
| धनदांशम्, वृश्चिकलग्नम् ... | 153*a* |
| शुभांशम्, कटकलग्नम् ... | 166*b* |
| धनदांशम्, Do. ... | 173*a* |
| लक्ष्मीशांशम्, मिथुनलग्नम् .. | 186*a* |
| चम्पकांशम्, Do. ... | 189*a* |
| जगत्यंशम्, मीनलग्नम् ... | 193*a* |
| सुप्रभांशम्, मेषलग्नम् ... | 207*b* |
| सुन्दरांशम्, मकरलग्नम् ... | 217*a* |
| सोदरांशम्, मीनलग्नम् ... | 226*a* |
| धनञ्जयांशम्, कटकलग्नम् ... | 230*a* |
| शुभांशम्, तुलालग्नम् ... | 240*b* |
| Do. वृषभलग्नम् ... | 243*b* |
| पङ्कजांशम्, मेषलग्नम् ... | 246*b* |
| वनितांशम्, तुलालग्नम् ... | 253*a* |
| पङ्कजांशम्, मेषलग्नम् ... | 258*b* |
| कमलांशम्, Do. ... | 268*b* |
| सुप्रभांशम्, कुम्भलग्नम् ... | 272*b* |
| धनदांशम्, वृश्चिकलग्नम् ... | 274*b* |
| Do. सिंहलग्नम् ... | 280*b* |
| लक्ष्मीशांशम्, कन्यालग्नम् ... | 294*a* |
| श्रीधरांशम्, Do ... | 296*b* |
| वसुधांशम्, वृषभलग्नम् ... | 313*a* |
| सुप्रभांशम्, Do. ... | 324*b* |
| कुसुमांशम्, Do. . | 333*a* |
| श्रीधरांशम्, मकरलग्नम् ... | 347*b* |
| त्रैलोक्यांशम्, कन्यालग्नम् ... | 367*a* |
| मोहनांशम्, मकरलग्नम् ... | 368*a* |
| वसुधांशम्, सिंहलग्नम् ... | 395*b* |
| Do. कटकलग्नम् ... | 408*a* |
| पारावतांशम्, धनुर्लग्नम् ... | 411*b* |
| पङ्कजांशम्, मकरलग्नम् ... | 421*a* |
| लक्ष्मीशांशम्, कटकलग्नम् ... | 448*b* |
| सुमनांशम्, मिथुनलग्नम् ... | 457*a* |
| लक्ष्मीशांशम्, वृश्चिकलग्नम्... | 461*a* |
| सुमनांशम्, कटकलग्नम् . | 464*a* |
| कमलांशम्, मेषलग्नम् ... | 479*a* |
| सुमनांशम्, सिंहलग्नम् ... | 482*a* |
| मुकुन्दांशम्, मेषलग्नम् ... | 485*a* |
| कमलांशम्, Do. ... | 489*a* |
| धनदांशम्, कटकलग्नम् ... | 502*a* |
| सुप्रभांशम्, कन्यालग्नम् ... | 509*a* |
| सौम्यांशम्, सिंहलग्नम् ... | 517*b* |
| सुप्रभांशम्, वृश्चिकलग्नम् ... | 523*b* |
| कुमारांशम्, धनुर्लग्नम् ... | 532*a* |

| Vol. IV | Foll. | Vol. IV. | Foll. |
|---|---|---|---|
| शरभांशम्, कुम्भलग्नम् ... | 544a | पङ्कजांशम्, . . . . ... | 551a |
| सुमनांशम्, कटकलग्नम् ... | 549a | कमलांशम्, कन्यालग्नम् ... | 561b |

## R. No. 4181.

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 160. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. K C Valiyarāja of Kottakkal, Malabar district.

पद्यवृत्तिः.

PADYAVRTTIH.

Foll. 1a—158b. Foll. 159—160 are left blank.

A metrical exposition of Pāṇini's Vyākaraṇa-Sūtras.

Wants the beginning of the first Pāda of the first Adhyāya and end of the third Pāda of the fourth Adhyāya.

**Beginning:**

. . . . . . . . . . . . . . |
(सा कुमारि)तरा कन्या स्यात् कुमारितमा परा ॥
बहुगणवतुडति सङ्ख्या ॥
शब्दो बहुगु(ग)णेत्येतौ सङ्ख्यार्थौ प्रत्ययो वतुः ।
डतिश्च सङ्ख्यासंज्ञास्ते बहुधा गणक . . ॥
. . . . . . . . . . तिथा कतिकस्तथा ।
पूरणप्रत्ययान्तस्तु योऽर्धपूर्वपदान्वितः ॥
सङ्ख्यासंज्ञोऽत्र वक्तव्यस्सोऽर्धपञ्चमकं यथा ॥
ष्णान्ता षट् ॥
ष्णा(षा)न्ता ना(णा)न्ताश्च(श्च) सङ्ख्य(ाः) . . . . . . . सप्त च ।
अतो(न्तो)क्तेरुपदेशे या ष्णान्ता संख्येन(ति) सोदिता ॥

* * * *

**Colophon:**

इति पद्यवृत्तौ प्रथमस्य प्रथमः पादः ॥

**Colophon:**

**End:**

इति पद्यवृत्तौ चतुर्थस्याध्यायस्य द्वितीयः पादः ॥
युष्मदस्मदोरन्यतरस्यां खञ् ।

* * * *

अभिनिष्क्रामतिद्वारम् ।
अभिनिष्क्रामतीत्यर्थे प्रत्ययस्स्याद्यथाविधि ।
द्वारं चेदभिनिष्क्रान्तद्वारं स्रौघ्नं च राष्ट्रियम् ॥
करणस्यापि कर्तृत्वं द्वारस्यच्छेदनेऽसिवत् ।
अधिकृत्य कृते ग्रन्थे ॥
अधिकृत्य कृते ग्रन्थे प्रत्ययस्स्याद्यथाविधि ॥

---

R. No. 4182.

Paper. 10¾ × 9¾ inches. Foll. 62. Lines, 20 in a page. Dēvanāgarī and Grantha. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. (Nārāyaṇa) Kṛṣṇa Nambūdiri Vaidikan, Tekkattu-mana, Kumaranallur post, Malabar district.

(*a*) प्रायश्चित्तप्रकरणम्.

PRĀYAŚCITTAPRAKARAṆAM.

Foll. 1*a*—56*b*.

On the ceremonies to be performed for expiating the sin due to the commission of certain wrongful acts: by Bhavadēva.

Incomplete.

**Beginning:**

अनादिभवसङ्कू(म्भू)तपापप्रशमकारणम् ।
स्मरणं वासुदेवस्य यस्य तस्मै नमो नमः ॥
मन्वादिस्मृतिमालोच्य सुविविच्य यथाक्रमम् ।
क्रियते भवदेवेन प्रायश्चित्तनिरूपणम् ॥

प्रायश्चित्ते निरूपणीये गुरुत्वात् पञ्चमहापातकप्रायश्चित्तनिरूपणपुरस्सर एवेतरप्रायश्चित्तनिरूपणे कर्तव्ये मन्वादिक्रमानुरोधेन प्रथमं ब्रह्मवधनिरूपणं क्रियते—तथा च मनुः ।

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुस्संसर्गश्चापि तैस्सह ॥

तथा च विश्वामित्रासितस्वयम्भुवः—

ब्राह्मणो नैव हन्तव्यः सुरा पेया न च द्विजैः ।
ब्राह्मण(णै)स्वर्णहरणं न कर्तव्यं कथञ्चन ॥

गुरुपत्नीं न गच्छेच्च संसर्गं तैश्च वर्जयेत् ।
महापातकसंज्ञा च निर्दिष्टैषा मनीषिभिः ॥
* * *
तेन सप्तविधो हन्ता कामाश्चतुर्विधा इति ।

**Colophon :**

इति वधस्वरूपनिरूपणम् ॥

इदानीं प्रायश्चित्तं निरूप्यते---प्रायश्चित्तं च यत्र विशेषेण शृङ्ग-ग्राहिकया न श्रूयते तत्र सर्वत्र ब्रह्मवधादिषु---

जातिशक्तिवयोऽपेक्षं सकृद्बुद्धिगतं तथा ।
अनुबन्धादि विज्ञाय प्रायश्चित्तं प्रकल्पयेत् ॥

**End :**

ब्राह्मणक्षत्रियविशां भार्याश्शूद्रेण सन्नताः ।
अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतराः ॥ इति ॥

तेन गर्भोत्पादे स्त्रीपुरुषयोः प्रायश्चित्तद्वैगुण्यम्, तत्रापि ब्रह्मवधोक्त-न्यायेन सकृदभ्यासात्यन्ताभ्यासेष्वपि क(तिपय)पापोत्पत्तावपि तन्त्रेणैव प्रायश्चित्तानुष्ठानमल्पपापान्तरेष्वप्रसङ्ग एवेति ॥
* * * *
ब्राह्मण्याः पूर्वोक्तमेवैवं राजन्यां वैश्यो गत्वा शूद्रश्च राजन्यवैश्ये इति ॥ यत्तु शं . . . . . .

---

(b) तप्तमुद्राधारणप्रमाणवचनानि.

TAPTAMUDRĀDHĀRAṆAPRAMĀṆAVACANĀNI.

Foll. 57*a*—59*a*. Foll. 58*b*—60 are left blank.

Similar to the work described under R. No. 1034(*b*) ante.

Incomplete

**Beginning :**

निर्णयसिन्धौ---अत्रैव तप्तमुद्राधारणमुक्तम् ।

रामार्चनचन्द्रिकायाम्---भविष्ये

शयन्यां चैव बोधिन्यां चक्रतीर्थे तथैव च ।
शङ्खचक्रविधानेन अग्निपूतो भवेन्नरः ॥ इति ।

अतप्ततनूर्न तदामो अश्नुते इति ऋग्वेदात् स होवाच याज्ञवल्क्यः तस्मात्पुमानात्महिताय हरिं भजेत् । सुश्लोकमौलेर्धर्मिणां दधत इति । शातातपेऽथ श्रुतेः ।

**End:**

वेदभ्रष्टान् समुद्दिश्य कमलापतिरुक्तवान् ।
येनास्य पितरो याता येन याताः पितामहाः ॥
तेन यायात् सतां मार्गमन्यथा पतितो भवेत् ।
शिखां सूत्रं च पुण्ड्रं च समयाचारमेव च ॥
पूर्वैराचरितं कुर्यादन्यथा पतितो भवेत् ॥

R. No. **4183.**

Paper $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 80. Lines, 20 in a page. Dēvanāgarī. **Good.**

Transcribed in 1922-23 from a MS. of M.R.Ry. Vāsudēvasōmayājippād, Chirumukku-mana.

## कौषीतकश्रौतसूत्रम्.

## KAUṢĪTAKAŚRAUTASŪTRAM.

Sūtras dealing with the procedure connected with the performance of Śrauta sacrifices in accordance with the Kausītaka school.

This is also called Sankhyāyanaśrautasūtra—vide No. 1036 of the D.C.S. MSS., Vol. II

Contains up to the end of 18th Adhyāya in the 13th Khaṇḍa

**Beginning:**

(यज्ञं)व्याख्यास्यामः । (स)त्रयाणां वर्णानां ब्राह्मणक्षत्रियवैश्यस्य चासंयुज्य विधीयमानं साधारणं संयोगात् व्यवतिष्ठते । यज्ञोपवीती देवकर्माणि करोति । प्राचीनावीती पित्र्याणि । आचमनप्रभृति येनाधिकरणेन संयुज्येत न तेन व्यावर्तेत । न च व्यवेयादित्यावृताल्लक्षणोद्देश उत्तरत उपचारः । प्राङ्न्यायानि देवकर्माणि दक्षिणान्यायानि पित्राण्यासीन-न्याय्यं(यं) बाहृच्यम् । वचनात् स्थानं होता च कुर्यादनादिष्टन्ति(त्रि)प्रभृतिष्व-र्ग(प्वृग्ग)णेषु प्रथमोत्तमयोस्त्रिर्वचनमन्यत्र जपेभ्यः उत्तमस्य च छन्दोमानस्य चोर्ध्वमादिव्यञ्जनात् स्थान ओकारः प्लुतस्त्रिमात्रश्शुद्धः । मकारान्तो वाव-साने तु मकारान्तस्तं प्रणव इत्याचक्षते ।

* * * *

**Colophon:**

इति कौषीतकश्रौतसूत्रे प्रथमोऽध्यायः ॥

* * * *

इति कौषीतकश्रौतसूत्रे चतुर्दशखण्डे द्वितीयोऽध्यायः ॥

इति श्रौतसूत्रे अष्टादशखण्डे तृतीयोऽध्यायः ॥

इति कौषीतकश्रौतसूत्रे चतुर्दशखण्डे चतुर्थोऽध्यायः ॥

इति कौषीतकश्रौतसूत्रे षोडशखण्डे पञ्चमोऽध्यायः ॥

इति श्रीकौषीतकश्रौतसूत्रे चतुर्दशखण्डे षष्ठोऽध्यायः ॥

इति कौषीतकश्रौतसूत्रे अष्टादशखण्डे सप्तमोऽध्यायः ॥

इति कौषीतकश्रौतसूत्रे अष्टमोऽध्यायः

इति कौषीतकश्रौतसूत्रे सप्तदशखण्डे नवमोऽध्यायः ॥

इति कौषीतकश्रौतसूत्रे एकविंशतिखण्डे दशमोऽध्यायः ॥

इति कौषीतकश्रौतसूत्रे एकादशखण्डे एकादशोऽध्यायः ॥

त्रिंशत्कौ(इति कौ)षीतकसूत्रे द्वादशोऽध्यायः ॥

इति कौषीतकश्रौतसूत्रे विंशतिखण्डे त्रयोदशोऽध्यायः

इति कौषीतकसूत्रे चतुर्दशोऽध्यायः ॥

इति कौषीतकश्रौतसूत्रे पञ्चदशखण्डे पञ्चदशोऽध्यायः ॥

इति कौषीतकश्रौतसूत्रे षोडशाध्याये द्वादशखण्डः ॥

इति कौषीतकश्रौतसूत्रे द्वादशखण्डे सप्तदशोऽध्यायः ॥

**End:**

वैश्वानरश्च विश्वजिद्वा। तं पौण्डरीकं इत्याचक्षते। अयुतं दक्षिणाश्च सहस्रमेकादशमेक उक्तो द्वादशाहस्त एते पुरस्तादग्निष्टोमा उपरिष्टादतिरात्र।

उत्तरोत्तरिण एकोत्तरा अहीनाः । उत्तरोत्तरिणीमेव तच्छ्रियं विराजमन्नाद्यमाप्नोति । य एवं वेद । य एवं वेद ॥

**Colophon:**

इति कौषीतकश्रौतसूत्रे त्रयोदशखण्डे अष्टादशोऽध्यायः ॥

R. No. **4184.**

Paper. 10¾ × 9¾ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS. of M.R Ry. Śaṅkara Mūssu, Planthol, Vilayur post, Pattambi

**सदाचारवृत्तिवर्तनम्.**

SADĀCĀRAVṚTTIVARTANAM.

Foll. 1*a*—53*b*. Fol 54 is left blank.

A work on moral philosophy dealing with the following subjects:—

१. आत्मस्वरूपकथनम्.
२. अनात्मनिरसनम्.
३. नानात्मभावप्रतिषेधैकात्मयोगकथनम्.
४. प्रत्यक्षात्मप्रबोधकथनम्.
५. असन्निरसनम्.
६. जीवप्रबोधकथनम्.
७. असत्प्रसङ्गकथनम्.
८. अभावनिरूपणम्.
९. नित्यसत्यप्रतिपादनम्.
१०. अष्टाङ्गहृदयनामनिर्वचनम्.
११. सत्स्तोत्रप्रतिपादनम्.
१२. अमर्त्यविधानम्.
१३. जीवन्मुक्तानुभवकथनम्.
१४. नित्यशरीरप्रतिपादनम्.
१५. अनर्थपरिहारः.
१६. आत्मप्रकाशनम्.
१७. वैद्यस्वरूपप्रशंसा.

By Āryaśarman, son of Nārāyaṇa and grandson of Āryaśarman of Planthol house, which is situated near the banks of the river Bālā in the Kerala country.

**Beginning:**

वन्देऽहं गोपतिं वाणीं गणेशं च षडाननम् ।
एतेषां योगशक्तिं च पञ्चभूतप्रकाशिनीम् ॥
पितामहमुखास्सन्तस्सच्चिदानन्दनिर्वृताः ।
सदाचारविधानार्थं सन्तु मे हृदयङ्गमाः ॥

श्रीमन्नारायणपरं जगदेतच्चराचरम् ।
विवेकनयनेनैव पश्यामि सदनुग्रहात् ॥
भावाभावेषु मात्सर्यं मुक्त्वा ये स्वस्थतां गताः ।
सन्तस्ते गुरवस्सन्तु भवतां(व्यार्थे) जन्मजन्मनि ॥
स्वधर्मानिरतास्सन्तः सर्वलोकहितैषिणः ।
प्राणाचार्याः प्रणामाय सन्तु मे जन्मजन्मनि ॥
विद्यार्थं व्यसनं व्यर्थ विद्यामयशरीरिणाम् ।
अन्योन्यभाषणाच्छब्दस्त्वर्थमापद्यते सुखम् ॥

* * * *

काणादं पाणिनीयं च मीमांसं(सां) द्वैतखण्डनम् ।
वेदान्तं योगसाङ्ख्यादीनालोक्य (हि) कृतन्त्विदम् ॥
यत्किञ्चित्स्वयमुत्पाद्य भुक्त्वा तन्मलतां गतम् ।
परित्यजति तद् ज्ञात्वा वक्ष्ये ग्राह्यं सुनिश्चित ॥
कर्तुं तदन्यथा कर्तुमकर्तुं शक्तिमान् जनः ।
प्रभुरेव जनस्तस्मात्साक्षात्कारो महेश्वरः ॥

* * * *

श्रीकेरलाख्यविषये भवति स्रवन्ती
बालाभिधा विमलशीतपयःप्रवाहा ।
स्वलोकवारवनितानयनाभिराम-
मीनावलीनटनमङ्गलरङ्गदेशा ॥

अस्ति तत्तीरनिकटे पनसान्दोलिकाख्यया ।
वैद्यवेश्मार्यशर्मेति विश्रुतस्तद्गृहेश्वरः ॥
तस्य पुत्रोऽतितेजस्वी नारायण इति श्रुतः ।
नामार्थमेव कुर्वाणः परेच्छावृत्तिवर्तनः ॥
धर्मार्यार्थं च कामं च कुर्वाणो लौकिकं स्मरन् ।
नारायणमहादेवौ माया यस्य हृदाश्रिताः ॥
तस्य सीमन्तपुत्रोऽहं सर्वज्ञो वैद्यसत्तमः ।
सन्मार्गदर्शी च सुखी दुःखमार्गबहिष्कृतः ॥
पितामहशिखायां तु आत्मपुच्छेन मेलितः ।
नाम्ना पितामहस्साक्षान्मातामहमनुव्रतः ॥

मातामहो मे मधुसूदनप्रियो नारायणेत्युच्चतरं ब्रुवाणः ।
संसारदुःखानि न विन्दतेऽसौ त्रसन्ति यन्नामरवेण रोगाः ॥

तस्य पुत्रादधीतोऽहं वैद्यशास्त्रसमुच्चयम् ।
पितुराज्ञां पुरस्कृत्य ब्रह्मचर्यव्रते स्थितः ॥
धन्वन्तरिभिषग्रुद्रौ पारम्पर्येण पूजितौ ।
आश्चर्यकलिका चैव मद्गृहे परदेवता ॥
तेषामनुग्रहाच्चैव सतां शुश्रूषणेन च ।
सर्वभूतेषु मैत्र्या च वैद्यं मां ब्रुवते जनाः ॥
नास्ति वैद्याभिमानं(नो) मे लोकवेदानुसारतः ।
वक्ष्ये वैद्यमतस्सम्यक् सत्यं कर्तुं जनोक्तयः ॥
पितामहपितात्माहं सुबद्धो बद्धवानपि ।
प्रपितामहपुत्राभ्यां वर्तयामीह संज्ञया ॥
पञ्चवेदात्परं प्राप्य वेदातीतपदानुगः ।
वेदमार्गं समालोक्य सुखमात्रोऽस्मि निर्वृतः ॥

* * * *

**Colophon:**

इति प्रथमोऽध्यायः ॥

**End:**

सोऽहम्भावविनिर्मुक्तो हंसमार्गात्परङ्गतः ।
सत्सेवकस्य वैद्यस्य गतिर्भवति चोत्तमा ॥
अदृष्टभावं विक्षिप्य सद्भावेनावृतं जगत् ।
सद्भावं जीवभावं स्यादार्यस्तस्माद्विमोचितः ॥
अदृष्टं परमात्मत्वं हंसास्तत्र चरन्ति हि ।
वैद्यस्तु तत्परं याति विनतासम्भवास्पदम् ॥
वैद्यः परमहंसानां मार्गादुपरि वर्तते ।
सदाचारप्रवृत्तश्चेदन्यथान्धं तमो व्रजेत् ॥
यथार्थनामार्यशर्मा सदाचारप्रकाशनात् ।
याथार्थ्याद्वैद्यसंज्ञायाः उत्तमं पदमाविशत् ॥

सप्तावरणमुद्दिश्य अनिवृत्तं पदं गतः ।
अफलाकाङ्क्षिणां मार्गं वैद्योऽयं याति कर्मिणाम् ॥

**Colophon:**

इत्यार्यशर्मरचितसदाचारवृत्तिवर्तने अज्ञानप्रकरणे षोडशोऽध्यायः ॥

R. No **4185.**

Paper 10¾ × 9¼ inches. Foll. 138. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry. Gōvindarajaguru, Padmapuraśāsanam, Berhampur taluk, Ganjam district

पदार्थधर्मसङ्ग्रहव्याख्या—भाष्यभावप्रकाशः.

PADĀRTHADHARMASAṄGRAHAVYĀKHYĀ: BHĀṢYA-BHĀVAPRAKĀŚAḤ

Foll. 1*a*—138*a*. Fol. 138*b* is left blank

A commentary on Praśastapāda's Bhāṣya on the Vaiśēṣika-sūtras, otherwise known as Padārthadharmasaṅgraha, which work has been described under R. No. 1553 ante: by Gōpīnātha, son of Jagannātha.

Complete

**Beginning:**

क्षीराम्भो
मध्येतोयं विकचवदनाम्भोजमाविर्भवन्तम् ।
औत्सुक्येन श्लथितमथनव्यापृतेः शार्ङ्गपाणेः
लीलापाङ्गस्फुरितमामितं मङ्गलं नस्तनोतु ॥
यद्बुद्धिवैशद्यमपेतमोहं शास्त्रेषु तत्त्वं विषयीकरोति ।
नारायणो यः परया स्वभक्त्या तं तातमड्यं प्रणमामि नित्यम् ॥
दीक्षिताशेषशास्त्र . . . . . . . . . . ।
भाष्यभावप्रकाशोऽयं गोपीनाथेन तन्यते ॥

चिकीर्षितग्रन्थस्याव्यवहितपूर्वकाले नियमतः क्रियमाणस्येष्टसाधनतांशे भ्रमशून्य(?)नामविगीताचारविषयत्वेनानुमितेष्टसाधनताकस्य मङ्गलस्य परि-शेषानुमानात् समाप्तिफलकत्वस्य . . . . . . परापरगुरुनमस्काररूपस्य शिष्यशिक्षायै निबन्धनं कुर्वन्नेव प्रयोजनाभिधेये दर्शयति । प्रणम्येति—तुं जन्यमात्रं प्रतिषिद्धनिमित्तकारणताकमीश्वरं नित्यं सर्वविषयकज्ञा . .

(श्रद्धाति)शयपूर्वकं नत्वा अत ईश्वरप्रणामादनु पश्चात्कणादं कणादनामानं मुनिं प्रणम्य मया पदार्थधर्मसङ्ग्रहः पदार्थधर्मसङ्ग्रहनामा भाष्यग्रन्थः प्रवक्ष्यते . . . रणादि विषयीकरिष्यत इति योजना ।

नन्वाचार्येण प्रारिप्सितग्रन्थस्याविघ्नसमाप्त्यर्थं मङ्गलाचरणं कृतम् । तदुक्तम्—अन्वयव्यतिरेकव्यभिचारेण मङ्गलनिष्ठकारणत्वस्य समाप्तिनिरूपितान्वयव्यतिरेकगम्यत्वाभावात् ।

*

पदार्थ इति । नन्वत्र कः समासः पदार्थानां धर्मा इति षष्ठीसमास इति चे . . . न भेदषष्ठ्या अप्राप्तेः कुतस्तत्समाससंभावना ।

**End:**

स्वतन्त्रास्तु अदृष्टविशेषोपग्रहादनारब्धद्रव्या वायुपरमाणवस्तदीयत्रसरेणवो वा मनांसि । तेषां तत्त्वेनैव सुखादिकं प्रति करणत्वम् । अनन्तानामतिरिक्तानां धर्मिणामतिरिक्तायाश्च जातेः कल्पनामपेक्ष्य क्लृप्तेष्वेव सुखादिकरणत्वकल्पनाया लघुत्वात् । तस्य च वायवीयत्वेऽपि त्वक्त्व(ा)भावान्न स्पर्शग्राहकत्वं, त्वक्त्वस्यैव स्पर्शग्रहे प्रयोजकत्वादित्याहुः । इतिशब्दो द्रव्यपदार्थसमाप्त्यर्थः ।

यस्साक्षात्कुरुते समाधिषु सदा नारायणाख्यं महो
यद्व्याख्याविशदीकृतं विजयते तज्जैमिनीयं मतम् ।
यस्सोमाध्वरदीक्षितो विभुजगन्नाथः समुज्जृम्भते
प्राशस्त्यं व्यवृणोदमुष्य तनयो भाष्यं कृति[ः] प्रीतये ॥
प्रशस्तभाष्यभावार्थप्रकाशोऽयं मया कृतः ।
अनेकतमसि ध्वस्ते सञ्चरन्तु सुखं बुधाः ॥

**Colophon:**

इति श्रीगोपीनाथमिश्रविरचितो भाष्यभावप्रकाशः समाप्तः ॥

---

R. No. **4186.**

Paper. 10¾ × 9¾ inches. Foli 193. Lines, 20 in a page Dēvanāgari Good.

Transcribed in 1922–23 from a MS. of M R Ry. N. Subrahmaṇya Śāstri, Head Pandit, Sanskrit School, Tirukkurungudi.

## लघुवार्त्तिकटीका—लघुन्यायसुधा.

## LAGHUVĀRTTIKAṬĪKĀ : LAGHUNYĀYASUDHĀ.

Foll 1*a*—192*b*. Fol. 193 is left blank

This manuscript comprises a metrical text called Laghu-varttika, which miniatures Kumarila's Varttika, and a prose commentary called Laghunyāyasudhā which miniatures Bhaṭṭasōmēśvara's Nyaya-sudha Both the text and commentary are presumably by Uttamaslōkatirtha referred to in the concluding verses at the end of the 12th chapter

Complete.

**Beginning :**

नत्वा विश्वेश्वरं गौरीं गणपं बिन्दुमाधवम् ।
लघुवार्त्तिकटीकेयं सङ्क्षेपेण वितन्यते ॥

अथातो धर्मजिज्ञासा धर्मोऽर्थो विधिचोदितः ।
तत्प्रामाण्यं परीक्ष्यं स्यात् नाक्षाद्यैस्तत्प्रमीयते ॥

इदं धर्ममीमांसाशास्त्रं नारम्भणीयम् । अनुग्राह्य(हक)प्रमाणशून्यत्वात् । प्रत्यक्षानुमानादेर्वक्ष्यमाणविधया धर्मे अप्रमाणत्वात् । न च स्वाध्यायोऽध्येतव्य इत्यध्ययनविध्यधीनग्रहणो वेद एव तादृग्मानमिति युक्तम् । तद्विधेरदृष्टार्थतया स्वर्गफलत्वात् । न च दृष्टेऽर्थविरोधेऽपूर्वविधिरसंभवति । नियमविधेरप्यवघातविधेस्तण्डुलस्वरूप इवार्थविबोधे मानान्तरविरोधात् । अध्ययनमन्तरेणापि तद्दर्शनात् । न च क्रत्वपवोद्देशेन नियमः, अर्थानैरेव वेदैरवगतानि कर्माणि स्वफलं ददतीति युक्तम् । क्रत्वर्थत्वादध्ययनस्य । अनारभ्याधीतत्वात् श्रुत्याद्यभावाच्च । तस्माददृष्टार्थमेव स्वाध्यायाध्ययनमित्यध्ययनमात्रेणैव शास्त्रार्थसमाप्ते गुरुकुलात् समावर्तितव्यमिति चेत्—

अथातो धर्मजिज्ञासा ।

नियमविधिरेवायम् । योऽयमग्निहोत्रादिष्वधीतवेदानां त्रैवर्णिकानामेवाधिकारो नानधीतवेदानां शूद्राणामित्यधिकारनियमः सप्रयोजनमध्ययनविधेः । तथाहि—असत्यध्ययनविधावग्निहोत्रादिशास्त्राणि विद्वांसमलभमानानि अविद्वांसमेवाधिकृत्य विध्य[म]न्तरेणानुष्ठानासंभवाद्विधा(धि)माक्षिपन्ति । सन्त्यविशेषाच्चतुरो वर्णानधिकुर्युः । सति त्वध्ययनविधौ त्रैवर्णिकानामेव विदुषामधिकारो न तु तुर्यादेः ।

**Colophon :**

इति लघुवार्त्तिकटीकायां लघुन्यायसुधाख्यायां प्रथमाध्यायस्य प्रथमः पादः समाप्तः ॥

**End :**

कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ॥ इति ।

क्षत्रियस्य याजकत्वनिराकरणात् क्रतुवैगुण्यमेव दर्शितम् । ज(अ)याज-(कस्या)याज्यस्य विनश्यन्ति यथा हविरिति हविर्नाशेन क्रतुवैगुण्यमेव दर्शयति । लिङ्गानि च ब्राह्मणानामिदं हविरित्यादीनि तत्र नो(नत्रो)पलभ्यते-(न्ते) । तस्मात् ब्राह्मणानामेवार्त्विज्यम् ।

जैमिनीयन्यायपुष्पमालेयं परमेश्वर ।
त्वत्पादपद्मभूषास्तु ऋजुना मा पथा नय ॥
विश्वेश्वरप्रेरितेन श्रितविश्वेशमूर्तिना ।
उत्तमश्लोकतीर्थेन तत्प्रीत्यै ग्रथितं स्फुटम् ॥

**Colophon :**

इति लघुवार्त्तिकटीकायां लघुन्यायसुधायां द्वादशस्याध्यायस्य चतुर्थः पादः॥ समाप्तश्चाध्यायः ॥

R. No. **4187.**

Paper 10⅜ × 9⅜ inches Foll. 38. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1922–23 from a MS of M R Ry Jakkupalli Jaggayvaguru, Kambhampadu, Rentachintala post, Palanad taluk

योगसारागमः.

YŌGASĀRĀGAMAḤ.

Foll 1a—32b.

Describes how to attain certain supernatural powers by taking certain medicines duly prepared with the aid of certain Mantras.

Contains the Paṭalas 4—26 in the Siddhajīvanatantra.

**Beginning :**

पार्वत्युवाच—

ब्रह्मत्वमथ विष्णुत्वं रुद्रत्वं चन्द्रशेखरी(र) ।
देवि(व)त्वं च मुनित्वं च सिद्धगन्धर्वयक्षता ॥
गरुडोरगसङ्घत्वं राक्षसत्वं च भूतले ।
खेचरीभूचरीसिद्धिर्बुदन्तं च गतादिकम् ॥

कतोर्मलैर्मा(र्मू)लिकाद्यैर्वर्तते त्वागमादिभिः ।
उक्तमस्ति कृपासिन्धो विश्वासं मम ते वचः ॥

ईश्वर उवाच—

गोरक्षादिमहासिद्धो दूर्वासादितपोधनाः ।
इन्द्रादिलाकपालैस्तु ब्रह्माद्यमरपूजितः ॥
क(किं)नाम मूलिकायोगैस्सिद्धो भवति निश्चयम् ।
तत्सिद्धियोगं वक्ष्यामि गोपनं कुरु पार्वति ॥
ऋषित्वं मूलिकासिद्धिं वक्ष्येऽहं गोपनं कुरु ।
श्वेतपालाशमूलेषु पर्णशालां च कल्पयेत् ॥
तन्मध्ये भूगृहं कृत्वा तत्रैव कुलसुन्दरि ।
उत्थाय चापरे रात्रौ भस्मोद्धूली समाचरेत् ॥
तीरं प्रासादमुच्चार्य हंसस्सोऽहमितः परम् ।
उच्यते चैव तारान्तं नित्यं चैवायुतं जपेत् ॥

* • • •

**Colophon:**

इति श्रीयोगसारे सिद्धजीवनतन्त्रे चतुर्थः पटलः ॥

* * *

इति योगसारागमे सिद्धजीवनतन्त्रे पञ्चमः पटलः ॥

**End:**

कृष्णधुत्तूरबीजं च कालीमन्त्रेण बुद्धिमान् ।
शतवारं मन्त्रितं च एकोत्तरविधानतः ॥
भक्षयेन्मन्त्रराजं च अयुतं जपमाचरेत् ।
योगसिद्धिमवाप्नोति मूलिकादेवताज्ञया ॥

जातीपत्रं प्रातरुत्थाय नित्यं लक्ष्मीमन्त्रं मन्त्रितं चायुतं च ।
नित्यं भक्त्या भक्षयेन्मानवानां सर्वे(र्वा) सिद्धि(ः) द्वादशाब्दप्रमाणे ॥

य एवं मूलिकायोगं देवैरपि च गोपनम् ।
पुत्राय च सुशिष्यादि दीयते च कदाचन ॥

**Colophon:**

इति श्रीयोगसारागमे सिद्धजीवनतन्त्रे षड्विंशतिः पटलः ॥

Foll 32*b*—33*a* contain Bījanighaṇṭu Fol. 33*b* contains Śālmalīkalpa Foll. 34*a*—35*a* contain Sarvamūlikagrahaṇabhaksanamantra. Foll. 35*a*—38*a* contain a portion of Rasaratnākara (18th Upadēśa). Fol. 38*b* contains the name of this MS

---

R. No. **4183.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll 55 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of M R Ry E. K. Śaṅkaravarma, Raja of Puttankōvilakam, Puramery, Malabar district.

दशरूपकदीपिका.

DAŚARŪPAKADĪPIKĀ

Foll 1*a*--54*b* Fol. 55 is left blank

A commentary on Dhanañjaya's Daśarūpaka, which work has been described under No 12887 of the D.C S. MSS, Vol XXII: by Bahurūpamiśra

Wants the beginning of Prakaśa II. Prakaśa III complete and breaks off in the course of the IV Prakaśa

**Beginning:**

अथ लाटी—

मृदुपदसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा ।
उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ॥

भोजराजेन त्वनतिस्फुटबन्धदीर्घसमासमत्युपचारवृत्तिमल्लाटानुप्रासयोगरूढिमद्वचः सा लाटीत्युक्तम् ।

अथ लाटानुप्रासयोगिनी यथा—

अङ्गेनाङ्गं तव च तनुना गाढतप्तेन तप्तं
सास्रेणास्रद्रवमविरतोत्कण्ठमुत्कण्ठितेन । इत्यादि ।

रूढिमती यथा—

इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकावनम्राम् ।
त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः सौमित्रिणा सास्रमहं निषिद्धः ॥

* * * *

**Colophon:**

इति महामहोपाध्यायश्रीबहुरूपमिश्रकृतायां दशरूपकदीपिकायां नेतृविचारो नाम द्वितीयः प्रकाशस्समाप्तः ॥

*  *  *  *

**Colophon:**

इति दशरूपकदीपिकायां बहुरूपमिश्रविरचितायां तृतीयः प्रकाशः ॥

रसं व्युत्पादयति—

विभावैश्चानुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।

आनीयमानस्स्वादुत्वं स्थायीभावो रसस्स्मृतः ॥

**End:**

अक्षरसङ्घातः शोभोदाहरणं क्षोभः, अर्थविशेषणं प्रोत्साहनम्, गुणकीर्तनं कीर्तिराख्यानं निवेदनीयं परिवार उपपात्तः गुणानुवादः परिहार उद्यमः कार्यमनुक्तिसिद्धिराश्रयः युक्तिर्लेशोऽनुवृत्तिः क्षमा प्रहर्षः प्रियवचनमिति ॥

## R. No 4189.

Paper. 10¾ × 9¾ inches. Foll. 36 Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1922–23 from a MS of M.R.Ry Karunakara Menon, B.A., B.L., High Court Vakil, Chalapuram, Calicut.

### वात्स्यायनसूत्रव्याख्या—जयमङ्गला.

### VĀTSYĀYANASŪTRAVYĀKHYĀ: JAYAMAṄGALĀ.

Foll. 1*a*—35*b*. Fol 36 is left blank.

A commentary on Vātsyāyana's Kāmasūtra, which work has been described under No. 3909 of the D.C.S. MSS., Vol VIII., by Yaśōdhara.

Contains the Adhikaraṇas VI and VII complete.

**Beginning**

तिसृभिर्नायिकाया(भि)स्सह सङ्गमोपाय उक्तो वेश्यया सह वक्तव्यः। तदर्थं वैशिकमधिकरणमुच्यते। तत्र सहायादिनिरूपणव्यापारपूर्वकत्वादुत्तरव्यापारस्येति सहायगम्यागम्यकारणचिन्तोच्यते। पुंवेश्ययोस्तुल्येऽपि रतिफले वेश्याया एव प्रयोक्तृतयात्राधिकारो न पुंसस्तत्प्रतिबद्धत्वात् जीविकाया यदाह—वेश्याया इति। पुरुषाधिगमे पुरुषप्राप्तौ सति समागम इत्यर्थः। इतिर्विसृष्टिसुखं वृत्तिर्जीविकार्थोपादानात्। सर्गादिति। सृष्टेः एषैव हि सृष्टिस्स्यात् कामोऽर्थागमश्च वेश्यानां कामोऽर्थनाशश्च पुंसामिति।

* * * *

**Colophon:**

वैशिके षष्ठेऽधिकरणे प्रथमोऽध्यायः ।
आदित एकोनत्रिंशः ।

**End**:

कथं न रागार्थो भवतीत्याह—रक्षन्नि(क्षेदि)ति। अस्य शास्त्रस्य यस्तत्त्वं-[मे]वेति(त्ति) सोऽवश्यं धर्मादीन् परस्परस्यानुपघातेन रक्षन्(क्षेत ) लोकवर्तिनी-मिति । इहलोकपरलोकमार्गे शोभनाशोभनान् (म् ।) कुशल इति । एतस्मि-ञ्छास्त्रे कुशलः विद्वान् ज्ञानवान् धर्मार्थावे(न)धर्मभयात् यथा कामेन(न) बाध्यते । कामीति गृहस्थः । प्रयुञ्जान इति शास्त्रार्थम् । प्रसिध्यति लोकेषु प्रमाणपुरुषो भवति नातिरागा[दे]त्मकत्वादिति ।

**Colophon :**

इति सप्तमेऽधिकरणे द्वितीयोऽध्यायः ॥
आदित. षट्त्रिंशः ।
समाप्तश्च कामसूत्रटीकायां जयमङ्गलाख्यायामौपनिषदिकं सप्तमम-धिकरणम् ॥

---

## R. No. **4190.**

Paper. 10¾ × 9¾ inches Foll. 148. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. Kūtalūr Nārāyana Nambūdirippad, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

### भामतीतिलकम्.

### BHĀMATĪTILAKAM.

Same work as that described under R. No 3282 ante; By Allāla, son of Nāgamamba and Trivikramācārya.

Contains the portion from the middle of the second Pāda of the second Adhyāya up to the end of the first Pāda of the third Adhyāya and a further portion from the 16th Sūtra of the eighth Adhikaraṇa of the third Pāda of the first Adhyāya up to the end of the first Adhyāya.

---

## R. No. **4191.**

Paper. 10¾ × 9¾ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of the Sanskrit College Library, Tiruppanitturai, Cochin State.

द्वैतवेदान्तविषयः.

DVAITAVĒDĀNTAVIṢAYAḤ

On some topics relating to the Dvaita-Vēdānta

Wants the beginning.

**Beginning:**

इहेन्द्राणीमुपह्वये इत्यादौ शतपत्नीनां सोमपानादिदर्शनात् द्विशतं देवाः सोमपानार्हा इति वक्तव्ये कथं शतं सोम . . . . . भर्तृसङ्ख्यान्तर्भावेन शतदेव्यै तां(तासां) रक्षणेन शतदेवनापत्ये(त्वे)ऽपि गृहीत भवन्तीति शतसङ्ख्योपपत्तिरिति समाधानमभिहितम् ।

* * * *

इत्यंशभेदाभेदविचारः ।

अथ भगवद्गोगविचारः । यावद्द्रव्यभाविनामाकाशानां परस्परचेतनांशानामिति वात्यन्ताभेद . . . . . अभेदो वेति सिद्धान्तो निर्णेतुमशक्यः।

*

सुखं स्वरूपभूतं जगदानन्द इति कथ्यत इति, बृहद्भाष्ये—आरामः परमदर्शनादिनिमित्तं सुखमिति, गीताभाष्ये—परेयं प्रियनामकमिति, ऐतरेयभाष्ये—आनन्दव्यक्तिनानात्वात्संज्ञानमाज्ञानं विज्ञानं प्रज्ञानमिति, ऐतरेय—ज्ञानानन्दादयो गुणाः प्रत्य(त्ये)कमनन्ता इति, नायं(न्याय) चन्द्रिकायां—गुणतोऽनन्तविग्रह इति, अनुव्याख्याने ज्ञानानन्त्यस्योक्तत्वात् ।

**End:**

औपाधिकत्वेऽपि भिन्नाभिन्नत्वात् सुप्तौ स्वरूपानन्दानुभव इति घोषश्च युज्यते । उक्तं च षट्प्रश्नभाष्यटीकायां परमेश्वरसन्निधानसमुद्भूतः सुखमिति ।

न चैवं सति न च पर्यायादपि अविरोधो विकारादिभ्य इति जीवस्य विकारतयोक्तिः कथमिति वाच्यम् । तत्राग्निसंयोगादिना स्फटिकादेरिव स्वाभाविकविकाराभावस्योक्तत्वादिति सर्वं सुस्थम ॥

---

R No. **4192.**

Paper. 10¾ × 9¼ inches. Foll. 48. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS of M.R.Ry. Dōvulapalli Rāmakṛṣṇabrahma Śāstrigāru, Repalli.

Fol. 48*b* is left blank.

## सौन्दर्यलहरीव्याख्या —सौभाग्यवर्धिनी.

## SAUNDARYALAHARĪVYĀKHYĀ : SAUBHĀGYA-VARDHINĪ

A commentary on Śaṅkarācārya's Saundaryalaharī, which work has been described under R. No 1867(*d*) ante: by Kaivalyāśrama, pupil of Gōvindāśramapūjyapāda.

Breaks off in some places; otherwise complete.

**Beginning:**

सुहृङ्कृतेः
प्रत्यूहे मनसा गानप्रत्यूहे मननात्तव(?) ॥
शब्दायमानतिमिरा(वलिसेव्यमा)नं
निष्यन्दमानतिमिरार्थ्य(रोध्वे)गसान्ध्यरागम् ।
विघ्नान्धकारहरणं तरुणार्कशोणं
वन्देऽर्धनागनरयोर(ग)नियोगयोगम् ॥
कुण्डलितकुण्ड(न्त)ल(लाली) कर्तरिकाकृत्तमाननं भानोः ।
शकलमिव शोभमानं वन्दे सीमन्तरागमम्बायाः ॥
रमणीवामदेहाय रजताचलवासिने ।
रसाधरेन्द्रचापाय रमाकान्तेषवे नमः ॥

* * * *

श्रीशङ्कराचार्यकृते स्तवेऽस्मिन् टीकां चिकीर्षोर्मम मन्दबुद्धेः ।
विदूषकस्येव वचोऽस्तु युष्मद्धासाय सन्तोष्मि(ऽस्मि) तथापि धन्यः ॥

श्रीभगवान् शङ्कराचार्यः शिवशक्त्योरभेदं ज्ञापयितुं सकलप्रपञ्चसाक्षिण्याः (ब्रह्मावि) नाभूतचिच्छक्तेः स्तुतिद्वारा मातृकादिमन्त्रानुद्धरति—शिवश्शक्त्येति । जन्ममरणाद्यनेकक्लेशसञ्चयैः उपचीयमानतापत्रयरूपामङ्गलाभानात् शिवस्सदा मङ्गलरूपः (चिद्विलास)समुल्लसितपरमानन्दनिर्भरः, एतादृशः शक्त्या कर्तुमकर्तुमन्यथाकर्तुं (प्रभवन्त्या) सामर्थ्यविशेषस्फूर्त्या यदि युक्तो भवति तदा

* * * *

तर्हि मम प्रभावः कुत्र दृष्टः? यद्दृष्टान्तेन मम स्तुतिरारब्धेत्यत आह—हरिस्त्वामिति—विष्णुस्त्वां प्रणतजनसौभाग्यकरीं समाराध्य पुरा अमृतमथनानन्तरं द्रष्टुमागतम्, येन रूपेण दानवा मोहिताः । तव तद्रूप

(द्रक्ष्ये)ऽहामिति पृष्टवन्तं मदनारिं नारायणरूपं प्रकटयति(टीकृत्य) क्षोभमनयत्। मदनं परवशीकृतवान् । येन स्मर्तव्यतां प्रापितः, स्मर इति नाम प्राप्तवान् । सोऽपि पुना रतिनयनलेह्येन वपुषा प्राप्तविग्रहेण, महतामपि मुनीनां विश्वामित्रगौतमादीनां मोहाय प्रभवतीति प्रकटार्थः ।

**End:**

स्तुतिकर्तृतैव नास्ति । त्वमेव सर्वत्रानुस्यूता चेतनारूपा प्रतिभासत(स) इति भावः ॥

एषा सौन्दर्यलहर्याः टीका सौभाग्यवर्धिनी नाम्ना ।
कैवल्याश्रमरचिता विलसतु परदेवताप्रमोदकरी ॥

* * * *

**Colophon:**

इति श्रीगोविन्दाश्रमपूज्यपादशिष्यश्रीकैवल्याश्रमविरचिता सौभाग्यवर्धिनीनाम्नी सम्पूर्णा ॥

---

R. No. 4193.

Paper. 10¾ × 9¼ inches. Foll. 62. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS of M.R.Ry. (Nārāyana) Krsna Nambūdiri Vaidikan, Tekkattu-mana, Kumaranallur post, Malabar district.

Fol. 62 is left blank.

**आश्वलायनगृह्यमन्त्रव्याख्यानम्.**

ĀŚVALĀYANAGRHYAMANTRAVYAKHYANAM.

A commentary on the Mantras to be uttered in connexion with the performance of Pākayajñas (Astaka, Baliharana, Sarpabali, etc.) in accordance with the school of Āśvālayana.

Almost complete.

**Beginning:**

आश्वलायनगृह्योक्तपाकयज्ञेषु कर्मसु ।
मन्त्राणां विनियुक्तानां व्याख्यानं क्रियतेऽधुना ॥
अत्युक्तानि दुरुक्तानि यान्यनुक्तामि च स्फुटम् ।
समादधतु विद्वांसस्तानि सर्वाणि बुद्धिभिः ॥

तत्र प्रथमं मन्त्रविनियोगो वक्तव्यः । तत आर्षकथनम् । ततश्छन्दोनिर्देशः । ततो देवताभिधानम् । विनियोगचतुष्टयाज्ञाने दोषस्स्मर्यते । श्रूयते च । तत्र स्मृतिः ।

मन्त्राणां ब्राह्मणार्षेयछन्दोदैवतविन्न यः ।
यजनाध्यापनादेति छन्दसां यातयामताम् ॥

* * * *

अथ यो मन्त्रे मन्त्रे वेद, स सर्वमायुरेति, श्रेयान् भवति, अयातयामान्यस्य छन्दांसि भवन्ति, तस्माद्देवतादि मन्त्रे विद्यादिति । अतो मन्त्रे मन्त्रे विनियोगादिचतुष्टयं बोद्धव्यम्, तत्र ऋषिदैवतज्ञाने चार्थावगतिरुपयुज्यते ।

* * * *

अथास्यै शिखे विमुञ्चति—प्र त्वा मुञ्चामि वरुणस्य पाशादिति—द्वाभ्यां दक्षिणां शिखां पूर्वाया उत्तरामुत्तरायामुभयोरपि सूर्याय ऋषिः, पूर्वा त्रिष्टुप्, अनुष्टुबुत्तरा द्वयोरपि वधूरभिधेया, प्रमुञ्चामि हे वधूः, त्वा त्वाम्, अहं प्रमुञ्चामि. मुचिरत्र सामर्थ्यादन्तर्णीतण्यर्थः, मोचयामि । कुतः वरुणस्य पाशात्, येन वरुणपाशेन त्वामबध्नां गृहे बद्धवान् ।

**End:**

अथवा देवो भूत्वा न व्येतीति वचनादमर्त्येन सता मया देवेनेत्यर्थः, अमर्त्यता चित्राप्यमर्त्येनगयेन(?) अस्तावि स्तुतः, जनः दिव्यः दिवि भवः, सर्वदेवजन इत्यर्थः स्तूयमाना हि देवता वीर्येण वर्धन्ते इति । अत एवमुच्यते वर्धितवान् वीर्येणेति ।

अथवाष्टकायाः पिण्डपितृयज्ञप्रकृतित्वात् पिण्डपितृयज्ञमन्त्राः आकृष्य व्याख्यायन्ते । त . . . . . |

R. No. **4194.**

Paper $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 10. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. Cheralayam Raja, Kunnankulam post, Cochin State

(*a*) **अमरुकव्याख्या.**

AMARUKAVYĀKHYĀ

Foll 1–17*a* Foll. 17*b* and 18 are left blank.

A commentary on Amarukaśataka, which work has been described under No. 11917 of the D.C.S MSS, Vol. XX

Breaks off here and there; otherwise complete.

**Beginning:**

ज्याकृष्टीति । अम्बिकाया मृडान्याः कटाक्षोऽपाङ्गदर्शनम्, त्वां पात्विति सम्बन्धः, कीदृशः कटाक्षः? ज्या मौर्वी, तस्याः कृष्टये बद्धः मौर्वीघर्षणाय संयतः, खटकामुखपाणिः, खटकामुखो नाम धनुराकर्षणहस्तविशेषः, तथा च धनुर्वेदे—

तर्जनीमध्यमामध्ये पुङ्खोऽङ्गुष्ठेन पीड्यते ।
यस्मिन्ननामिकायोगात् स हस्तः खटकामुखः ॥

तस्य पृष्ठे पश्चाद्भागे प्रेङ्खन्तश्चलन्तो नखानामंशवस्तेषां चयस्तमूहः, तेन संवलितो मिश्रितः, पुनः कीदृशः मञ्जरितेति । मञ्जरितः सञ्जातमञ्जरितः-(रीकः) तदस्य सञ्जातं तारकादिभ्य इतीतच् प्रत्ययः । मञ्जरितश्चासौ पल्लवितश्चेति, स एव कर्णपूरः कर्णावतंसः, तत्र लोभेन स्पृहया भ्रमन् भ्रमरस्तस्य विभ्रमं लीलां बिभर्तीति विभ्रमभृत्, अत्रोपमालङ्कारः, नखांशुचयमञ्जर्योः पाणिपल्लवयोः कटाक्षभ्रमरयोश्च सादृश्यप्रतीतेर्विद्यमानत्वात् ।

यथाकथञ्चित्सादृश्यं यत्रोद्भूतं प्रतीयते ।
उपमा नाम सा . . . . . . . . . . ॥

इत्युक्तत्वात् । अत्र कविः शृङ्गाररसात्मकं काव्यं प्रारभमाणः आदौ वीररसाभिव्यञ्जकं देव्याः धनुराकर्षणक्रियां किमर्थमुक्तवानिति चा(ना)शङ्कनीयम् । यतः । शृङ्गाररसात्मकयैव विश्वमुखीसंज्ञया देव्या ध्यानं विवक्षितवान् । उक्तं च त्रिपुरासारस्वते—

सन्धाय सुमनोबाणं कर्षन्तीमैक्षवं धनुः ।
जगज्जैत्रीं जपारक्तां देवीं विश्वमुखीं भजे ॥ इति ॥

**End:**

स्कन्धावारशब्देन स्रक्चन्दनादिप्रसाधनहारमेखलाद्याभरणलीलादिना उपभोगसामग्री कथ्यते । विगलित इत्यनेन सुरतादिविश्रान्तिशैथिल्यं कथ्यते । न्यवर्ततेत्यनेन पुनस्सम्भोगो गम्यते । यथा लोके सुपुरुषः परं निर्जितः

* * * *

अत्र व्रीडा नाम सञ्चारी भावः, नायिका स्वीया, मध्या च स्वाधीनपतिका च, नायकोऽनुकूलः, सम्भोगशृङ्गारः ।

इति कविकुलतिलक न . . . . . कविना कृतामरुकव्याख्या समाप्ता ॥

---

(b) कुमारसंभवव्याख्या.

KUMĀRASAMBHAVAVYĀKHYĀ.

Foll. 19*a*—39*a*. Foll. 39*b* and 40 are left blank.

A commentary on Kalidāsa's Kumārasambhava, which work has been described under No. 11491 of the D.C.S. MSS., Vol. XX: by Vidyānātha, also called Vidyāmādhava.

Contains the Sargas three and four complete.

**Beginning:**

अथ कामागमनादिदहनान्त . . . . . . . सर्गेण वर्णयति—तस्मिन्निति, मघोनः अक्ष्णां सहस्रं त्रिदशान् विहाय तस्मिन् युगपत्पपात । इन्द्रस्य सुरेषु क्षणादनादरः कथमासीदित्याश . . . . . योजनमपेक्षत इति । प्रयोजनापेक्षितस्य(णो) भावः प्रयोजनापेक्षिता, तया प्रभवः, प्रयोजनापेक्षिण इति यत् तस्मात् (तेषां प्रभू) णामाश्रितेषु परिजनेषु गौरवं प्रायश्चलं, अस्थिरं हि । यस्तु स्वेषु प्रयोजनसाधको भवति तस्मिन्नेव प्रभूणां गौरवं भवति । यस्तु ।

सा शून्या तथा सख्यास्समक्षमाक्षेसांन्नेधौ एवं जातमित्यनेन जातलज्जा सती निरर्थमनोरथा सा गौरी तपश्चरणार्थं वन . . . . ण स्वगृह प्राविशदित्यभिप्रायः । एवं कथञ्चिदुक्तम् । वसन्ततिलकवृत्तमिदम् ॥

**Colophon:**

इति विद्यामाधवीये कुमारसम्भवव्याख्याने तृतीयस्सर्गः ।

अथैवं हरे तिरोहिते, गौर्यां च गतायां, कामे दग्धे, मूर्छिता रतिरनन्तरं किमकरोदित्याकाङ्क्षायामाह—अथेति । मोह . . . मोहं(हः) परायणं परमाश्रयो यस्याः सा मोहस्य तज्जीवनकारणत्वान्मोहशरणेत्यर्थः । परायणमभिप्रेते तत्प . . . . श्रये—इति वैजयन्ती, विवशा वशरहिता वशः प्रभावः, आयत्ततायामायत्ते काङ्क्षायामाशये वशः—इति शाश्वतः ।

**End:**

अहि वर्तमानस्य शशिनो लेखा कला प्रदोषमिव स्वकान्तिकारणं निशामुखं यथा प्रतीक्षते तद्व(त्पति) हीना रतिः स्वसन्तुष्टिजनकं शापान्तकालं प्रतीक्ष्य स्थितवतीत्यर्थः ॥

**Colophon :**

कुमारसम्भवस्यैष चतुर्थोऽर्थरसोज्(ज्वलः) ।
(व्या)ख्यायि ख्यातिमान् सर्गो विद्यामाधवसूरिणा ॥

R. No. **4195.**

Paper. 10¾ × 9¾ inches. Foll. 205. Lines, 20 in a page Dēvanāgari Good

Transcribed in 1922-23 from a MS. of M.R.Ry. Vāsudēvasōmayajippād, Vilayūr, Pattambi, Malabar district.

Bound in two volumes

बृहतीव्याख्या — ऋजुविमलपञ्चिका.

BṚHATĪVYĀKHYĀ : ṚJUVIMALAPAÑCIKĀ

Foll. 1, 3—9*a* and 15*a*—201*b*. Foll. 11*a*–15*a* contain a small portion of the first Pāda of the first Adhyaya in Śabarabhāṣya. Foll. 2, 9*b*, 10*b* and 205 are left blank.

Same work as that described under R. Nos. 2682 and 2958 ante. By Śālikanātha.

Contains the Padas 1 and 2 complete and 3rd Pada of the 1st Adhyaya incomplete.

**Beginning :**

(उ)ज्ञासितजगज्जाड्यं नमस्यामः प्रभाकरम् ।
प्रभाकरमयीं दृष्टिं दक्षिणां दधतं सदा ॥
वामदर्शनतापन्नचन्द्रं वन्देऽपराजितम् ।
प्रभ . . . . . . . . . . . . . . . . ॥
. . . निरासाभ्यां व्यासेनैषा विदूषिता ।
व्याख्याः प्राचां निबन्द्धृणामिति नाहमदूदुषम् ॥

लोक इत्यादिभाष्यं यत्नगौरवं प्र . . . . वार्तिककारेण व्याख्यातम् । तत्तु मन्दप्रयोजनमिति मत्वा टीकाकारः प्रयोजनं दर्शयति—लोक इत्यादिभाष्यस्येत्यादिना । स . . . . . . . . . त्वाद्धिप्रतिपन्न(त्वा)च्चाथातशब्दयोरेवालौकिकार्थाशङ्कानिवृत्तिः(प्र)योजनं स . . . . . . . . . लौकिक . . . . . . . . . . . . . . तिका . . . . . शङ्का . . . . . . असम्भवश्चेत्कथमिदं प्रयोजनं सिध्यति ।

* * * *

विप्रतिपन्नत्वात्स्मृतिकारस्य न ब्रूमोऽन्यस्यापि कर्मणोऽनन्तरं धर्मजिज्ञासा न कर्तव्येत्यदृष्टार्थतां निरस्यति—किं तु वेदमधीत्येत्यनेन। सर्ववादिसंमतार्थतां स्मृतिकारविप्रतिपत्त्या निराकरोति—अतश्शब्दो वृत्तस्यापदेशको हेत्वर्थेनेति भाष्यम्। कस्य वृत्तस्य हेतुतां दर्शयति वेदाध्ययनस्येति।

* * * *

सुहृदुपदेश इति भाष्यं व्याचष्टे। सार्वजनीनमविपर्ययं दर्शयति। न वेदार्थे कस्य चिद्विपर्ययोऽस्तीत्यर्थः। तस्माच्चोदनैव प्रमाणं धर्मस्येति सिद्धप्रतिज्ञातार्था॥

**Colophon:**

इति श्रीशालिमिश्रकृतायामृजुविमलायां पञ्जिकायां प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः॥

See under R. No. 2958 for the end

---

R. No. 4196.

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 82. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. obtained from the Sanskrit College, Tiruppanitturai, Cochin.

महाभारतव्याख्यानम्—लक्षालङ्कारः.

MAHĀBHĀRATAVYĀKHYĀNAM: LAKṢĀLAṄKĀRAḤ.

Foll. 1*a*—82*a*. Fol. 82*b* is left blank.

A commentary on the Mahābhārata, which work has been described under Nos. 1915—1957 of the D.C.S. MSS., Vol. IV, Part I: by Vādirājatīrtha.

Contains the Parvans Sabha, Āranya and Virāta complete; but wants two Adhyāyas in the Sabhāparvan.

**Beginning:**

अहं विश्वकर्मा वा इत्यत्र वै इति पदच्छेदः। विश्वानि समस्तानि कर्माणि दारुभिः क्रियमाणकर्माणि यस्य स इति योगेन मयोऽपि विश्वकर्मा; यथावेद्यत्रावेद्येति पदच्छेदः। "दश किष्कुसहस्राणि माप-

यामास सर्वत इत्यत्र किष्कुर्हस्ते वितस्तौ चेत्युक्तत्वात् । हस्तपरिमितो देशः किष्कुरित्युच्यते । दशसहस्रकिष्कुपर्यन्तं सभाकरणाय भूमिं मापयामास । माङ् मान इति धातोः(लिट्) । मानदण्डेन मानं कारयामासेत्यर्थः ।

* * * *

**Colophon:**

इति सभापर्वणि वादिराजतीर्थपूज्यचरणकृतलक्षालङ्कारटीकायां तृतीयोऽध्यायः ॥

**End:**

शुद्धं जितेन्द्रियं मन्य इत्यत्र शुद्धं जितेन्द्रियं गम्यं त्वां मे पुत्रार्थमिमामामन्त्रये । तत्रैतादृशकार्ये सति शुद्धिः ममापि शुद्धिः कृता । पुत्रे स्वसूमात्रादिविषये आत्मनि स्वस्मिन् स्नुषायाः दुहितुर्वा विषये अतिशङ्कां न पश्यामीति योजना ।

इति विराटे त्रिसप्ततितमोऽध्यायः ॥

नटा वैतालिकास्तथेत्यत्र वैतालिकास्तालधारिणः ।

**Colophon:**

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां विराटपर्वणि श्रीमद्वादिराजतीर्थपूज्यचरणकृतलक्षालङ्कारे पञ्चसप्ततितमोऽध्यायः ॥

समाप्तं विराटपर्व[म्] ॥

## R. No. 4197.

Paper. 10¾ × 9¼ inches. Foll. 10. Lines, 20 in a page. Dēvanagarī. Good.

Transcribed in 1922-23 from a MS. of M. R. Ry. Narayana Valiyatambiran, Āḷvañjēri mana.

## सुभाषितानि.

## SUBHĀṢITĀNI.

An anthological collection of stanzas culled out from various sources, such as the Mahābharata, the Ramayaṇa, the Manusmṛti, the works of Abhinavagupta, Rājaśēkhara, etc.

Incomplete.

**Beginning.**

*

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात् सारयति च ।

क्रमात्प्रख्योपाख्या प्रसरसुभगं भासयति य-
त्सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते ॥ अभिनवगुप्तस्य ।

सरस्वतीविभ्रमदर्पणानां सूक्तामृतक्षीरमहोदधीनाम् ।
सन्मानसोल्लाससुधाकराणां कवीश्वराणां जयति प्रकर्षः ॥

राजशेखरस्य ।

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥ भामहस्य ।

सूक्तिस(न्दो)ह एव स्यात् प्रयोक्तॄणां मनोमुदे ।
रत्नैः किमुदधौ कीर्णैः परिष्कारार्थिनां फलम् ॥

* * * *

गाथाकोशे—

सुभाषितं हारि विशत्यथो नलात् न दुर्जनस्यार्करिपोरिवामृतम् ।
तदेव धत्ते हृदयेन सज्जनो हरिर्महारत्नमिवातिनिर्मलम् ॥
चतुर्षु पुरुषार्थेषु स्वेषु स्वेषु पृथक् पृथक् ।
स्थानेषु स्थापितास्तास्ताः शृण्वन्त्ववहिता बुधाः ॥

प्ररोचना पद्धतिः ।

भट्टवार्तिके—

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमस्सोमार्धधारिणे ॥

**End:**

स तु तत्र विशेषदुर्लभस्तदुपन्यस्यति कृत्यकर्म यः ॥ भारवेः ।

द्वेष्यो भवत्यु . . नुबन्धं मधुरं च मन्त्रिणः ।
. . . . . . . . . . नुभयानुकूलम् ॥

---

R. No. **4198.**

Paper. 10⅜ × 9⅜ inches. Foll. 22. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS. of the Raja's Library, Khallikotte, Ganjam district.

## जगन्नाथवल्लभनाटकम्.

## JAGANNĀTHAVALLABHANĀṬAKAM

A drama in five acts having for its plot the love-story of Rādhā and Śrīkṛṣṇa:—by Rāmānandarāya, son of Bhagavadānandarāya. The author states that the work was written at the instance of Gajapatipratāparudra.

Complete in five Aṁśas, the names of which are—

१. पूर्वभागः.
२. भावपरीक्षा.
३. भावप्रकाशः.
४. राधाभिसरणम्.
५. राधासङ्गमोत्सवः.

**Beginning:**

स्वराञ्चितविपञ्चिकामुरजवेणुसङ्गीतकं
त्रिभङ्गतनुवल्लरीललितमुग्धहासोल्बणम् ।
वयस्यकरतालिकारणितनूपुरैरुज्ज्वलं
मुरारिनटनं सदा दिशतु शर्म लोकत्रये ॥

* * * *

ध्रुवपदा(द्य)मिदम्—

लघुतरलितकन्धरं हसितलवसुन्दरम् ।

गजपतिप्रतापरुद्रहृदयानुगतमनुदिनं सरसं रचयति रामानन्दराय इति चारु । नान्द्यन्ते सूत्रधारः—अलमतिविस्तरेण । प्रिये इत इतः । प्रविश्य नटी—अज्जे एषम्हि निता किङ्करीअणं चरनपतितं विलोअनपसादेहिं पसन्नहिअअं काटुं भट्टा परं पमानम् ।

* * * *

सूत्र—प्रिये सर्वविद्यानदीविलासगाम्भीर्यमर्यादास्थैर्यप्रसादादिगुणरत्नाकरस्य सुरगुरुप्रणीतस्य नीतिकरम्बितमन्त्राश्रवीकृतप्रगुणपृथ्वीश्वरस्य श्रीभगवदानन्दरायस्य तनुजेन श्रीहरिचरणालङ्कृतमानसेन श्रीरामानन्दरायेण कविना तत्तद्गुणालङ्कृतं श्रीजगन्नाथवल्लभसङ्गीतनाटकं निर्माय समर्पितमभिनेष्यामि ।

तथा चायं कविस्सविनयमिदमत्रादीत्—

न भवतु गुणगन्धोऽप्यत्र नाम प्रबन्धे
मधुरिपुपदपद्मोत्कीर्तनं नस्तथापि ।

सु(स)हृदयहृदयस्यानन्दसन्दोहहेतुः
नियतमिदमतोऽयं निष्फलो न प्रयासः ॥

*　　*　　*　　*

ध्रुवपद्यमिदम्--

खेलादोलायितमणिकुण्डलरुचिरुचिराननशोभं
हेलातरलितमधुरविलोचनजनितवधूजनलोभम् ।
गजपतिरुद्रनराधिपचेतसि जनयतु मुदमनुवारं
रामानन्दरायकविभणितं मधुरिपुरूपमुदारम् ॥

मूत्रं-- (सचकितं) प्रिये मत्कनीयान् श्रीकृष्णबृन्दावनगमनमावेदयति । तद्वयमपि स्वनेपथ्योचिताय याम इति निष्क्रान्तौ । प्रस्तावना ।

*　　*　　*　　*

**Colophon:**

इति श्रीरामानन्दरायकृते जगन्नाथवल्लभनाटके पूर्वभागो नाम प्रथमोऽङ्कः ॥

**End:**

ध्रुवपद(द्य)मिदम्—

पिकविधुमधुमधुपावलिरचितं रचयतु मामधुना सुखभरितम् ।
प्रणयतु रुद्रनृपे सुखममितं रामानन्दभणितहरिरमितम् ॥

तथापीदमस्तु---

श्रद्धाबद्धमतिर्मम प्रतिदिनं गोपाललीलस्य यः
संसेवेत रहस्यमेतदतुलं लीलामृतं लोलधीः ।
तस्मिन्मज्जितमानसे किल कृपादृष्ट्या भवत्या सदा
भव्यं येन निजेप्सितं व्रजजने सिद्धं समाप्नोति सः ॥

मदनिका—तथास्तु—इति निष्क्रान्तास्सर्वे ॥

**Colophon:**

इति श्रीरामानन्दरायकृते श्रीजगन्नाथवल्लभनाटके श्रीराधासङ्गमोत्सवो नाम पञ्चमोऽङ्कः ॥

समाप्तमिदं नाटकम् ॥

## R. No. 4199.

Paper. 10¾ × 9¾ inches. Foll 20. Lines, 20 in a page. Grantha. Good.

Transcribed in 1922-23 from a MS. of M R Ry Nārāyaṇa Nambūdirippād, Kūdalur, Tritala, Malabar.

(*a*) चेल्लूरपुरीशस्तवः.

CELLŪRAPURĪŚASTAVAḤ

Foll. 1*a*—2*b* and 4*a*. Foll. 2*b*—3*b* contain some stanzas in praise of Vikramārka and Kṛṣṇa

A eulogy addressed to God Śiva worshipped at Cellūrapurī, also known as Saṅgamakṣētra in the Malabar district

Complete.

**Beginning :**

लक्ष्मीविद्युद्विलासः प्रसृमरकरुणासारवर्ष्म(र्ष)प्रकर्षः
कुर्यान्नो नीलकण्ठं प्रमदपरवशं चन्द्रकोद्भासमानम् ।
सच्चेतश्चातकानां सपदि विरचय(न् सान्द्रमान)न्दपूरं
दृष्टोऽयं सङ्गमाख्ये महति पुरवरे श्यामलः कोऽपि मेघः ॥

* * * *

प्रादुष्षन्तु पुरः पुरत्रयवधूबिब्बोकसम्पद्द्रुहः
श्रीचेल्लूरपुरीनिवासरसिकास्तेजोविलासा मम ।
येषु ध्यानपथं गतेषु भविता नृणां फणी भूषणं
वामाङ्गं वनिता दिशश्च वसनं भागीरथी मालिका ॥

* * * *

उत्कूलप्रणयातिरेकमुदयद्रोमाश्चपुञ्जं मुहुः
प्रत्याख्यानपरैकभागवचनं चेल्लूरपुर्यामहेः ।
नीवीस्पर्शविलोलदक्षिणकरव्यापाररोधक्रिया-
वैयग्र्याकुलवामपाणि शिवयोरैक्यं परिक्रीडते ॥

**End :**

याचे किञ्चिदिदं कृताञ्जलिपुटं चेल्लूरपुर्याः पते
स्वामिन् वारय चन्द्रशेखर कृपावारां निधे मामकीम् ।
द्वित्रग्रामटिकाधिपत्यकलिताहम्भावशुम्भन्मति-
क्षुद्रक्ष्माधवचाटुकोटिघटनादैन्यस्य दोग्ध्रीं दशाम् ॥

कण्ठग्राहिकफे स्खलद्गिरि चलद्बोधे गलन्मारुते
मीलच्चक्षुषि वेपमानहृदये काले सति प्रस्तुते ।
आरुह्य स्वयमद्रिराजसुतया साकं महाशाक्करं
स्वामिन् शङ्कर सन्निधेहि कृपया चेल्लूरभूषामणे ॥

(*b*) स्वातीप्रशंसा.
SVĀTĪPRAŚAṀSĀ.

Foll 7*a*—12*b*. Foll. 4*a*—7*a* contain Dēvīstuti of Parakrōḍēśa. Herein the author praises the beauty of one Svātī of Viraḷi family. Complete.

**Beginning:**

विख्याताद्विरलीशवंशकलशाम्भोधेस्समुन्मीलिता
स्वातीकल्पलता विभाति सुमनस्स्तोमप्रियम्भावुका ।
रागैः पल्लविता स्मितैः कुसुमिता केशैश्च लोलम्बिता
कान्त्या कोरकिता रतेन फलिता कामेन चोपघ्निता ॥
वाणीरुत्पुलका कदाचन कविव्रातोदिताश्लाघते
वीणां वादयते कदापि सुमुखी व्यावूर्णकर्णोत्पला ।
आनन्दाश्रुकणैरपाङ्गवलितैरार्द्रस्तनाग्रैकदा
स्वादं स्वादमघापहाश्शुकगिरः स्वाती हरौ लीयते ॥
वीक्षा ते श्रुतिलङ्घिनी वितनुतां व्यामोहनं चेतसः
साक्षाद्ध्वान्तमयाः कचाश्च कुटिलास्संवादयन्तु भ्रमम् ।
आधत्तामधरोऽपि पल्लवसखो बाधां कथं ब्रूमहे
स्वाति स्वच्छतरो हसोऽपि सततं सूतेऽयमन्तर्व्यथाम् ॥

**End:**

चापं भक्षय शिञ्जिनीं च कुसुमेष्वामुञ्च पञ्चाशुगीं(गान्)
नीलाग्रेषु कचेषु पातय रतेः कर्तुं जले प्रक्षिप ।
रे रे मन्मथ किं मुधा कलयसे कोलाहलं नन्वियं
जातीशुभ्रदती सुधीनुतमतिः स्वाती मया सङ्गता ॥
नवघनमेचकमलके नयने दीर्घ(र्घे) न किञ्चिदवलग्ने ।
स्वातीनामकमेकं साम्राज्यं जयति शम्बराराते: ॥

* * * *

अम्भोजानां तुषारः करिकरकदनं राजरम्भाकुलानां
च(श)म्पानां चञ्चलत्वं हरिनखरभिदा कुम्भिकुम्भस्थलीनाम् ।
पूर्णेन्दोः किं च वैधुन्तुदमुखगिलनं हन्त युक्तोऽद्य दण्डः
त्वद्देहस्यैकदेशानुकरणकलया स्वाति जातेऽपराधे ॥

Fol. 12*b* contains Yusmadasmadvicāra portion.

---

(*c*) चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Foll. 13*a*—15*a* and 18*a* –19*a*  Foll. 15*a*—17*b* give Krsnastuti and Śaṅkararāmaprabhupraśaṁsā. Foll. 19*b* –20*b* are left blank.

Similar to the work described under No. 12017 of the D.C.S MSS., Vol XX.

**Beginning :**

परं सवा(रस्वं वा) सुखं हन्ति परस्त्री हन्ति जीवनम् ।
परान्नं च तपो हन्ति परनिन्दा च सन्ततिम् ॥
विद्या विवादाय धनं मदाय प्रज्ञाविशेषः परवञ्चनाय ।
अत्युन्नतिस्साधुपराभवाय दुरात्मनां सत्सु शमाय सर्वम् ॥

**End :**

अस्तु मृतिः का नु हतिः किन्नु फलं व्याधिखिन्नया मूर्त्या ।
अद्रिपतेरस्ति सुता म(म हृ)दये हस्तनिहितमुक्तिफला ॥

---

R. No. **4200.**

Paper. 10¾ × 9¾ inches. Foll. 238. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. Hariharārājaguru, Chocinajagannathapuram, Kadala post, Ganjam district.

भाषावृत्तिः.

BHĀṢĀVṚTTIḤ.

Foll. 1*a*—237*a*. Foll. 237*b*—238 are left blank.

An illustrative commentary on Pāṇini's Aṣṭādhyāyī: by Mahāmahōpādhyāya Purusōttama.

Complete.

**Beginning :**

नमो बुद्धाय भाषायां यथात्रिमुनिलक्षणम् ।
पुरुषोत्तमदेवेन लघ्वी वृत्तिर्विधीयते ॥

अथ शब्दानुशासनम् । लोकानां प्रकृतिप्रत्ययविभागपरिकल्पनया सामान्यविशेषावतारलक्षणेन गत्यन्तराभावात् । वर्णानामुपदेशस्तु समं निवेशानुबन्धासञ्जनार्थस्तदुभयं संज्ञार्थम् । सा च लाघवेन शास्त्रप्रवृत्त्यर्था । अकारस्य विवृतोपदेश आकारग्रहणार्थः । अइउण्, ऋऌक्, एओङ् ऐऔच्, हयवरट्, लण्.

* * * *

इति प्रत्याहारः । अकारादीन् वर्णानेतान् क्रमेणोपदिश्यान्ते णकारादीनित्संज्ञकाननुबध्नाति प्रत्याहारार्थम् । तत्र

णकाराद्यैश्चतुर्दशभिरनुबन्धैर्यथाक्रमम् ।
एकं त्रीणि पुनश्चैकं चत्वार्येकं त्रयं त्रयम् ॥
एकं द्वे षट् तथैवैकं चतुः पञ्च षडेव च ।

* * * *

नाज्झलौ । अच्हलौ परस्परं सवर्णसंज्ञकौ न स्तः । दण्डहस्तः, दधिशीतम्, वैशापाशो मत्स्यः, आनडुहं चर्म । यस्येति चेति लोपो न भवति ।

* * * *

एङ् प्राचां देशे एङ् यस्याचामादिस्तद्वृद्धं स्यात् प्राग्देशे । एनीपचनीयो ग्रामः, भोजकटीयः । देशे किम्? गोमत्यां भवा गौमत्या मत्स्याः ॥

**Colophon :**

इति पुरुषोत्तमदेवस्य कृतौ भाषावृत्तौ प्रथमस्याध्यायस्य प्रथमः पादः ॥

**End :**

अ अ । अकारः शास्त्रे विवृतोपदेशः प्रतिज्ञातः स प्रयोगे संवृतो भवेत् । वृक्षः, सिद्धः ॥

**Colophon :**

इति महामहोपाध्यायश्रीपुरुषोत्तमदेवस्य कृतौ भाषावृत्तावष्टमाध्यायः समाप्तः ॥

R. NUMBER 4266 — 199

R. No. 4201.

Paper. 10¾ × 9¾ inches. Foll. 136. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry. Hariharārājaguru, Chocinajagannathapuram, Kadala post, Ganjam district.

## गोवर्धनार्यासप्तशतीटीका.

## GŌVARDHANĀRYĀSAPTAŚATĪṬĪKĀ.

Foll. 1—136*a*. Fol. 136*b* is left blank.

A commentary on Gōvardhanācārya's Āryāsaptaśatī, which work has been described under Nos. 11968 and 11969 of the D.C.S. MSS., Vol. XX: by Vanamālin.

Complete in 700 Ślōkas.

**Beginning:**

अथ सकलकविलोकाचार्यो गोवर्धनाचार्योऽकारादिक्रमेण व्रज्यारूपामार्यासप्तशतीं निबन्धुम् "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इत्यालङ्कारिकोक्तरीत्या आशीराद्यन्यतमस्य काव्यमुखत्वात् प्रथमतो जयतीत्यादिव्यङ्ग्यं शिवादिनमस्कारं निर्दिशन् तत्र प्रथमतो नवभिश्श्लोकैः शिवं वर्णयति—पाणिग्रह इति। पाणिग्रहे विवाहे, पार्वतीकरस्पर्शनकाले सात्त्विकवशात् पुलकितं सञ्जातपुलकम् ऐशम् ईशसम्बन्धि तद्वपुः शरीरं जयति सर्वोत्कर्षेण वर्तते। वपुः किम्भूतं? भूतिभूषितं भूत्या भस्मना भूषितमलङ्कृतं, भूतिर्भस्मनि सम्पदीत्यमरः। उत्प्रेक्ष्यते यस्मिन्नैशे वपुषि भस्मावशेषोऽपि मनोभूः मनोजः अङ्कुरित इवासीत्। मनसो भवतीति मनोभूः, एतेन अन्तर्गतो वर्तत इति शेषः, यत्र कुत्राप्यन्तर्गतस्य बीजादेः कारणयोगादङ्कुरो भवतीति सिद्धम्। अत्र भूतिभूषितस्येश्वरस्य रोमाञ्चे भस्मावशेषस्याङ्कुरत्वारोपः।

**End:**

कश्चिज्जनः मधुनः अधमपुरुषस्य प्रकारं मित्रस्याग्रे कथयति, अन्यापदेशेन—क्षुद्रोद्भवस्येति। हे सखे मधुनः अधमपुरुषस्य च गरिमा गुरुत्वं गुरुपरिमाणं च तुलना(सं)शये घृतादेस्सकाशान्मधुनो गुरुत्वं वर्तते, लघिमा लघुत्वं नीचत्वमूनपरिमाणं भेदाय भवतीत्यर्थः, मधुनः किम्भूतस्य,

अधमपुरुषस्य च किम्भूतस्य? क्षुद्रोद्भवस्य क्षुद्रा मधुमक्षिकास्ताभ्य उद्भवस्य, अन्यत्र क्षुद्रोद्भवस्य क्षुद्रजनाज्जातस्य। किं च कटुतां कटुरसवत्तां तीक्ष्णतां च प्रकटयति। किं च, उच्चैर्मदं विदधतः मधुनः मादकत्वात्, अन्यत्रोच्चैर्मदं गर्वं विदधतः कुर्वतश्च, अन्यापदेशार्थः स्फुट एव। ७०० श्लोकाः ॥

इति क्षकारव्रज्या ॥

**Colophon:**

गोवर्धनसप्तशतीटीका समाप्ता ॥

कृता गोवर्धनव्याख्या वनमालिकवीन्दुना।
आलोच्यतां सहृदयैरियमेकान्ततश्चिरम् ॥

R. No. **4202.**

Paper. 10⅜ × 9¾ inches. Foll. 100. Lines, 20 in a page. Dēvanāgarī. Good

Transcribed in 1922–23 from a MS. of the Sanskrit College Library, Tiruppanattura, Cochin State.

मध्वविजयव्याख्या.

MADHVAVIJAYAVYĀKHYĀ.

Foll. 1—99*a*. Foll. 99*b* and 100 are left blank.

A commentary on Nārāyaṇācārya's Madhvavijaya, which work has been described under R. No. 179 ante: by Viśvapatitīrtha.

Contains from the 51th Ślōka of the VI Sarga and breaks off in the XIV Sarga; with different colophons as given below.

**Beginning:**

समुद्रलङ्घने वानरेन्द्र इव, हनूमानिव, दानवभीमः, दैत्यभयङ्करः, वृजिनस्य पापस्य, नाशनं यस्मात्तत् व्र(वृ)जिननाशनं तादृशं नाम यस्य स तथा सः श्रीमध्वाचार्यः, गिरिपुङ्गवः, गिरिश्रेष्ठः हिमवान्, तस्य श्रृङ्गं, तस्मिन्नुल्लास शुशुभे।

* * * *

**Colophon:**

इति श्रीमद्वेदाङ्गमुनिकृतटीकाविवृतौ विश्वपतितीर्थकृतौ षष्ठस्सर्गः ॥

अथेति—अथ हिमवल्लङ्घनानन्तरं यः सकलज्ञः सर्वज्ञः श्रीमध्वः हैमवतस्सम्बन्धि हैमवतं तस्मिन् अन्यत्तटं तटान्तरं, तस्मिन् हिमवत उत्तरपार्श्वे इति यावत्। बदरीणां बदरीवृक्षाणां यानि षण्डानि सम-

हास्तैः विशेषमण्डितो विशेष(षे)णालङ्कृतस्तम्; षण्डं पद्मादिसङ्घात इति विश्वः । श्रियो रमायाश्शोभाया वा आश्रयमाधारं विश्रुतं प्रसिद्धं परमाश्चर्यमुत्तमाश्रयं ददर्श । बदरिकाश्रमं ददर्शेति भावः ।

* * * *

**Colophon:**

इति श्रीमद्वेदाङ्गतीर्थविरचितश्रीमन्मध्वविजयटीकाविवृतौ विश्वपतितीर्थकृतौ सप्तमस्सर्गः ॥

* * * *

इति श्रीवेदाङ्गमुनिविरचितश्रीमध्वविजयटीकाविवृतौ विश्वपतितीर्थकृतौ अष्टमस्सर्गः ॥

* *

इति श्रीमद्वेदाङ्गतीर्थकृतश्रीमध्वविजयटीकाविवृतौ विश्वपतितीर्थकृतौ नवमस्सर्गः ॥

* * * *

इति श्रीमध्वविजयटीकायां दशमस्सर्गः ॥

* *

इति श्रीमद्वेदाङ्गमध्वविजयटीकाविवृतौ विश्वपतितीर्थकृतौ पदार्थदीपिकोद्बोधिकायामेकादशस्सर्गः ॥

* * * *

इति श्रीमध्वविजयटीकायां द्वादशस्सर्गः ॥

* * * *

इति श्रीमध्वविजयटीकायां भावप्रकाशिकायां विश्वपतितीर्थकृतायां त्रयोदशस्सर्गः ॥

**End:**

अविदितेति--अथ अमलौ पाणी हस्तौ यस्य स तथोक्तः । संयमी निगृहीतेन्द्रियः कश्चिद्यतिः प . . . . वदनपवनो मुखवायुस्तस्य भी . . . . . . . . . . रित्यज्यैकस्मिन् पार्श्वे बिभ्रद् दधानस्सन् अविदितः रसभेदो रसविशेषो यस्य स तथोक्तं तच्छीतलं, लघु, गुरुत्वदोषरहितं न वि . . . . . षं चकार पूर्णं कमण्डलु . . . . . . . . . कमण्डलौ करक इत्यमरः । . . . . . क्तरसं शीतलं . . . . . . . . . . . . . घुचप ॥

## R. No. 4203.

Paper. 10¾ × 9¾ inches. Foll. 42. Lines, 20 in a page. Grantha. Good.

Transcribed in 1922–23 from a MS of M.R.Ry. Iṭṭiri Vāriyar, Kārakkāṭṭu Aṁśam, Kavalappara post, Malabar district.

### (a) सामुद्रसारम्.

### SĀMUDRASĀRAM.

Foll. 1a—13a.

Similar to the work described under R. No. 1248(a) ante. By Śaṅkara, pupil of Nārāyaṇa.

Apparently complete

**Beginning:**

मुक्तिस्थलाय(न)गिरीन्द्रसुताप्रसादलेशाप्तवाक्प्रसरवैभवलब्धकीर्तिः ।
सामुद्रसारमृजुना न(त)नुते पथासौ श्रीशङ्करोऽद्रिजलधीशपदाब्जसेवी ॥

आयुःप्रश्ने जीवतां च मुमूर्षूणां च लक्षणम् ।
तल्लाञ्छनं चैव(च) वक्ष्यामि प्रविविच्य यथाश्रतम् ॥
तत्राथ जीवतस्तावल्लक्षणं वृद्धदर्शनम् ।
तल्लाञ्छनं तु कार्पासस्तबकस्यावलोकनम् ॥

* * *

उक्तान्येवं लक्षणानि लाञ्छनैस्सह कानिचित् ।
नारायणगरावेक्रान्मुमूर्षूणां यथाश्रुतम् ॥
लक्षणान्यर्थलाभस्य वक्ष्ये तल्लाञ्छनानि च

अथ सन्तानसंसिद्धिलक्षणं तु सलाञ्छनम् ।
वक्ष्ये नारायणगुरोरनुस्मृत्य मनीषितम् ॥
दण्डस्य लाञ्छनं वस्तु तथाकारतया स्थितम्
पुत्रोद्भूतेर्लक्षणं स्यान्मर्त्यस्त्रीयोनिदर्शनम् ॥

*

न भोक्ष्यतीति विज्ञेयं स्याच्चेद्भुक्तिर्निशामय ।
अधोमुखस्स्तब्धगात्रो नरस्तस्य तु लाञ्छनम् ॥

**Colophon:**

लाञ्छनं समाप्तम् ॥

शीर्षे च दक्षिणावर्ता(र्तः) पिता तस्य न संशयः ।
वामे च जननीनाशस्त्रिवर्षाभ्यन्तरं तथा ॥
स्वरं सत्त्वं च नाभिश्च त्रिगम्भीरं प्रशस्यते ।
उरश्शिरो ललाटं च त्रिविस्तीर्णं प्रशस्यते ॥

* * *

**End:**

यस्याः पाणितले पद्मं पादे चैव विशेषतः ।
चामरं शङ्खचक्रं च सापि राज्ञी भविष्यति ॥
सुस्निग्धा सरला यस्या भूम्यामङ्गुलिसंश्रिता ।
क्रमेण ह्रस्वदीर्घा च तां कन्यां वरयेद्बुधः ॥

---

(*b*) महायात्रा.

MAHĀYĀTRA.

Foll. 13*b*—42*b*.

A treatise on astrology: by Varāhamihira.

The names of the Adhyāyas are given below:—

५. ग्रहदिनाध्यायः.
६. मुहूर्तगणनाध्यायः.
७. चन्द्रबलाध्यायः.
८. लग्ननिश्चयः.
९. द्रेक्काणनिश्चयः.
१०. ग्रहभावशुद्धिः.
११. अपवादाध्यायः.
१४. गुह्यकानुष्ठानविधिः.
१५. स्वप्नाध्यायः.
१६. विजयस्नानम्.
१७. ग्रहयज्ञाध्यायः.
१८. अभिनिर्गमः.
१९. हस्तीङ्गितविधिः.
२०. अश्वेङ्गितविधिः.
२१. मङ्गलाध्यायः.
२२. प्रास्थानिकम्.
२३. शकुनाध्यायः.
२४. तिथियोगाध्यायः.
२५. व्यतिपाताध्यायः.

Contains the Adhyāyas 5 to 11 and 14 to 24 complete and 25 incomplete.

**Beginning:**

उदरनयनरोगांश्चापदारण्यबाधां
सवितृदिवसयातोऽप्यश्नुतेऽर्थक्षयं च ।

अनिलकफजरोगान् शक्तिमानान्महानि
सलिलजनितपीडां चाग्नि(ह्नि)याता हिमांशोः ॥
ज्वलनवधविषासृक्पित्तरुक्शत्रुपीडा-
मवनिजदिनयातो बाध्यते शत्रुसङ्घैः ।
अहनि सवितृसूनोर्दैन्यमाप्नोति गन्ता
स्वजनधनवियोगं मृत्युबन्धामयांश्च ॥

* *

**Colophon :**

इति महायात्रायां ग्रहदिनाध्यायः पञ्चमः ॥

* * * *

यदेव यस्योदयसंस्थितस्य फलं प्रयाणे सदतत्प्रदिष्टम् ।
तदेव तस्याखिलमह्नि यातुः ग्रहस्य वर्गे च विलग्नसंस्थे ॥

**Colophon :**

इति महायात्रायामपवाद एकादशोऽध्यायः ॥

दक्षिणपार्श्वस्पन्दनमभिधास्ये तत्फलक्षणो . . ।
वामे पृथिवीलाभः शिरसि स्थानविवृद्धिः ललाटे स्यात् ॥

* * * *

**Colophon :**

इति महायात्रायां गुह्यकानुष्ठानविधिश्चतुर्दशोऽध्यायः ॥

**End :**

चक्रे वराहमिहिरश्शकुनोपदेशमुद्देशतो मुनिमतान्यवलोक्य सम्यक् ।
यद्ग्रन्थविस्तरभयादभिजानतो वा नोक्तं तदद्य कथितादपि चिन्तनीयम् ॥

**Colophon :**

इति महायात्रायां शकुनाध्यायस्त्रयोविंश[ति]ः ॥

* * * *

शुभा मृगपतत्रिणो मृदुसमीरणो ह्लादकृद्
ग्रहाः स्फुटमरीचयो विगतरेणु दिङ्मण्डलम् ।
यदान्यदपि वैकृतं न विजयावसाने भवे-
त्तदा सुखमकण्टकं नृपतिरत्ति देशं रिपोः ॥

**Colophon :**

इति महायात्रायां चतुर्विंशोऽध्यायः ॥

एष्यो धनं क्षपयति व्यतिपातयोगो मृत्युं ददाति नियतं खलु वर्तमानः ।
सन्तापशोकवधदैन्यभयान्यतीतः तस्माद्दिनत्रयमिति प्रजिहीत विद्वान् ॥

* * * *

एकस्मिन्नपि देशे मार्गैकत्वं न भवति सर्वत्र ।
व्यतिपातं चेदेवं न कदाचिदपि व्यतीपातः ॥

## R. No. 4204.

Paper. 10¾ × 9¾ inches. Foll 18 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry K.V. Paramēsvara Vādhyān Nambūdiri, Achipuram, Kottakal post, Malabar district

वाक्यावली·

VĀKYĀVALĪ.

A poem in four Sargas narrating the story of Lord Krsna. Brief notes are given at the end of each stanza indicating the Alaukāra, the metre and the grammatical peculiarities. Each stanza begins with one of Vararuci's Sūtras which are intended for use in preparing a Hindu Calendar.

Contains the Sargas one to four (wants the beginning in the first Sarga, the end of the third Sarga, the beginning of the fourth Sarga and breaks off in many places).

**Beginning:**

छेकानुप्रासः, इन्द्रवंशावृत्तम् ।
भवो हि याज्यः सुतनो भवान्यपि स्वयं भवत्येति मुनीन्द्रभाषितम् ।
क्षणाद्दृतं कर्तुमिवात्मना हरिः सुखेन चासूयत भोजकन्यया ॥

अत्र कर्मणि तङ्, वृत्त्यनुप्रासः, वंशस्थं वृत्तम् । धन्येयं नारी, नारीणां य(ध)न्येयं नारीणां गेहे व्यत्यस्तस्य . . . पत्यं यस्यास्त्वस्ताया वासे घोषे च, "कर्तरि कर्मव्यतीहारे" इति तङ्, यमकम्, विद्युन्मालावृत्तम् ।

* * * *

नद्यास्तीरनिवासिनां कीर्तिरुच्चरमाणा खं बोधयन्त्यासकर्मज . . . .
अत्रोत्पूर्वाच्चरतेस्तङ्, बोधयन्तीति तत्समर्थाचरणे प्रयोगात् सम्भवति वस्तुसम्बन्धः, सम्भवद्वस्तुसम्बन्धा निदर्शना ॥

**Colophon:**

इति श्रीवासुदेवविरचितायां वाक्यावल्यां प्रथमस्सर्गः ॥

घवस्त्वं नः पाहीत्यवनतिभृतां नागमुदृशां
वरं दत्वा कृष्णः समचरत यानेन शनकैः ।
हरेर्भासस्तासामरुणमणिसीमन्तरुचयो
बभुः कालाद्यौघव्यतिकरितसन्ध्याद्युतिकृतः ॥
अत्र सम्पू(र्वस्य चरतेस्तङ् शिखरिणीवृत्तम्) ।

**End:**

कवेश्शक्यं वाचा कथमपि भवन्तं कवयि(यि)तुं
पुराणस्य स्तो(त्रे) वयमपि च के मन्दमतयः ।
तथापि त्वय्यस्मिन् भगवति भवक्लेशहरण-
प्रभावे भावो मां चपलयति हासाय जगताम् ॥
भवेत्सुखं मे भगवत्पदाम्बुजद्वयस्मृतिक्षोदविशुद्धचेतसः ।
परत्र कृष्णः शुभकृत्स्वतेजसा पुनस्तदैक्यं च करोतु केवलम् ॥

**Colophon:**

इति श्रीवासुदेवकविविरचितायां वाक्यावल्यां चतुर्थस्सर्गः ॥

---

R. No. **4205.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 307. Lines, 20 in a page. Grantha. Good.

Transcribed in 1922-23 from a MS. of His Holiness Nārāyanabhāratī Kappiyār Svāmigal, Mūppil-Sthānam, Trichur, Malabar district.

Bound in two volumes.

**खण्डनखण्डखाद्यव्याख्या.**

KHAṆḌANAKHAṆḌAKHĀDYAVYĀKHYĀ.

Foll. 1—307*a*. Fol. 307*b* is left blank.

Same work as that described under R. No. 3870(*f*) ante, wherein see for the beginning. By Ānandapūrṇa, disciple of Abhayānanda.

Breaks off in the fourth Paricchēda.

This is also called Khaṇḍanaphakkikāvibhajana.

**End:**

अनध्यवसायज्ञानं व्यभिचारित्वाव्यभिचारित्वकोटिद्वयबहिर्भूतमेव किं न स्यादित्यत आह—परस्परेति । यदादिशब्दानामनुगतार्थत्वाननुगतार्थत्व-विकल्पखण्डनं तत्र तत्र । यदुक्त . . . . . . . . . . . परिच्छेदे सर्वनामान्तरखण्डनमूहनीयमित्युपसंहरति— अत्रेति ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यभयानन्दपूज्यपाद[स्य]भगवच्छिष्य-स्यानन्दपूर्णस्य कृतौ खण्डनफक्किकाविभजने तृतीयः परिच्छेदः समाप्तः ॥

नैयायिकादिपरिकल्पितप्रमाणादिपदार्थानिर्वचनीयताप्रपञ्चनाद्वैतविरोधं परिहृत्याधुना वै . . . . . मिकपरिकल्पितद्रव्यादिषट्पदार्थसद्भावेनाद्वैत-विरोधं परिहर्तुं तदनिर्वचनीयतां प्रपञ्चयितुमुपक्रमते ।

* *

दण्डपुरुषसम्बन्धानां दण्डिविशेषणत्वाद्दण्डिनि व्यवह्रियमाणे तेषामपि व्यवहार इति शङ्कते—तदिति । विशिष्टवैशिष्ट्यं यत् तस्य . . . . . . . दण्डादिव्यवहारनियामकत्वमिति परिहरति—नेति । तदपि वैशिष्ट्यं देवदत्तादिविशिष्टतया व्यवहारनियामकं स्या . . . . . . . . . . व्यवहारनियमो न स्यात् । किं त्वनवस्थामात्रं परिशिष्यत इत्यर्थः । इदानीं विशिष्टस्य विशेषण.

R. No. **4206.**

Paper $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 58 Lines, 20 in a page. Grantha. Good

Transcribed in 1922-23 from a MS. of M R Ry. Narayaṇa Nambūdirippād, Kutalur-mana, Tritala, Malabar district.

**लघुभास्करीयम्, व्याख्यासहितम्.**

LAGHUBHĀSKARĪYAM WITH COMMENTARY.

Fol. 58*b* is left blank

A commentary on the ~~Laghu~~bhāskarīya, which work has been described under No 13474 of the D.C.S. MSS., Vol XXIV: by Paramēśvara.

Complete in eight Adhyāyas.

**Beginning:**

विश्वस्यात्मा शशाङ्कार्धभूषणो यस्त्रयीमयः ।
सोऽनेककिरणो हंसो मानसे नः प्रकाशताम् ॥
अर्थो यो भास्करीयस्य श्रुतो गुरुमुखान्मया ।
अस्मै स मन्दमतये सङ्क्षेपेणोपदिश्यते ॥

तत्र तावद्विघ्नशमनपूर्वकत्वात्क्रियानिष्पत्तेस्तस्य च (स्वे) ष्टदेवतानमस्काराधीनत्वादिष्टदेवतानमस्कार क्रियते—

भास्कराय नमस्तस्मै स्फुटेयं ज्योतिषां गतिः ।
प्रक्रियान्तर(तद्)भेदेऽपि यस्य गत्यानुमीयते ॥

इति रविगतिसिद्धकालावगत्या हि (ज्योतिर्ग)त्यवगति(:) । यदा परस्परं भिन्नास्तदपि रविगत्यैव स्फुटगत्यवगती इतीष्टदेवतामादित्यं नमस्कृत्यानन्तरमाचार्यमार्यभटं (नम)स्करोति—

कार्ये(ले)महति वा देशे स्फुटार्थं यस्य दर्शनम् ।
स जयत्यार्यभटोऽब्धिप्रान्तप्रोछ्ङ्घितसद्यशाः ॥
नालमार्यभटादन्ये ज्योतिषां गतिवित्तये ।
तत्र भ्रमन्ति तेऽज्ञानबहुलध्वान्तसागमे(रे) ॥ इति ।

* * * *

**Colophon:**

इति पारमेश्वरे प्रथमोऽध्यायः ॥

**End:**

विस्तरग्रन्थभीरूणां ग्रहसद्वर्त्मवित्तये ।
निबन्धः कर्मणां प्रोक्तो भास्करेण समासतः ॥

विस्तरग्रन्थभीरूणां पुरुषाणां ग्रहसद्वर्त्मवित्तये ग्रहाणां स्फुटचारासिः भास्करेण कर्मणां निबन्धः प्रोक्त इति ।

मन्दबुद्धिहितायैवं गुरुपादाब्ज(सेविना) ।
(परमादीश्वरेणार्थः सं)क्षेपेण प्रदर्शितः ॥
मतङ्गजस्य मत्तस्य मृगपोतस्य चोभयोः ।
वृत्तिर्हि दृश्यते तस्मात्प्रवृत्तिर्मे वियुज्यते ॥
परमेश्वरेण रचितं व्याख्यानं भास्करोक्तशास्त्रस्य ।
एतच्चिराय विलसतु करौघमिव भूतले दिनकरस्य ॥

**Colophon:**

इति पारमेश्वरे अष्टमोऽध्यायः ॥

---

R. No. **4207.**

Paper. 10¾ × 9¼ inches. Foll. 48. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry. Kōyilkandādai Vidvān Śrīraṅgācāriyar, son of Aḻagācāriyar, North Mada street, Srivilliputtur, Ramnad district.

Fol. 24*b* is left blank.

## श्रृङ्गारजीवनभाणः.

## ŚṚṄGĀRAJĪVANABHĀṆAḤ.

An amative play in one Act, technically known as Bhāṇa. It describes the love and marriage of Sambhōgaśēkhara and Ratnāvalī: by Varadācārya, son and pupil of Śaraṇyācārya who was the son of Śrīnivāsācārya of Bhūtapurī (Śrīperumbūdūr) and who belonged to Kauśikagōtra. It is stated that Śrīnivāsācārya had a younger brother named Campakācārya.

Complete.

**Beginning:**

सौन्दर्ये सकलोपमानमभवद्योऽसौ विनाऽप्यङ्गकं
यद्बाणाः पतनं विनापि जगतां चित्तं हरन्ति क्षणात् ।
यत्सैन्ये करिणां . . . . . . . . शुण्डाशिरोभ्यां परे
स श्रीमान् रतिनायको वितरतां तुङ्गोदयं मङ्गलम् ॥

(नान्द्यन्ते सूत्रधारः ।)

नीलालिङ्गनसङ्गिकुङ्कुममरा दृष्ट्वेर्ष्यया राधया
सख्यः पश्यत नीलरत्नफलके बालातपस्योदयः ।
इत्युक्ते रुचिरस्मितो मुरहरः संश्लिष्य वेगेन तां
मुग्धे! कौस्तुभ एव वक्षसि मे(मम) व्यामोहयन् मङ्गलम् ॥

(इति पुष्पाञ्जलिं विकीर्य, नेपथ्याभिमुखमवलोकयन्) अये निर्व्यूढ एव रङ्गमङ्गलविधिः ।

तुङ्गो मृदङ्गनादः शिखिवाहनमत्र संनिधापयति ।
वेगेन हंसवाहम(न)विगलितसेवा कु(तू)हलं तनुते ॥

* * * *

सूत्रधारः—श्रूयताम्, अस्यां किल भूतपुर्यां

*

क्षोणीगीर्वाणवन्द्यः कुशिककुलमहासौधरत्नप्रदीपो
भूम्ना व्यासविशेषो जयति गुरुमणिः श्रीनिवासार्यनामा ।

पारिपार्श्वकः—भाव! कस्त्र वा श्रवणपदवीदवीयानयमाचार्यः ?

. . . . . . . . . . . . . . . . . . . . . .

वाचामाचान्तमाध्वीमधुरिमलहरीमाधुरीसाधुरीतिः ।

श्रीमद्रामानुजार्यश्रुतसरणिसदाबद्धघण्टानुसारी
सोऽयं यस्यानुजोऽभूत् प्रथितगुणगणश्चम्पकाचार्यवर्यः ॥

सूत्रधारः—एवमेतत् ।

तस्याभूत्तनयो दयोदधिरधिक्षिप्तारुणस्तेजसा
जैत्रच्छात्रकदम्बकल्पितकथादूरीभवद्दुर्मतः ।
यस्याख्यैव शरण्यदेशिक इति प्रख्यातिशालिन्यसौ
व्याख्यात्यात्मगुणाननन्यसुलभान् काकुत्स्थसाधारणान् ॥

* * * *

तस्यापि तनयः कश्चिद् वरदो नाम यस्य धीः ।
सत्कृपामृतसंसिक्ता प्रसूते कवितासुमम् ॥

* * * *

पारिपार्श्वकः—साधु समर्थितं, भाव! किमभिधानकं तद्रूपकम्?

सूत्रधारः—

प्रथमरसस्य कथं वा संबुद्धिर्वृत्तितोयथोन्ना(योर्ना)मा(म्ना) ।
साधारणाङ्कितमेतत्प्र(मिदं प्र)श्नोत्तरयुग्ममस्य नाम स्यात् ॥

पारि—(विचिन्त्य) शृङ्गारजीवनमित्युक्तं भवति ।

(नेपथ्ये नटी गायति) ।

* * * *

सूत्र—एष सम्भोगशेखरः, कस्याश्चित्कामिन्या भवने रजनीमपनीय प्रबलप्रयोजनान्तरितान्तरङ्गः इत एवाभिवर्तते । तदावामप्यस्मत्कुलमेव गच्छावः (इति निष्क्रान्तौ) ।

(प्रस्तावना) ।

(ततः प्रविशति सम्भोगशेखरः) ।

सं.शे. पूर्वेद्युः किल—

रत्नावली रतिपतेर्जयवैजयन्ती वेश्मागता व्यजनमारुतसेव्यमाना ।
स्मित्वा शनैरतनुबाणसमैरपाङ्गैरालोक्य मां प्रणयगद्गदकण्ठमूचे ॥

यत्किल, महाभाग! रसिकजनचूडामणिना भगवतः केशवस्य कल्भोत्सवानन्तरं मया प्रयोज्यमानं रतिपञ्चबाणं नाम नाट्यं दर्शनपथातिथीकार्यम्, न तन्मेऽस्ति यद्भावो नानुमोदति, तदिदं तस्या आज्ञापनं, नान्यत्र ज्ञानपूर्वकव्यापारं ममापादयति, ततश्च ।

दिनकर(कर)प्रचार(ण)दुस्सहमपनीय दिनमहं कृच्छ्रात् ।
चन्द्रिकयेव चकोरो लप्स्ये तन्नात्र्याविद्यया हर्षम् ॥
(सवितर्कौत्सुक्यम्)
नताङ्ग्या नाट्यान्ते विनमद्वलग्राहितकरं
स्थितं व्यातन्वन्त्या मुखमुदितमुग्धस्मितरुचि ।
उदञ्चद्धर्माम्बुस्तबकितललाटं तरलित-
श्रमोभूष(?) घ्रातं यदि मम न तुल्योऽस्ति भुवने ॥

**End:**

भाव! यद्यपि कुसुमेषुरेव युवयोः प्रणयबन्धे साक्षी, तथापि स्नेहो मुखरयति माम् ।

प्रतिकलनवानुरागः त्वमेव रत्नावलीं चिरं भुङ्क्ष्व ।
न हि चन्द्रिकां चकोरादन्यः कश्चित्पिपासया भजते ॥ इति ॥

(सानन्दाङ्गीकारं) सखि! परमनुगृहीतोऽस्मि, सर्वे किं ब्रूथ? किं ते भूयः प्रियमुपहराम इति? किमतोऽप्यन्यत् ।

* * * *

**Colophon:**

इति श्रीकुशिककुलतिलकश्रीनिवासाचार्यचरणनलिनचञ्चरीकेण तत्तनय-श्रीशरण्यगुरुकृपालब्धसकल(कला)कलापेन वरदकविना कृतं शृङ्गारजीवनं नाम भाणरत्नं समाप्तम् ॥

## R. No. 4208.

Paper. 10¾ × 9¾ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī and Grantha Good.

Transcribed in 1922-23 from a MS. of M.R.Ry Narayaṇa Nambūdirippād, Kutalur-mana, Nareri, Tritala, Malabar district

(a) अद्वैतप्रकाशः.

ADVAITAPRAKĀŚAḤ

Foll. 1*a*—27*b*. Fol. 28 is left blank.

A short treatise in the form of conversation between a teacher and pupil, bringing out the substance of the Brahmasūtras in accordance with the Advaita-Vēdānta: by Durgāprasādayati alias Nārāyaṇapriya, disciple of Gōvindaśramayati. The author herein mentions one Rāmatīrtha.

Complete in nine parts.

**Beginning:**

मांहेत . . . . . ब्रह्माभिन्ना जगद्धितायैव ।
इच्छात्तशिलादेहा करोतु तूर्णं मयि स्वसंपातम् ॥
सर्वज्ञं सर्वगं नित्यं सच्चिदानन्दविग्रहम् ।
अभीष्टसिद्धये रामं प्रणतोऽस्मि सनातनम् ॥

* * * *

सन्त्यक्तगवादेरपि गवादि यस्य परलोकहितकारि ।
गोविन्दाश्रमनिष्ठं गोविन्दाश्रममहर्निशं वन्दे ॥

लोकश्रोत्रगतेऽप्यनल्पसुखदं तद्द्वारतोऽन्तर्गते
(विच्छि)न्नान्तविवर्जितादिसुखदं नित्यामरत्वप्रदम् ।
जीयाच्छ्रीविबुधादृतं च समतां गच्छत्परेणापि स-
द्व्याख्यानामृतमद्भुतं भगवतश्श्रीरामतीर्थस्य तत् ॥
बाहुश्रुत्यादिहीनोऽपि गुरुवाक्यात्परं पदम् ।
काङ्क्षमाणाय शुद्धाय कुर्वेऽद्वैतप्रकाशकम् ॥

इह खलु कश्चित्परमहंसश्रेष्ठो ब्रह्मोपासनसमये कदाचित्कचित्कंचिदार्तस्वरं शुश्राव । तच्छ्रवणाद्दयाप्रचलितचित्त उन्मील्य लोचने क्व वा कुतो वा कस्य वैष इति परित आलोकयांचकार । तदा झटिति स्वपुरत एव दीनवदनं कंचिद्ब्राह्मणमपश्यत् । ततस्स ब्राह्मणस्तत्पादयोः रक्ष रक्ष भगवन् शरणं भव शरणं भवेति कृताञ्जलिपुटः पपात ।

*

तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति स्वसुखस्याप्यनित्यतां सोपपत्ति वदति । अतः श्रुत्यनुकूलमेव ते वचः । अथापेक्षितं वस्तु त्वं स्वयमेव प्रदर्शयालं कालक्षेपेणेति ।

* * * *

**Colophon:**

इत्यद्वैतप्रकाशेऽस्मिन् सफले लोकसौख्यदे ।
हास्यात्स्वीकार्यतो वैषः प्रथमो भाग ईरितः ॥

प्रधानसाङ्ख्यत्रिगुणप्रधाने प्रधानता कारणतानिमित्तम् ।
इच्छत्यहो शब्दनिरस्तभावेऽभावादयो मत्परगीर्भयाः स्युः ॥

**Colophon:**

इत्यद्वैतप्रकाशेऽस्मिन् सफले लोकसौख्यदे ।
हास्यात्स्वीकार्यतो वैष षष्ठो भागस्समीरितः ॥

प्रथमोऽध्यायः ॥

त्रिंशत्सङ्ख्यान्यत्राधिकरणानि ॥

**End:**

कृतस्यास्य प्रबन्धस्य यत्फलं तत्पदाब्जयोः ।
समर्पितं परानन्दं शार्ङ्गिणो मुक्तिदायिनः ॥
प्रबन्धदर्शनात्पूर्वं योऽस्य दोषान् प्रपश्यति ।
तस्मै दुष्टाय नैवैष किं तु तत्त्वदिदृक्षवे ॥
गुरूक्तवर्त्मना गच्छन् शास्त्रदीपप्रकाशवान् ।
अप्यज्ञानमहाध्वान्तादगमन्नात्र सुस्फुटम् ॥
गोविन्दाश्रमगुरुकः कृतवास्त्व(वांस्त्वा)देशमेतमल्पमतिः ।
दुर्गाप्रसादसुयतिः प्रियान्तनारायणश्च नामायम् ॥

**Colophon:**

इत्यद्वैतप्रकाशेऽस्मिन् सफले लोकसौख्यदे ।
हास्यात्स्वीकार्यतो वैष नवमो भाग ईरितः ॥

चतुर्थाध्याये त्रिंशत्सङ्ख्यान्यधिकरणानि । फलकथनं समाप्तम् ॥

अद्वैतप्रकाशोपदेशश्च समाप्तः ॥

---

Transcribed in 1922–23 from a MS. of M.R.Ry. Śaṅkara Nambūdirippāḍ, Perumpalli-mana, Pazhanji post, Cochin State.

(*b*) श्रीपादसप्ततिः.

ŚRĪPĀDASAPTATIḤ.

Foll. 29*a*—36*b*.

Seventy stanzas in praise of the holy feet of Pārvatī worshipped at Muktipurī: by Nārāyaṇa.

Complete.

**Beginning:**

यत्संवाहनलोभिनश्शशिकलाचूडस्य हस्ताम्बुज-
स्पर्शेनापि च लोहितायति मुहुस्त्वत्पादपङ्केरुहम् ।
तेनैवोद्धतकासरासुरशिरश्शृङ्गाग्रसंचूर्णन-
प्राचण्ड्यं तदनुष्ठितं किल तथा मुक्तिस्थलस्थे शिवे ॥

**End:**

पार्वत्याः पदमत्र दृश्यमिति वा पादे भवत्त्वेन वा
साधुत्वात्तदुपास्तये हिततया पद्यान्यमूनि स्फुटम् ।
सैषा मुक्तिपुरीगिरीन्द्रतनयातोषाय नारायणे-
नाबद्धा खलु सप्ततिर्दिशतु वः कल्याणहल्लोहलम् ॥

दक्षाधःकरपल्लवे लसदसिं दक्षोर्ध्वके शूलिनि(नीं)
वामोर्ध्वे फलकोज्वलां कटितटीन्यस्तान्यहस्ताम्बुजाम्
शूलाग्राहतकासरासुरशिरोनिष्ठां प्रहृष्टां सुरैः
जुष्टामिष्टफलप्रदां भगवतीं मुक्तिस्थलस्थां भजे ॥

**Colophon:**

इति श्रीनारायणविरचिता श्रीपादसप्ततिस्समाप्ता ॥

R. No. **4209.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 62. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS. of M R Ry. Muṇḍapākam Pārvatīśvara Śāstrigāru, Chatrapur, Ganjam district.

(*a*) त्रिपात्तत्त्वविवेकः.

TRIPĀTTATTVAVIVĒKAḤ.

Foll. 1*a*—5*b*. Fol. 6*a* gives three stanzas on Advaita-Vēdānta

An Advaitic exposition of the nature of supreme Brahman as Tripād-Nārāyana: by Rāmacandra, pupil of Vāsudēvēndra.

Complete.

R. NUMBER 1209 6215

**Beginning :**

यत्सर्वशास्त्रसिद्धान्तं यन्नानामतसम्मतम् ।
यदविद्यापदग्रासं तत्त्रिपाद्वैभवं भजे ॥
नत्वा श्रीदेशिकं मुक्तिमिच्छतां तत्प्रसिद्धये ।
स्वेतरानेकभिन्नासत्त्रिपाद्याथात्म्यमुच्यते ॥
द्वैताद्वैतभिदास्पृष्टत्रिपान्नारायणात्मनि ।
तदङ्गैश्चतुरंशाढ्योऽविद्यापादः प्रकल्पितः ॥
स्वच्छातिपाण्डुरारक्तगाढकृष्णोपलात्मसु ।
मायापादांशेषु साम्यसत्त्वमिश्रादिरूपिषु ॥
त्रिपाद्भूतिप्रवाहोऽयं प्रवहत्येकरूपतः ।
स्वभावसिद्धमाधुर्या त्रिपाद्भूतिर्महानदी ॥
सदैकरसरूपापि मायापादांशयोगतः ।
विचित्ररसवद्भाति नित्यलीलादिभेदतः ॥

*  *  *  *

कर्मोपासनविज्ञानभेदात् काण्डत्रयं भवेत् ।
विभूतीनां शरीरादेरतिरिक्तात्मसिद्धये ॥
विस्तारयामास कर्मकाण्डं कामप्रलोभतः ।
शृणुध्वं भूतयो (यशो)मत्तः श्रेयसे वो हितं वचः ॥

**End :**

आत्मानात्मविवेकोऽयं मुधैव क्रियते श्रुतेः ।
एतच्छास्त्रपरिज्ञानाद्विद्वत्तापदगामिनाम् ॥
त्रिपाद्भूत्यतिरेकेण जडमोहादिभूतयः ।
नेतीति स्वत्वविज्ञाने जाते सति ततः परम् ॥
द्वैतादिमतभेदेषु सत्स्वप्यज्ञानदृष्टितः ।
खण्ड्यं मतान्तरं किं स्यात्सर्वं त्रैपदमेव हि ॥

**Colophon :**

वासुदेवेन्द्रसच्छिष्यरामचन्द्रेन्द्रयोगिना ।
त्रिपात्तत्त्वविवेकोऽयं कृतस्तुष्यन्तु पण्डिताः ॥
त्रिपात्तत्त्वविवेकोऽयं द्व्यशीतिग्रन्थसंमितः ।

(*b*) भेदध्वान्तप्रचण्डमार्तण्डम्.

BHĒDADHVĀNTAPRACAṆḌAMĀRTAṆḌAM.

Foll. 6*b*—12*b*.

A hostile criticism in 100 stanzas of the dualistic theory of Vēdānta. The author salutes Vāsudēvēndrayati.

Complete.

**Beginning:**

स्वोद्भूतमायोत्थभिदागजेन्द्रप्रभेदपञ्चास्यमपारबोधम् ।
त्रिपाद्विभूतीश्वररामचन्द्रं नमामि मायोत्थभिदाप्रशान्त्यै ॥
स्वकल्पितानेकभिदाप्रपञ्चाधिष्ठानमाद्यं निगमान्तवेद्यम् ।
कालत्रयाबाध्यमपारसौख्यं श्रीवासुदेवेन्द्रगुरुं भजेऽहम् ॥
सकृत्प्रणामाद्बहुदुष्कृतघ्नं नत्वा त्रिपाद्देशिकसार्वभौमम् ।
मायाभिदाध्वान्तविभेदचण्डमार्तण्डसंज्ञं शतकं प्रकुर्वे ॥
निर्माय भूमात्मनि निर्विकल्पे नारायणे निष्कलबोधरूपे ।
उच्चावचानेकभिदाकदम्बं स्वाज्ञानतः कल्पितमेव मूढैः ॥
रज्ज्वां यथाज्ञानभवः फणीन्द्रस्साक्षात्कृते नश्यति रज्जुतत्त्वे ।
स्वाज्ञानतः कल्पितभेदपूगस्स्वज्ञानमात्राद्विनिवर्तते सः ॥

**End:**

कूलाद्यविद्याद्वयभेदनाशात् कालादिभेदे तनुतां प्रयाते ।
वालाग्रकोट्यंशसुसूक्ष्मसूक्ष्मे ज्वालाद्वयानन्दघनोऽहमस्मि ॥
एवं प्रकारेण गुरोस्समीपे शिष्यानुभूतिं प्रतिपाद्य पश्चात् ।
निरिन्धनज्योतिरिवोपशान्तो विदेहकैवल्यपदं प्रयाति ॥

**Colophon:**

जगद्भिदाध्वान्तदिवाकराख्यप्रबन्धतात्पर्यविशारदो यः ।
स भेदविभ्रमवर्जितस्सन् त्रिपात्परब्रह्मतयावतिष्ठेत् ॥

---

(*c*) गुणत्रयविवेकः.

GUṆATRAYAVIVĒKAḤ.

Foll. 12*b*—14*b*.

Same work as that described under No. 4575 of the D.C.S. MSS., Vol. IX. By Svayamprakāśamuni.

Wants the beginning; otherwise complete, but two additional stanzas are given.

स्वयम्प्रकाशमुनिना ज्ञानवैराग्यशालिना ।
निस्त्रैगुण्यपरब्रह्मप्रत्यक्षीकरणे पटुः ॥
गुणत्रयविवेकोऽयं कृतो हरिपदाप्तये ।
गुणत्रयविवेकस्य निर्गुणप्रापकात्मनः ।
ग्रन्थस्त्वेकोनपञ्चाशादिति ज्ञेयो विचक्षणैः ॥

---

(*d*) पञ्चीकरणम्.

PAÑCĪKARAṆAM.

Foll. 14*b*—19*b*.

Slightly different from the work described under R. No. 1391 ante. Almost complete.

**Beginning:**

अव्याजकरुणापूरमज्ञानध्वान्तभास्करम् ।
श्रीरामचन्द्रसंसारपारं नौमि परात्परम् ॥
वेदान्तग्रन्थतात्पर्यग्रहणासक्तचेतसाम् ।
ब्रह्मतत्त्वं स्फुटीकर्तुं पञ्चीकरणमुच्यते ॥
अनिर्देश्यमपि ब्रह्म ह्यध्यारोपापवादतः ।

* * * *

नित्यशुद्धबुद्धमुक्तस्वभावं सच्चिदानन्दलक्षणं त्रिविधपरिच्छेदशून्यं निर्विभागं निर्गुणं निर्मायं शुद्धचैतन्यं ब्रह्मास्ति ।

**End:**

तथा प्रपञ्चाकारेण ब्रह्म स्वाज्ञानदृष्ट्या विवर्तमानमपि कालत्रयेऽपि ब्रह्मत्वं न जहाति । यथा रज्जुं सर्पाकारेण ज्ञात्वा मोमुह्यमानचित्तः कश्चिदा ।

---

(*e*) लिङ्गभङ्गमुक्तिशतकम्.

LIṄGABHAṄGAMUKTIŚATAKAM.

Foll. 20*a*—30*b*.

A treatise in 100 stanzas in the form of prayer to Śrī-Rāma for attaining complete liberation from embodied existence.

Complete

**Beginning:**

यः पूज्यस्सकलामरैर्मुनिगणा ध्यायन्ति यं येन वै
श्रेयोमार्गनियोजितास्सुमतयः कुर्वन्ति यस्मै नमः ।

यस्मात्सर्वमभूत्प्रमातृपटलं यस्यांशकस्त्रैपदे
यस्मिन्नाशमुपैति मायिकपदं तं रामचन्द्रं भजे ॥
श्रीमत्त्रैपदरामचन्द्रपरमानन्दाम्बुधिं चिद्घनं
नत्वा श्रीगुरुवासुदेवयतिराट्पादाम्बुजे चासकृत् ।
मच्चित्तासुविरूपनाशविभवां मुक्तिं प्रवाञ्छन् हरेः
तुष्ट्यै लिङ्गविभङ्गमुक्तिशतकं कुर्वे हृदि स्याद्धरिः ॥
सत्कर्माणि विशुद्धये स्वमनसः कृत्वाथ शुद्धेऽन्तरे
छित्वा कर्मजबन्धनं दृढतरं वैराग्यतीक्ष्णासिना ।
सन्न्यस्य श्रवणादिना स्वमनसो नाशाद्यमापुर्हरिं
दद्यात्कारककर्मभङ्गविभवां मुक्तिं स रामोऽद्य मे ॥

**End :**

आविद्यार्थपदे विरूपनिलयं याते स्वकार्यैस्समं
संशान्ताखिलनामरूपविभवः प्रत्यक्परात्मैक्यकः ।
चातुर्विध्यपदाभिधानरहितो यस्त्रैपदश्शिष्यते
दद्यात्पादचतुष्टयैक्यविभवां मुक्तिं स रामोऽद्य मे ॥
श्रद्धाभक्तिपुरस्सरं रहसि यो विष्णवालये वा पठेत्
नानालिङ्गविभङ्गमुक्तिशतकं तात्पर्यतस्सादरम् ।
तस्य त्रैपदरामचन्द्रतरणिस्स्वाज्ञानमुन्मूलयन्
दास्यत्येव विदेहमुक्तिपदवीं शिष्टत्रिपाद्रूपिणीम् ॥
श्रीमत्पारमहंस्यधर्मनिरतश्रीवासुदेवेन्द्रचि-
त्पादाम्भोजनिवासिषट्पदनिभश्रीरामचन्द्रेन्द्रतः ।
वक्तुं ध्यातुमशक्यमायिकपदालङ्कारसङ्घातत-
छिङ्गाकारविभङ्गमुक्तिशतकं ज्ञातं कटाक्षाद्धरेः ॥

---

(*f*) कैवल्याष्टकम्.

KAIVALYĀṢṬAKAM.

Fol. 31.

Eight stanzas on the nature of self-realization known as Kaivalya. Complete.

**Beginning :**

त्रैपदरामव्यतिरिक्तं महामायिकपादो नह्युक्तः ।
सर्वमिदं त्रैपदमेव तदहं न हि मत्तोऽन्यद्युक्तम् ॥

देशिकपादं हृदि भाव्यं निखिलप्रलयाद्यत्संभाव्यम् ।
त्वां तदसीत्येव विभाव्य कृतकृत्यपदं यामो भाव्य ॥

**End :**

त्रैपदरामाभिधचन्द्र परिपूर्णसुखाकरोपेन्द्र ।
पादसरोजातसुसान्द्र शरणागतमस्करिवर्येन्द्र ॥

**Colophon :**

प्रतिप्रभातं भक्त्या यः कैवल्याष्टकमादरात् ।
गायेद्रामार्पितधिया स कैवल्यपदं व्रजेत् ॥

Foll. 31*b* and 32*a* give the Ślōkatraya of Rāmacandrēndra.

---

(*g*) तत्त्वम्पदार्थलक्ष्यैक्यशतकम् .
TATTVAMPADĀRTHALAKṢYAIKYAŚATAKAM.

Foll. 33–37.

Same work as that described under No 4586 of the D.C.S. MSS., Vol. IX. By Rāmacandrēndra, pupil of Vāsudēvendra.

Complete.

Fol. 38 gives Rāmacandradayāṣṭaka of Rāmacandrēndra.

---

(*h*) कर्माकर्मविवेकनौका.
KARMĀKARMAVIVĒKANAUKĀ

Foll. 39*a*—43*b*.

Same work as that described under No. 4572 of the D.C.S. MSS., Vol IX, wherein see for the beginning. By Rāmacandra, disciple of Vāsudēva.

Complete.

**End :**

नौस्तारयेत्सरित्पारं स्वारूढा पारवर्जितम् ।
अविद्याकर्मजलधिं स्वद्रष्टॄनपि नौरियम् ॥
नौकामिमां प्रपश्यन्तु चक्षुष्मन्तो मुमुक्षवः ।
तरन्तु कर्मजलधिं यातु विष्णोः परं पदम् ॥

**Colophon :**

वासुदेवेन्द्रसच्छिष्यरामचन्द्रेन्द्रयोगिना ।
कर्माकर्मविवेकोऽयं कृतो हरिपदाप्तये

(*i*) परमाद्वैतदर्शनम्.

PARAMĀDVAITADARŚANAM.

Foll. 43*b*—55*b*.

A short treatise on the attainment of liberation through the realization of the identity of the individual soul with supreme Brahman: by Rāmacandrēndra, disciple of Vāsudēvēndra.

Complete

**Beginning:**

सत्यज्ञानसुखाकारं स्वाविद्यातमसः परम् ।
निगमान्तालिसञ्चारं नौमि रामनिशाकरम् ॥
नत्वा श्रीदेशिकपदं कैवल्यानन्दमिच्छताम् ।
तत्प्राप्त्युपायपरमाद्वैतदर्शनमुच्यते ॥
मायात्रिगुणसम्भूतद्वैताद्वैतभ्रमादपि ।
परमत्वेन सिद्धत्वात्परमाद्वैतमुच्यते ॥

**End:**

अस्तीति यो वदेत्तस्य सद्यो मुक्तिकथापि न ।
तस्माज्ज्ञानोदयसमं निरस्य स्वेतरं मुनिः ॥
नित्यलीलामोहजडाविरलत्रैपदं भवेत् ।
आह ह्येवं श्रुतिततिर्द्वैताद्वैतविलक्षणम् ॥

**Colophon:**

वासुदेवेन्द्रसच्छिष्यरामचन्द्रेन्द्रयोगिना ।
परमाद्वैतसाम्राज्यदर्शनं सम्यगीरितम् ॥
चतुस्त्रिंशद्ग्रन्थयुतं परमाद्वैतदर्शनम् ।

---

(*j*) परमाक्षरविवेकः.

PARAMĀKṢARAVIVEKAḤ.

Foll. 46*a*—47*b*.

A short exposition of supreme Brahman, conceived of as the Akṣara or the imperishable: by Rāmacandrēndra.

Complete.

**Beginning:**

यत्र प्रत्यक्परचितोर्भेदाभेदभ्रमो न हि ।
अनाधेयमनाधारं तं रामं प्रणतोऽस्म्यहम् ॥

नत्वा श्रीदेशिकं मुक्तिमिच्छतामकुतोभयम् ।
स्वान्यभिद्ग्रासपरमाक्षरयाथात्म्यमुच्यते ॥
क्षराक्षरात्मकाविद्यापादाधिष्ठानमोहृतः ।
परमत्वेन सिद्धत्वात्परमाक्षरमुच्यते ॥

**End:**

ब्रह्मातिरिक्तपर्याया ह्यनन्ता भावरूपिणः ।
ब्रह्मभावात्मकं मायाभावरूपेति बोधतः ॥
आधाराधेयवैरल्यब्रह्ममात्वं भवेन्मुनिः ।
निर्बीजब्रह्मविज्ञानान्निर्बीजं स्यादिति श्रुतेः ॥

**Colophon:**

रामचन्द्रेन्द्राविर्भूतपरमाक्षरदर्शनम् ।
यो जानात्यर्थतस्सोऽपि परमाक्षरतामयात् ॥
ग्रन्थाष्टाविंशतियुतं परमाक्षरदर्शनम् ।

---

(*k*) सत्तासाम्यविवेकः.

SATTĀSĀMYAVIVĒKAḤ.

Foll. 48*a*—52*a*.

A short exposition of supreme Brahman conceived of as the one absolute reality identical with the all-embracing Satta or existence: by Rāmacandra, disciple of Vāsudēvēndra.

Complete.

**Beginning:**

स्वाज्ञा(ना)रोपासद्ग्रसनवेदमस्तकमानतः ।
निर्विशेषतया सिद्धरामानन्दार्णवोऽस्म्यहम् ॥
नत्वा श्रीदेशिकं सद्यो मुक्तिसाम्राज्यमिच्छताम् ।
तद्रूपसत्तासामान्यावाप्तिसाधनमुच्यते ॥
स्वाज्ञदृङ्निष्ठवैषम्यसर्वस्वं स्वेतरं स्मृतम् ।
स्वेतरासहचैतन्यं सत्तासामान्यमुच्यते ॥

**End:**

परमाद्वैतपक्षे तु शास्त्रज्ञानसमं मुनिः ।
विकलेबरकैवल्यमाप्नोतीति निरङ्कुशम् ॥

**Colophon :**

श्रीवासुदेवेन्द्रशिष्यरामचन्द्रेन्द्रयोगिना ।
सत्तासाम्यविवेकोऽयं कृतस्तुष्यन्तु पण्डिताः ॥
सत्तासाम्यविवेकोऽयं ग्रन्थः स्यात्सप्तसप्ततिः ॥

(*l*) भक्तिस्वरूपविवेकः.

BHAKTISVARŪPAVIVĒKAḤ.

Foll. 52*b*—58*b*.

On devotion to god Rāma as a means of salvation: by Rāmacandra disciple of Vāsudēva

Complete.

**Beginning :**

अमलकमलनेत्रं भावितानन्दगात्रं
शशधरनिभवक्त्रं योगिनां ध्यानपात्रम् ।
जितदशमुखगोत्रं मोक्षमार्गैकसूत्रं
दशरथहितपुत्रं नौमि सीताकलत्रम् ॥
नत्वा श्रीदेशिकं भक्त्या श्रीरामानन्दमिच्छताम् ।
तदाप्त्युपायश्रीरामानन्दभक्तिरिहोच्यते ॥
रमते यत्र कैवल्यानन्दश्रीस्स्वात्मरूपिणि ।
तद्ब्रह्म सत्तासामान्यं श्रीरामानन्द ईरितम् ॥

**End :**

इत्यादिश्रुतिसाहस्रवर्तमानप्रयोगतः ।
शास्त्रज्ञानसमकालं कैवल्यं याति नान्यथा ॥

**Colophon :**

श्रीवासुदेवेन्द्रशिष्यरामचन्द्रेन्द्रयोगिना ।
उपेयभक्तेर्विवेकः कृतो गुरुकटाक्षतः ॥
सप्तदशाधिकशतग्रन्था भक्तिविवेककः ॥

Foll. 59*a*—61*a* give the Ēkamēvādvitīyaśrutyarthavicāra. Foll. 61*b*—62*b* are left blank.

---

R. No. **4210**.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of Śrīmān Sārathikavicandra of Mandasa, Ganjam district.

(*a*) व्रजकौतुकामृतम्.

VRAJAKAUTUKĀMṚTAM.

Foll. 1*a*—74*b*.

A poem describing the incidents that happened during the boyhood of Lord Kṛṣṇa, while he was at Gōkula and up to the killing of Kaṃsa in single combat: by Kuñjavihārikavicandra.

Contains the Sargas 1—15 complete and breaks off in the course of the 16th Sarga.

**Beginning:**

नमन्निलिम्पावलिमौलिविस्फुरत्किरीटमाणिक्यमरीचिवीचिभिः ।
चिराय नीराजनराजिराजितं स्मरामि राधारमणाङ्घ्रिसारसम् ॥
सरस्वतीपादसरोरुहोदरस्फुरत्परागप्रसरप्रसादतः ।
भवे भवेयं कवितावितानकप्रकल्पनारम्भविजृम्भिताननः ॥
विनायकोदारपदारविन्दयोः समेत्य सेवात(रणिं) तराम्यहम् ।
असीमवैराग्यमषीमलीमसी सरस्वती मे प्रसरीसरीति चेत् ॥
* * * *
पुरन्दरोदारपुरीसहोदरी व्रजाभिधाना नगरी गरीयसी ।
मणीघृणिश्रेणिसुरामणीयकास्पदा वरीवर्ति सदा सदाश्रया ॥
अरञ्जनार्ह्यप्यनुरञ्जना सतां नभोगशालिन्यपि भोगशालिनी ।
पुरी चमत्कारकरी रराज या हतादराप्यादरभावभाविता ॥
* * * *
पुरन्दरोदारमही महातपा धनाधिपश्रीः पृथुतुन्दसुन्दरः ।
अमन्दजानन्दधुरत्र वन्दितो ननन्द नन्दा(ख्य)महीपुरन्दरः ॥
* * * *
प्रबुध्यमाना परिचारिकागणैः ननन्द सा नन्दनृपस्य मन्दिरे ।
यशोदयालङ्कृतवानपि स्वयं कृतादरोऽसौ नृपतिर्यशोदया ॥
* * * *
हारीतान्वयमुग्धदुग्धजलधेर्गम्भीरगर्भान्तर-
प्रादुर्भावविलासभावसरसः श्रीरामचन्द्रो द्विजः ।
यः सर्वागमसारपारगपटुः यस्याग्रजन्मा सुधीः
धीरेन्द्रः स दयानिधिः कविविधुस्सोऽहं कवीन्द्रस्ततः ॥
यस्यास्याद्भुतसारसारसलसत्पीठे लुठद्रागिणी
वाणी कुञ्जविहारिणः कविविधोः ख्यातस्य तस्याधुना ।

नव्ये श्रीव्रजकौतुकामृतमये काव्येऽत्र भव्यादृते
दिव्योदस्रसबन्धुरे सुरुचिरे सर्गोऽयमाद्यो गतः ॥

**Colophon :**

इति श्रीकुञ्जविहारिकविचन्द्रकृते व्रजकौतुकामृते महाकाव्ये प्रथमस्सर्गः ॥

**End :**

सर्पान्निस्तार्य नन्दं व्रजपुरवनितानन्दसन्दोहदायी
हत्वा तं शङ्खचूडं पुनरपि दिवसे युग्मगीतानुगीतः ।
रोषान्निर्मोषयित्वा वृषमसुरवरं केशिनं सूदयित्वा
व्योमं(?)निर्मूलयित्वा व्रजनगरमसौ निस्सपत्नं चकार ॥

* * * *

**Colophon :**

इति श्रीकुञ्जविहारिकविचन्द्रकृते व्रजकौतुकामृते महाकाव्ये पञ्चदशस्सर्गः ॥

अक्रूरोऽसौ मधुरिपुसमालोकनायातिहृष्टो
नीत्वा तस्मिन् मधुरिपुवरे स्वे निशान्ते निशां ताम्
प्रातः प्रीतः सदुपकरणो राजमार्गे पुरीं तां
यानारूढः परिबृढदृढादेशतोऽभूद् यियासुः ॥

* * * *

अद्यैवासीन्मम सुदिनता सुप्रभाता निशाबा(भा)
किं वा कल्यं मम नयनयोः जन्मसाफल्यमेतत् ॥
प्रायः श्रेयश्चयमयकृतागण्यपुण्यं मदीयं
कृष्णं द्रष्टुं यदिह सहसा तद्व्रजं संव्रजेयम् ।

(*b*) **कटाक्षषोडशी.**

KAṬĀKṢAṢŌḌAŚĪ.

Foll. 75*a*—76*a*. Fol. 76*b* is left blank.

A devotional lyric in 16 stanzas addressed to Lord Kṛṣṇa's divine glance : by Kavīndracandra.

Complete.

**Beginning:**

संभावयन् विधिशिवौ सकृदिन्दिरायाः
वक्त्रारविन्दपरिरम्भकरस्सुरस्रक् ।
मज्जन् मुहुः स्वशरणेषु निपत्य मग्नो
दीनेषु रक्षतु स मां भगवत्कटाक्षः ॥

* * * *

**End:**

इन्दीवरैरिव किरन् रुचिभिस्समन्तात्
बृन्दावनान्तरमनन्तगुणास्पदं यः ।
आनन्दयत्यनुदिनं व्रजसुन्दरीणां
चेतांसि मेऽस्तु सुखदः स हरेः कटाक्षः ॥
कटाक्षषोडशी सेयं कविचन्द्रविनिर्मिता ।
कलेव कृष्णचन्द्रस्य करोतु जगतां मुदम् ॥

**Colophon:**

इति कविचन्द्रविरचिता कटाक्षषोडशी समाप्ता ॥

R. No. **4211.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS. of M.R.Ry Narāyana Nambūdirippāḍ, Karapala-mana, Shornore.

रामायणप्रबन्धः.

RĀMĀYAṆAPRABANDHAḤ.

Foll. 1*a*—25*b*. Fol. 26 is left blank.

A Campu describing the story of the Rāmāyaṇa.

Incomplete.

**Beginning:**

अस्ति श्रीसरयूतटे जनपदः श्रीकोसलाख्यो महान्
धिक्कुर्वन्निव दिव्यसम्पदुदयत्स्वर्लोकलक्ष्मीमपि ।
यस्मिन्वै कमलालया भगवती नित्यं प्रसादोन्मुखी
भर्तुर्भाविभवं विचिन्त्य परमप्रीत्येव चास्ते स्थिरा ॥

अस्ति किल जगत्त्रयपरित्राणलीलाविचक्षणानामक्षतभजद्द्रविणभूषणानामुज्ज्वलयशःप्रसरचन्द्रिकानिष्यन्दनित्यविकस्वरसुजनमनस्कारकैरवाकराणाममेय-

महिमाद्भुतानामहिमांशुवंशोद्भवानामवनीश्वराणां

* * * *

अवनिवनितातिलकायमानं पुरोत्तममयोध्या नाम ॥

गेहे गेहे नवनवसुधाक्षालितं यत्र सौधं
सौधे सौधे सुरभिकुसुमैः कल्पितं केलितल्पम् ।
तल्पे तल्पे रसपरवशा(शं) कामिनीकान्तबृन्दं
बृन्दे बृन्दे स खलु विहरन् विश्ववीरो मनोभूः ॥

* * * *

सप्तर्तुः परिवत्सरोऽष्टजलधिस्फारं धरामण्डलं
दिक्चक्रं नवनायकं दशरथे धात्रीं परित्रातरि ।
समन्त्रिभिर्मन्त्रहिते निविष्टैः सुमन्त्रमुख्यैः कुशलैः प्रसिद्धैः
अजात्मजो दीप्तिमवाप युक्तस्तेजोमयैर्गोभिरिवोदितोऽर्कः ॥
कौसल्यां नीतिकुल्यामुदवहदभजत्केकयीं कान्तिकुल्यां
हस्ते कृत्वा सुमित्रां तदनु सुवदनां मङ्गलार्थे मुहूर्ते ।
प्रेमप्रीताभिराभिस्तिसृभिरयमपोपुष्यतोत्साहगम्यान्
धर्मान् कामानथार्थानपि भुवनपतिर्भाविकैवल्यसौख्यः ॥

**End:**

तदनन्तरं रामस्सान्त्ववचनवारितसुमन्त्रः ससौमित्रिर्मङ्गलानि प्रार्थयमानया मैथिल्या सह गुहेनोपनीतां नावमारुरोह, स एष निषिध्य निषादाधिपतेरनुगमनमपि तूर्णमवतीर्णसुरसरित्पूरः . . . . . . . . . . . . .

*

सकलसत्त्वचरित्रविचित्रं चित्रकूटाभिधानमचलमाससाद ॥

अनुजरचितपर्णागारहृद्यासु माद्यत्-
परभृतगलचञ्चत्पञ्चमैरञ्चितासु ।
जनकदुहितृयोगाज्जातसाकेतसौख्यः
चिरमरमत रामः चित्रकूटस्थलीषु ॥

---

R. No. **4212.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 64. Lines, 20 in a page. Dēvanāgarī. Good

Transcribed in 1922–23 from a MS. of M.R.Ry. Harihararājaguru, Cocinajagannāthapuram, Kadala post, Ganjam district.

सङ्गीतनारायणः.

SAṄGĪTANĀRĀYAṆAḤ.

This forms the further portion of the work Saṅgītanārāyana described under R. No. 3234 ante, wherein see for the beginning. By Nārayaṇa, son of Padmanābha of the Gaṅga dynasty. For other particulars see R. No. 3234.

Contains from the Rudravīṇādhyāya portion of the second Paricchēda to the end of the fourth Paricchēda. The MS. described under R. No. 3234 and this MS. make up a complete copy of the work.

**Beginning:**

अस्याः शिक्षा तु कर्तव्या दाक्षिणात्योपदेशतः ।
इति रुद्रवीणा ॥
एषैव तु विपञ्ची स्याद्विशेषो विनिगद्यते ।
तन्त्रीद्वयस्य स्थित्यर्थं वामभागे तु काकुभे ॥
उच्चोच्चद्व्यङ्गुलदलं कार्यं लोहसमन्वितम् ।
मन्त्रतन्त्र्यर्थसंसिद्ध्यै दातव्ये अधिके इह ॥
बृहत्यौ सारिके न्यासस्तयोरपि च कथ्यते ।
मन्त्रपञ्चकमासाद्योभयतस्तिष्ठतो यथो(?) ॥
मरणावनुरागिण्यौ(?) कान्तमेकान्तवर्तिनम् ।
इत्यादिलक्षणोपेता रौद्र्येव तु विपञ्चिका ॥
इति विपञ्ची ॥
अथ कापिलासिका ॥
आद्या वीणा तु या प्रोक्ता सैव स्यात्कपिलासिका ।
दशमुष्टिमिता चैकादशमुष्टिमितापि वा ॥

* * * *

ततं वाद्यं च देवानां गन्धर्वाणां च सौषिरम् ।
आनद्धं राक्षसानां च मानवानां घनं विदुः ॥

**Colophon:**

इति घनम् ॥
इति सङ्गीतनारायणे वाद्यनिर्णयो नाम द्वितीयः परिच्छेदस्समाप्तः ॥
नृत्यनिरूपणम् ।
अथ क्रमप्राप्तं नृत्यमाह । तत्रादौ नाट्यवेदोत्पत्तिमाह—
इहानुक्रियते ब्रह्मा शक्रेणाभ्यर्थितः पुरा ।
चकाराकृष्य देवेभ्यो नाट्यवेदं च पञ्चमम् ॥

भरताय ददौ पूर्वं नाट्यवेदं चतुर्मुखः ।
स नाट्य(नृत्य)नृत्तानि शम्भोरग्रे प्रयुक्तवान् ॥

तत्र च—

नर्तनं त्रिविधं नाट्यं नृत्यं नृत्तमिति क्रमात् ॥

तत्र नाट्यं यथा—

योऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः ।
सोऽङ्गाभिनयनैर्युक्तो नाट्यमित्युच्यते बुधैः ॥

*  *  *  *

आलिङ्गनादिशिखरो योगप्रदकलापकौ ।
लेखकश्च किरीटश्च चम्पकश्चेति सप्तकम् ॥
वस्त्रकानामन्यबाहुसंयुतेषु विशारदाः ।
पताकौ स्वस्तिकीभूय स्वल्पसृष्टभुजौ भवेत् ॥
आलिङ्गनाभिधो हस्तस्त चालिङ्गनकर्मणि ।

**End :**

यदधीतं कविरत्न(त्नात्)पुरुषोत्तममिश्रतो मया सुधिया ।
तत्प्रकटीकृतमस्मिन् सुधियस्संशोधयन्तु शतशः ॥

या वा शिवस्यार्धशरीरहर्त्री
जगद्गुरोः पर्वतराजपुत्री ।
वातक्षितीन्द्रस्य(मुदे श्रमोऽयं) नारायणस्य-
(णीयः) [श्रमो मुदेऽस्तु][समुदेतु लोके ॥

**Colophon :**

इति श्रीमन्निखिलान्वयोत्तुङ्गगौडगङ्गवंशावतंसाखिलगुणसद्मपद्मनाभभूमिपति[तत्त](त)नूजन्मनो महाराजाधिराजस्य साहित्यसङ्गीतार्णवकर्णधारकमणेः गजपतिवीरश्रीनारायणदेवस्य कृतौ सङ्गीतनारायणे प्रबन्धोदाहरणं नाम चतुर्थः परिच्छेदः ॥

---

R. No. **4213.**

Paper. $10\frac{3}{8} \times 9\frac{3}{4}$ inches. Foll. 56. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry. Sundararāja Ayyaṅgār, Watrap, Srivilliputtur, Tinnevelly district.

(*a*) तर्पणतत्त्वसारः.

TARPAṆATATTVASĀRAḤ.

Foll. 1*a*—22*b*. Foll. 23 and 24 are left blank.

A treatise dealing with the offering of libations of water to the manes of one's deceased ancestors: by Sudarsanavaradadasa

Complete

**Beginning:**

श्रीशुद्धसत्त्वार्यवरप्रदार्यौ श्रियः पतिं भागवतान् प्रणम्य ।
विद्वन्मुदे तर्पणतत्त्वसारमहं यथाबुद्धिबलं करोमि ॥

लोके धनहारिदौहित्रादन्येऽपि दर्शादौ मातामहादीनां तिलतर्पणं कुर्वन्ति । तादृशः क्रमश्चिन्तनीय इति । तथाप्यवश्यं कर्तव्यमेवेति प्रतिभाति वचनादाचाराच्च । तथाहि दर्शविषये विष्णुः —

स्वधा नमस्तर्पयामीत्येकैकं त्रिस्तिलोदकैः ।
पितृमातामहान् स्नात्वा सस्त्रीकांस्तर्पयेत् क्रमात् ॥ इति ।

**End:**

तथा च प्रपन्नानां दौहित्राणां दर्शोपरागादौ मातामहादितर्पणकर्तव्यत्वं सिद्धम् । प्रपन्नानां सपिण्डसमानोदकानां वासस्तिलोदकतर्पणकर्तव्यत्वं सिद्धमिति प्रामाणिकानां सुन्दरः पन्थाः ॥

**Colophon:**

इति श्रीभगवद्भागवताचार्यश्रीपादपद्मयुगलधूलीसंसर्गधन्यशिरसा बालेन सुदर्शनवरददासेन यथामति प्रकाशितस्तर्पणतत्त्वसारनामकोऽयं ग्रन्थः वात्सल्यैकसिन्धुभिः महाप्राज्ञैस्सज्जनैस्सादरं समुदीक्ष्यताम् ॥

(b) हरिदिनकृत्यविवेकः.

HARIDINAKRTYAVIVĒKAḤ.

Foll. 25a—57b. Fol. 58 is left blank.

A treatise in support of the view that the Śrāddha ceremony should not be performed on the Ēkadaśī day.

Complete.

**Beginning:**

गो(मा)क्रान्तं नत्वा वरदार्यं शुद्धसत्त्वगुरुमार्यान् ।
हरिदिनकृत्यविवेकं तनुते पूर्वा[चा]र्यसरणिमनुसृत्य ॥

प्रमाणशरणाः व्रते सत्येकादशीप्राप्तं श्राद्धं द्वादश्यां कुर्वन्ति । वद्यक्रमेवेति प्रतिभाति; नैकादश्यामित्यादिवचनादाचाराच्च । स्मृति·

पुराणयोः विरोधे स्मृतेर्बलीयस्त्वमिति न्यायेन स्मृतिविरुद्धस्य तस्य पुराणोक्तत्वेन दुर्बलत्वात् । तच्चिन्त्यमिति चेत् अत्रोच्यते देवलादिभिः—

मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदि ।
अभ्यर्च्य पितृदेवांश्च आजिघ्रेत्पितृसेवितम् ॥
पितरस्तु प्रतुष्य(तृप्य)न्ति कामत्वं च प्रसिध्यतीति ।

**End:**

एकादश्यां व्रते सति एकादशीप्राप्तं मातापित्रादिश्राद्धं द्वादश्यां कुर्वन्ति । द्वादश्यामेकादशीव्रते सति द्वादशीप्राप्तं मातापित्रादिश्राद्धं त्रयोदश्यां पारणदिने कुर्वन्तीति सर्वमनवद्यम् ॥

**Colophon:**

इति अनन्तकल्याणगुणामृतोदधिभिः स्वामिभिरार्यवर्यैः एकादशीव्रतप्राप्तश्राद्धपरित्यागवचनं मृग्यं निरूपणीयमित्याज्ञप्तेन श्रीमद्भगवद्भागवताचार्यचरणनलिनसेवोत्सुकमानसेन बालिशेन दासेन पूर्वाचार्यश्रीसूक्तिसरणिमनुसृत्य लिखितं हरिदिनकृत्यविवेकनामकमिमं ग्रन्थं सादरं समुदीक्ष्य तत्तत्स्थलस्थितदोषनिराकरणपूर्वकं परिष्कृत्य

* * * *

न्यस्तभरे मयि दासे सहृदय[हृदयं] सुतरामनुग्रहः कार्यः ॥

---

R. No. **4214.**

Paper. 10⅜ × 9¾ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry. Maṅgattammaṅgār, Vadakkuttirumāḷigai, Alwartirunagari, Tinnevelly district.

श्रीसुन्दरगुरुकाव्यम् .

ŚRĪSUNDARAGURUKĀVYAM

Same work as that described under R. No. 781 ante, wherein see for the beginning. By Sundarācārya.

Date of transcription—Wednesday, the 16th day of the year Prabhava corresponding to Śaka year 1083. Name of the scribe—Dēvarājayyaṅgār of Alwartirunagari.

Contains the Sargas 2—10 complete; but wants 64 stanzas in the beginning of the second Sarga.

**Colophon:**

इति श्रीकुरुकापूर्णवैभवानुभाव्ये श्रीसुन्दरगुरुकाव्ये द्वितीयः सर्गः ॥-

**End:**

उपपादितकारिजप्रभावं वचनैर्व्यासपराशरादिजैः ।
प्रकटीकरणाय तान्यवादीत्सुधियां लक्ष्मणवैदिकोत्तमः ॥

**Colophon:**

इति श्रीकुरुकापूर्णवैभवानुभाव्ये सुन्दरगुरुकाव्ये नवमः सर्गः ॥

विष्णोरर्चावतारेषु लोभ(ह)भावं करोति यः ।
यो गुरौ मानुषं भावमुभौ नरकपातिनौ ॥

* * * *

द्राक्षामधुक्षारसुधासहस्रैः श्रीसुन्दराचार्यवचस्सुगुम्भैः ।
गङ्गापि तुल्या न पदे पदे तद्भङ्गभ्रमौ तत्र तटस्थलक्ष्यौ ॥

* * * *

श्रीशठारिगुणैर्बद्धा ग्राह्या वाणी बुधैरियम् ।
श्रीतुलस्यास्तनु तन्नश्शेषिणाशेषशेषिणा ॥ (?)

**Colophon:**

श्रीसुन्दरगुरुकाव्यं समाप्तम् ॥

---

R. No. **4215**.

Paper. 10¾ × 9¾ inches. Foll. 48. Lines, 20 in a page. Grantha. Good.

Transcribed in 1922–23 from a MS of M.R.Ry. Ittiri-Vāriyar, Karakkāṭṭu dēśam, Kavalapara, Malabar district.

(*a*) नरलाञ्छनम्. or समुद्रसारम्

NARALĀÑCHANAM.

Foll. 1*a*—13*b*.
Same work as that described under No. 4203(*a*) ante.
This work is also called Sāmudrasāra.
Complete.
Foll. 13*b*—16*b* contain Jyautiṣaviṣaya.

(*b*) रणदीपिका.

RAṆADĪPIKĀ.

Foll. 17*a*—31*b*. Fol. 32 is left blank.

A treatise on warfare: by Kumāra, who wrote this work at the instance of Dēva Śarman, brother of a Brahman named Gōda-Śarman of Kerala country.

Contains Adhyāyas 1—8 complete, dealing with the following subjects:—

१. नयविवेकः.
२. यात्रालक्षणाध्यायः.
३. जयविवेकः.
४. कालविवेकः.
५. शूलचक्रादिविवेकः.
६. पञ्च[illegible]रविवेकः.
७. मृगवीर्यविवेकः.
८. भूबलाध्यायः.

**Beginning:**

परमानन्दमात्मानं शिवज्योतिर्मयं वयम् ।
जनानां जीवरूपेण मन्महे हृदि संस्थितम् ॥
या देवी भासते नित्यं कृत्यैः पञ्चभिरेव हि ।
तां नुमः परमानन्ददायिनीमादियोगिनी(म्) ॥
कुमारनामधेयेन गणकेन मयाधुना ।
प्रबोधनार्थं बालानां क्रियते रणदीपिका ॥
आदावेव च गृह्णीयान्नीतिं शास्त्रोदितां पराम् ।
तेजोऽर्थी नृपतिर्नित्यं रणतेजःप्रदायिनीम् ॥
अनीतिज्ञस्समर्थोऽपि रिपुणा परिभूयते ।
गजोऽपि चाम्बुधौ मत्तो मग्नो मत्स्यैर्यथा तथा ॥

* * *

**Colophon:**

इति नयविवेकः प्रथमोऽध्यायः ॥

**End:**

इत्यादिलक्षणं ज्ञात्वा यस्तिष्ठति रणाङ्कणे ।
युद्धाय सार्वभौमस्य सर्वत्र विजयी भवेत् ॥
राजत्केरलराजराजमकुटीराजीपदाङ्घ्रिद्वय-
श्रीगोदाख्यमहीसुरेन्द्रसहजश्रीदेवशर्माज्ञया ।

कृत्वासौ रणदीपिकां रचनया राज्ञां तमोधूननं
बोधायत्यधुना कुमारगणकस्सन्तः प्रसीदन्त्वतः ॥ इति ॥

**Colophon :**

इति रणदीपिकायां भूबलाध्यायोऽष्टमः ॥

(*c*) प्रश्नसङ्ग्रहः.

PRAŚNASAṄGRAHAḤ.

Foll 33*a*—39*a*. Foll. 39*b*—40*b* are left blank.

A short treatise on divination dealing with the Santānapraśna, Vivāhapraśna and Varṣādipraśna.

Complete.

**Beginning :**

आरूढर्क्षादुपचयगते लग्नभादष्ट(प्य)थेन्दौ
स्त्रीत्वे पुंस्त्वे यदि तदुभयोरुद्गमे चापि वह्नौ ।
लग्नारूढादिषु च वनिताभङ्गगस्सिंहगेषु
द्वौ पाजे . प्युपरतफले दुर्लभा पुत्रलब्धिः ॥

* * *

**Colophon :**

इति सन्तानप्रश्नः ॥

**End :**

उत्तमागमभावाप्तिर्वर्षाणां मृगयायुधौ ।
लक्षणं विंशतिश्लोकैरित्येवं प्रश्नसङ्ग्रहः ॥

**Colophon :**

समाप्तः ॥

Foll. 41*a*—47*b* contain the Praśnaviṣaya from Vidyāgama. Fol. 48 is left blank.

---

## R. No. 4216.

Paper 10¾ × 9¼ inches. Foll. 226. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS of M.R.Ry. Harihararājaguru, Cocinajagannāthapuram, Kadala post, Ganjam district.

Foll. 225*b* and 226 are left blank.

अद्भुतसागरः.

ADBHUTASĀGARAḤ.

Foll. 1*a*—225*a*.

On the occurrence of certain abnormal phenomena such as earthquake, whirlwind, etc, the evils they portend and the purificatory ceremonies to be performed to avert these evils: by king Ballālasēnadēva.

Wants 12 stanzas in the Gṛhādyadbhutāvarta; otherwise complete.

**Beginning:**

अथ भौमाश्रये भूकम्पाद्भुतावर्तः । तत्रादावेव भूकम्पोत्पत्तिकारण मुच्यते ।

विष्णुपुराणे—

यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः ।
तदा चलति भूरेषा साद्रितोयाब्धिकानना ॥

तत्र यथाक्रमं काश्यपगर्गवसिष्ठवृद्धगर्गाणां मतम् ।

वराहसंहितायाम्—

क्षितिकम्पमाहुरेके महदन्तर्जलनिवासिसत्त्वकृतम् ।
भूभारखिन्नदिग्गजनिश्श्वाससमुद्भवं चान्ये ॥
अनलोऽनिलेन निहतः क्षितौ पतन् सस्वनः करोत्यन्ये ।
केचित्त्वदृष्टकारितमिदमन्ये प्राहुराचार्याः ॥

इदमन्ये प्राहुराचार्या इत्यस्य गिरिभिः पुरा सपक्षैरित्यादिना वक्ष्यमाणेन सम्बन्धः, तत्र चानिलादिकृतो भूकम्प इति वक्तव्यम् । तथा काश्यपः ।

अर्णवस्योपरि पृथ्वी सशैलवनकानना ।
स्थितास्तन्मध्यगाः सत्त्वास्सङ्क्षोभाच्चालयन्ति ताम् ॥

* * * *

अङ्गारगैरिकाद्यैर्विकृतप्रेताभिलि(ले)खनं यस्मिन् ।
नायकविचित्रमथवा नृपः क्षयं याति नचिरेण ॥
सहामात्योऽथ(र्थ)वलयो(यी) भोज्यानि सुमहान्ति च ।
कारयेत महेन्द्रोऽपि माहेन्द्रीं शान्तिमुत्तमाम् ॥

एतषां फलपाकसमयं पाकाद्भुतावर्ते वक्ष्यामः ।

Colophon:

इति श्रीमहाराजाधिराजनिश्शङ्कशङ्करश्रीम(द्ब)ल्लालसेनविरचितेऽद्भुतसागरे गृहाद्यद्भुतावर्तः समाप्तः ॥

* * * *

अथ पाकसमयाद्भुतावर्तः—

अत्र पराशरः—

तत्रोत्पातफलं दिव्यं पूर्णे वर्षे विपच्यते ।
पुरोत्सवाधिमासानामकालमरणेषु च ॥
शान्तिस्वस्त्ययनानां च पाकष्षाण्मासिको भवेत् ।
आन्तरिक्षं तथा भौमं मासैष्षड्भिस्तथर्तुषु ॥
निर्घातास्तु त्रिभिर्मासैर्गन्धर्वनगराणि च ।
अग्निजास्सप्तरात्रेण मासेनोल्का विपच्यते ॥
पुरचैत्यादिभङ्गेषु पुरसङ्क्रमणेऽपि च ।
नरेन्द्रध्वजभङ्गे च फलं मासाद्विपच्यते ॥

* * * *

मत्स्यपुराणविष्णुधर्मोत्तरयोः—

अद्भुते च समुत्पन्ने यदि वृष्टिश्शिवा भवेत् ।
सप्ताहाभ्यन्तरे ज्ञेयमद्भुतं निष्फलं भवेत् ॥

वटकणिकायां च—

यदि निर्विकारमम्भः पर्जन्यस्त्यजति सप्तरात्रात्तु ।
प्रशममुपगच्छति(च) तत्त्रिविधोत्पातमपि दैवम् ॥

इति पाकसमयाद्भुतावर्तः ॥

Colophon:

इति श्रीमहाराजाधिराजनिश्शङ्कशङ्करश्रीमद्बल्लालसेनदेवविरचितेऽद्भुतसागरे पाकाद्भुतावर्तः ॥

अद्भुतसागरश्च समाप्तः ॥

---

✓ R. No. **4217**.

Paper. 10¾ × 9¾ inches. Foll. 96. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922–23 from a MS. acquired through M.R.Ry. Rāmānujācāryar of Nāvalpakkam, Wandiwash taluk, North Arcot.

Fol. 84*b* is left blank.

/तन्त्रसिद्धान्तदीपिका.

TANTRASIDDHĀNTADĪPIKĀ.

An explanatory treatise on Pūrvamīmāṁsā: by Appayyadīkṣita, son of Appayyadīksita and grandson of Āccādīksita who was the brother of the well-known Appayadīksita.

Breaks off in the first Pada of the third Adhyaya; but wants the first Pāda of the first Adhyāya.

**Beginning :**

अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरूनहं वन्दे ।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजकोपाधी ॥
अखण्डसच्चिदानन्दं खण्डचन्द्रशि(रोमणिम् ) ॥
. . . . . . . . . . . . . मात्मानमात्माश्रये ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।
वायव्यंश्वेतमालभेत—

* * * *

वायव्यं श्वेतमित्याद्यर्थवादानां पूर्वपादान्त्याधिकरणेन वेदावयवत्वाद्विध्युद्देशवत्प्रसक्तं प्रामाण्यमाक्षिप्य समाधीयते । तत्रार्थवाद . . . . . वल्लिङाद्यभावेन धर्माधर्मयोस्स्वं तावन्न प्रमाणानि । नाप्येतमेव सन्तमित्यादिविधिभिराकाङ्क्षन्ते ; न तदेकवाक्यतया प्रमाणानि स्युः ।

* * * *

**Colophon :**

इति श्रीमद्भारद्वाजकुलजलधि(कौस्तुभ)श्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्माणधुरन्धरमहाव्रतयाजिश्रीमदप्पय्यदीक्षितसोदर्यश्रीमदाच्चादीक्षितपौत्रेण रुक्मिणीपरिणयाद्यनेकप्रबन्धनिर्मातुरप्पय्यदीक्षितस्य पुत्रेणाप्पय्यदीक्षितेन कृतायां तन्त्रसिद्धान्तदीपिकायां प्रथमस्याध्यायस्य चतुर्थः पादः ॥

अध्यायश्च समाप्तः ॥

**End:**

तस्मान्नानाशाखागुणानामेककर्मगुणत्वात् सर्वे(र्वं) तूपसंहारफलम् । निरुद्धानां तु विकल्पेनापि उपसंहारकार्यं सर्वेषामेवमुत्पत्तिशिष्टत्वेन तुल्यबलत्वादिति प्रकरणान्तरतदपवादनमात्रमिह पदार्थ इति ॥

**Colophon :**

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिक-शतप्रबन्धनिर्माणधुरन्धरमहाव्रतयाजिश्रीमदप्पय्यदीक्षितसोदर्यश्रीमदप्पय्य(दा-चा)दीक्षितस्य पौत्रेण रुक्मिणीपरिणयाद्यनेकप्रबन्धनिर्मातुरप्पय्यदीक्षितस्य पुत्रेण भूमिदेवीनन्दनेन अप्पय्यदीक्षितेन कृतायां तन्त्रसिद्धान्तदीपिकाया। द्वितीयस्याध्यायस्य चतुर्थः पादः समाप्तः ॥

समाप्तश्च द्वितीयोऽध्यायः ॥

अथातश्शेषलक्षणम् । एवं शब्दान्तरादिभिः कर्मणामप्रत्यक्षादिभिः द्रव्यादीनां च भेदे सिद्धे तदुपजीव्यं तेषां शेषित्वं निरूप्यत इति शिष्य-बुद्धिसमाधानार्थं प्रतिज्ञायते ।

* * * *

तथात्वेऽपि सर्वाणि तानि प्रत्येकं सर्वधर्मप्रयोजकानि प्रकरणाविशे-षादिति प्राप्ते उच्यते—व्रीह्यादिपदैर्व्रीहीणां प्रदेयतया उत्पत्त्यपूर्वीयत्वं व्रीहिभिर्यजेतेति शास्त्रावगतमवलक्ष्यत इति व्रीहिसाध्योत्पत्त्यपूर्वप्रदेयत्वाभा-वात् न स्रुवादावाज्यादौ वा धर्माः कार्या इति ।

---

## R. No. 4218.

Paper. 10¾ × 9¼ inches Foll 116 Lines, 20 in a page Devanāgari. Good.

Transcribed in 1922-23 from a MS of M R Ry M Subrahmaṇya Śāstrigaḷ, Head Pandit, Sanskrit School, Tirukkuṟuṅguḍi, Tinnevelly district

Fol 116 is left blank

वार्त्तिकसारः.

VĀRTTIKASĀRAḤ

Same work as that described under R No 3901(*a*) ante

Contains from Prāmēyaparīksa (Upōdghata) to the end of the fifth Brāhmaṇa of the third Adhyāya; but wants the beginning

---

## R. No. 4219.

Paper 10¾ × 9¼ inches. Foll. 80 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS of M R Ry Śaṅkaran Nambū-dirippāḍ, Kuttimada-mana, Antakot post, Malabar district.

Foll. 1*a*—79*a*. Foll. 79*b* and 80 are left blank.

पदार्थतत्त्वनिर्णयटीका.

PADĀRTHATATTVANIRNAYAṬĪKĀ

A commentary on the Padārthatattvanirṇaya, which work has been described under R No 2981 ante by Ātmasvarūpabhagavat, disciple of Narasiṁhasvarūpa.

Contains much lacunæ; otherwise complete.

**Beginning:**

> ध्यानादानालजाग्रद्धृदयसरसिजज्ञानमैरेयधारा-
> स्वादज्ञस्वात्मतृप्तं यतिवरपरिषत्पूज्यपूज्यं यतीन्द्रम् ।
> भूयो भूयो नमस्यापरिचयपटुना मौल(लि)ना . . .
> . . . . नाराधयामो दिशि दिशि भगवच्छ्रीनृसिंहस्वरूपम् ॥
> प्रणम्य दक्षिणामूर्तिं हरिं तदात्मकं तथा ।
> पदार्थतत्त्वनिर्णयो विभज्यते ह्यबोधनुत् ॥

वक्तृश्रोत्रोस्सम्यक् . . . . . अविघ्नपरिसमाप्तिप्रचयगमनशिष्टाचार-परिपालनप्रभृतयेऽभिमतदेवतातत्त्वानुस्मरणमङ्गलच्छलेनारिप्सितग्रन्थस्याभिधेय-सम्बन्ध . . . . रयति—स जयतीति । जगज्जन्मादिहेतुतया श्रुति-न्यायप्रसिद्धो यस्तत्पदार्थः स सर्वस्मादुत्कृष्टत्वेन प्रतिपाद्यतया वर्तत इत्यर्थः ।

ननु अस . . . . . . . तटस्थोऽपि जीवब्रह्मणी भिन्ने विरुद्धधर्म-वत्त्वादित्याद्यनुमानात्, स च तार्किकैः प्रतिपादितो न प्रतिपाद्य इत्याह—सिन्धुरवदन इति । सिन्धवो . . . . . तासु रमत इति सिन्धुरः प्राणः सवदनवद्वदनं मुखं प्रधानमङ्गं यस्य तथोक्तः, भेदानुमानस्य बिम्बप्रतिबिम्बयोरनैकान्त्यात्, तत्त्वमस्यादि . . . . (ई)श्वरः प्रत्यगात्मैवे-त्यर्थः, तर्हि ईश्वरोऽपि जडः स्यात्, जीवस्य जडत्वादित्यत्राह—देव इति। द्योतनात्मकः स्वयम्प्रकाशोऽत्रायं पुरुषः . . . . विज्ञानं ब्रह्मेत्यादि-श्रुत्या . . . . . नुपपत्त्या च जीवोऽपीत्यर्थः, तथापि तत्प्रतिपादने दुःखाभावात्, आनन्दयोरभावेनापुमर्थत्वादप्रतिपाद्यतेत्यत्राह—

**End:**

ननु—अस्य विजिगीषुवि(षोर्वि)जयाजनकत्वात् न सर्वकृतिसङ्गाद्यतेत्य-त्राह—प्रतिपक्षेति—तर्हि वीतरागजनमनस्समाधानाधायकत्वान्न तैस्सङ्ग्राह्य-

तेत्यत्राह—श्रेय इति। श्रेयसो मोक्षस्य यत्साधनं सम्यज्ज्ञानं तद्वेदान्तैराशु-मिच्छतामितिकर्तव्यतेत्यर्थः ॥

इयं पदार्थ[निर्णया]निर्णे(र्णी)ति(:) प्रबोधपरिशोधिनी ।
सेव्यतां सर्वदा सर्वैस्सद्भिस्सन्न्यायवित्तमैः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीनरसिंहस्वरूपपूज्यपादशिष्येणा-त्मस्वरूपभगवता कृता पदार्थतत्त्वनिर्णयटीका समाप्ता ॥

The scribe adds—

इदं वासुदेवलिखितम् ॥

R. No. **4220**

Paper. 10¾ × 9¾ inches. Foll. 71. Lines, 20 in a page. Grantha. Good.

Transcribed in 1922–23 from a MS. of His Holiness Śrī-Rāmānuja Jīyar Svāmigaḷ, Vānamāmalai Maṭham, Nanguneri taluk, Tinnevelly district.

(*a*) पञ्चलक्षणीव्याख्या.

PAÑCALAKṢAṆĪVYĀKHYA.

Foll. 1*a*—33*b*. Fol. 34 is left blank.

Similar to the work described under R. No. 1583(*a*) ante.

Incomplete.

**Beginning:**

ननु वह्निव्याप्यो धूम इति ज्ञानं प्रमाणं प्रमितिजनकतावच्छेदकरूप-वत्त्वादिन्द्रियवदित्यनुमानेन धूमज्ञानत्वसामानाधिकरण्येन प्रामाण्यं प्रमिति-जनकतावच्छेदकरूपव्याप्तिनिश्चयत्वहेतुना नैयायिकेन साधितम् । तच्च न सम्भवति हेतोरसिद्धेः ।

* * * *

तस्मान्नानुमानं प्रमाणमिति चार्वाकश्शङ्कते—दीधितौ सर्वमिदमिति । व्याख्यायां युक्तिप्रदर्शनमिति हेतुप्रदर्शनमित्यर्थः । सतीति विद्यमान इत्यर्थः ।

**End:**

स्ववृत्तित्वस्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नस्वप्रतियोगितावच्छेदका-वच्छिन्नाधेयतानिरूपितत्वोभयसम्बन्धेन.

(b) पञ्चलक्षणीव्याख्या—मुक्तामाला.

PAÑCALAKṢAṆĪVYĀKHYĀ: MUKTĀMĀLĀ.

Foll. 35a—73a. Fol. 73b gives the name of the owner of the original MS. Fol 74 is left blank.

Similar to the work described above.

Incomplete.

**Beginning:**

अनुमानप्रामाण्यव्यवस्थापकयुक्तिप्रदर्शनम् हेतुज्ञाने सामानाधिकरण्येन प्रमितिकरणत्वसाधकप्रमितिकरणतावच्छेदकधर्मवत्त्वरूपहेतुप्रदर्शनम् । निश्चायकाभावादिति । व्याप्तिनिश्चयजनकसामग्र्यभावादित्यर्थः । तथा च व्याप्तिनिश्चयस्यानुत्पत्तौ तन्निश्चायकत्वमप्रसिद्धमेवेति भावः ।

**End:**

अन्यथा धूमादिनिष्ठप्रतियोगितावत्त्वस्य कालिकादिसम्बन्धेन वह्न्यादौ सत्त्वादतिव्याप्तिः । न च स्वरूपसंबन्धेन प्रतियोगिताश्रयत्वं निवेशनीयम्; कालिकविशेषणतायाः स्वरूपत्वात् । तथा च साध्यनिष्ठाभाव.

## R. No. 4221.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1922-23 from a MS of M R.Ry. Śaṅkaran Nambūdirippād, Anjēri, Trichur, Cochin State

Foll 1a—51b Fol 52 is left blank

महाभाष्यप्रदीपप्रकाशः.

MAHĀBHĀṢYAPRADĪPAPRAKĀŚAḤ

Same work as that described under R No 1470 ante. By Pravartakōpādhyāya

Contains the first Āhnika complete and breaks off in the course of the second Āhnika

---

## R. No. 4222.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 46. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1922–23 from a MS of M R.Ry. Sudarśanōdgātṛ Kāvyatīrtha, Tilōttāmadēvīpura, Dharakota, Ganjam district.

Fol. 46 is left blank.

R. NUMBER 4222.

प्रमुदितगोविन्दनाटकम्.

PRAMUDITAGŌVINDANĀṬAKAM.

A drama having for its plot the story of churning the ocean and the marriage of Lakṣmī with Lord Viṣṇu: by Sadāśivōdgāti of Vatsa family.

Complete

**Beginning:**

अम्भोजातानि चक्रं दरममृतघृणिः कैरवं चक्रवाला-
वेने पादादिसंज्ञाप्रकटनपटवश्चित्रमध्यासते यान् ।
शम्भोर्माङ्गल्यचर्चागमविधिविहिताः कौतुकाधानरम्याः
क्रीडासम्भारयोग्या विदधतु कुशलं नित्ययूनो गृहा वः ॥

* * *

नान्द्यन्ते सूत्रधारः--अलमतिविस्तरेण (हर्षं नाटयन्) ।

लम्बोदरं प्रथितपञ्चकरप्रकारं
गौरं कदाचिदरुणं न सितं कदाचित् ।
देहेन रङ्गमपि कुञ्जरमत्युदार-
माराध्नुमो वरदमेकरदं विभूत्यै ॥

* * * *

नटः---(आत्मगतं) अहो मदन्तर्गतवस्तु दर्पणोदरसङ्काशे समन्वाशये प्रतिफलति (हर्षं नाटयित्वा, प्रकाशं) अस्ति तावद्वत्सकलकैरवाकरकलाक-रायमाणस्य प्रथितकविरत्नपुरोहितराजपदवीकस्य कवेस्सदाशिवोद्गातुरभिनवं (प्र)मुदितगोविन्दं नाम रूपकम्, तत्प्रदर्श्य सभासन्तोषेणात्मानं कृतार्थयाम, न केवलमात्मनः कृतार्थता, सभ्याराधनमङ्गलमपि फलम् ।

* * * *

नटः । वत्से! विस्मृतः किमु ह्योऽनुभूतो मम सख्युः प्रियंवदस्य मञ्जुपरिणयोत्सवः ।

नटी-- सच्चं (सत्यम्).

नटः---तदेहि अनन्तरीयमनुतिष्ठावः । (इति निष्क्रान्तौ) प्रस्तावना ।

(ततः प्रविशति सजायः प्रियंवदः ।)

प्रियंवदः—(नाड्येनावलोक्य, दिशोऽनुसन्धाय) अये ! अद्यापि मध्यं-दिनमनतिक्रान्तश्चण्डरश्मिः ।

* * *

त्वां तार्किकाः परमपूरुषमामनन्ति
विश्वाभिराम ! जगतोऽस्य निमित्तहेतुम् ।
यद्ब्रह्मणस्तव न किञ्चन वर्ततेऽक्षिण
दीक्षां विना मम मते तु त एव विज्ञाः ॥

प्रियंवदः—(सहर्षम्) प्रिये ! तदेहि अनन्तरकरणी(या)य सज्जी-भवावः । (इति निष्क्रान्तौ ।) विष्कम्भकः ।

(ततः प्रविशति ब्रह्मणानुगम्यमानो मुकुन्दः ।)

मुकुन्दः—(मन्दरभूधरमग्रे पश्यन् स्वगतम् ।)

अहार्योऽयं सर्वेष्वपि गिरिषु ते चाह्वयवहाः
परामत्र न्याय्यां विशदयति गोवर्धनधरः(?) ।
अहङ्कारादस्मात्प्रतिमिलति भास्वत्करलसत्-
करव्याजाद्यो धूयत इव पताकाः प्रतिदिशम् ॥

* * * *

ब्रह्मा—अथकिम्.

हरिः—कः कोऽत्र रे ।

(प्रविश्य) पुण्डरीकः—किमाज्ञापयति नाथदेवः ।

मुकुन्दः—प्रस्तुतेऽस्मिन्नब्धिमन्थने सहायत्वेनासुरास्सन्धातव्याः । ततस्त्वया बलिराजसम्मुखमुपगन्तव्यम् । पत्रिका च दातव्या ।

पुण्डरीकः—यथाज्ञापयति देवः (इति गृह्णाति ।)

हरिः(पुन.)—कोऽन्योऽत्र रे

कुमुदकः—(प्रविश्य) किमाज्ञापयति नाथदेवः ?

हरिः—प्रस्तुतेऽकूपारमथने नागास्साहाय्य(य)केन वरणीयाः । तदर्थं नागकुलमपि त्वया गन्तव्यम् । पत्रिका च दातव्या ।

कुमुदकः—यथाज्ञापयति देवः (इति गृह्णाति । ततस्तावुपसरतः ।)

उभौ—वत्सौ ! कृतकृत्यौ भूयास्ताम् ।

हरिः—(तावदवलोक्य) किं साधितम् ?

उभौ—चराचरनियन्तृभ्यां नाथभ(ग)वद्भ्यां यथाज्ञप्तं तथैव, तत्र किंतु भयभक्त्योरस्ति विशेषः ।

देवौ—(नाटयेनेतरेतरमालोक्य, विहस्य) तदेतानन्तरकरणीयाग । (इति निष्क्रान्तास्सर्वे) ।

**Colophon :**

इति प्रथमोऽङ्कस्समाप्तः ॥

**End :**

हरः—(विहस्य सन्तोषं नाटयित्वा करावूर्ध्वं प्रणीय) सखे ! केशव ! सर्वत्र विशेषतस्सङ्गरे कर्तुं पराक्रम करणपराक्रमानुरोधी, यतोऽक्षचरणश्चतुरोऽपि कुण्ठमुखलेखिन्या किञ्चन लिपिसौष्ठवं दर्शयतितराम् ।

ब्रह्मा—हरे ! रूढमाह भगवान् शङ्करः । यतः ?

शरता तव लक्ष्मीश ! शङ्करस्य शरारुना ।

प्रतिपन्ना पुरां हन्त्री (इत्यर्धोक्ते)

हरिः—सूतता तव तादृशी ॥

गुरुः—अथकिम् ? (सर्वे सस्मिताननाः सञ्जाताः ।)

* * * *

शून्या ब्रह्मपुरी निसर्गसुभगः स्वर्गोऽपि रिक्तस्सुरैः

पातालं भुजगेन्द्रमुक्तमहरः कैलासनामा धरः ।

वैकुण्ठं गरुडासनोज्झितमदस्तीरं तथौदन्वतं

सर्वैरध्युषितं तपः किमकरोत् पूर्वं स्रवन्तीपतिः ॥

(ततः परस्परं सर्वे सम्मुखमालपन्ति ।)

अहो ! प्रकृतमभिहितं वैतालिकेन । यतोऽमृतगर्धनैरस्माभिः किमपि नास्मारि । तद्भवत्वेवम् ।

राजानः परिपालयन्तु वसुधां नीत्या स्वधर्मं प्रजा

रक्षन्तु प्रतिवस्त्यमस्तकलुषौ स्यातां सदा दम्पती ।

पर्जन्यः समयेऽभिवर्षतु परं स्वस्त्यस्तु गोभ्यस्तथा

विप्रेभ्यो भवतु प्रजापशुयशश्श्रीवाग्भिराढ्यो जनः ॥

(अथ प्रमुदितो लक्ष्म्या सह गरुडमारूढो गोविन्दः सामुद्रं हरणमाहरन् कल्याणयात्रामकरोत्) ।

(इति निष्क्रान्तास्सर्वे) ।

इति श्रीप्रमुदितगोविन्दं नाम नाटकं सम्पूर्णम् ॥

R. No. **4223.**

Paper. $10\frac{3}{4} \times 9\frac{3}{4}$ inches. Foll. 142. Lines, 20 in a page. Telugu. Good.

Transcribed in 1922–23 from a MS. of M.R.Ry Dēvulapalli Rāmakrsnabrahma Śastrigāru, Repalli, Guntur district

शरभपारिजातः.

ŚARABHAPĀRIJĀTAH

Foll 1*a*—67*a* Foll 67*b*—141*a* contain the Śarabhapuraścaryāprakarana. Foll 141*b*—142*b* are left blank.

Same work as that described under R No 2601 ante, wherein see for the beginning. By Ramakrṣna, son of Bhavānī and Sadāśiva alias Śrīpati who was the son of Nīlakaṇṭha of Atrēyagōtra.

Date of transcription –Sunday, the 5th day of the lunar month Bhādrapada in the year Kalayukti. Name of the scribe—Subrahmaṇya, son of Rāma

Complete in 8 Stabakas; as found in the Vātūlāgama.

**End:**

ऐं लं ठं क्ष्म्यूं साध्यनामशर्मणः शरीरपीडितनानाक्षुद्रगदग्रहार्तिशमनद्वारायुषो वर्धनं कुरु कुरु ऐं लं ठं क्ष्म्यूं साध्यनामशर्मणः नानाक्षुद्रगदग्रहार्तिशमनद्वारायुषो वर्धनरूपेण ज्वल ज्वल सर्वशान्तिशूलिनि ऐं लं ठं क्ष्म्यूं साध्यनामशर्मणः नानाक्षुद्रग्रहार्तिशमनद्वारायुषो वर्धनं कुरु कुरु हुं फट् स्वाहा ॥

**Colophon:**

इति श्रीशरभपारिजाते वातूलागमे द्वितीयाध्यायो नाम पुत्थलीप्रशंसाप्रक्षिप्ते रामकृष्णदेवनिर्मिते शरभपारिजातेऽष्टमस्स्तबकः ॥

अयं ग्रन्थस्समाप्तिमगमत् ॥

## R. No. 4224.

Śrītāla. 13 × 2 inches. Foll. 48. Lines, 13 in a page. Grantha. Much injured.

Purchased in 1922-23 from M.R.Ry. Śrīraṅgācārya of Nangavaram, East Chitra street, Srirangam.

(*a*) जैमिनीयन्यायमाला.

JAIMINĪYANYĀYAMĀLĀ.

Foll. 1*a*--8*a*. Foll 8*b* and 9 are left blank.

A metrical treatise summarising the topics of the Pūrvamīmāṁsā of Jaimini.

Contains from the first Pāda of the first Adhyāya to the end of the second Pāda of the second Adhyāya.

Wants the introductory stanza

**Beginning :**

स्वाध्यायोऽध्येय इत्यस्य विधानस्य प्रयुक्तितः ।
विचारशास्त्रं नारभ्यमारभ्यं वेति संशयः ॥
अर्थधीहेतुताधीते लोके सिद्धावघातवत् ।
नियामकं च नैवातो वैधारम्भो न सम्भवी ॥
दर्शापूर्ववदस्त्यत्र क्रत्वपूर्वं नियामकम् ।
अर्थानिर्णायकं शास्त्रमत आरभ्यतां विधेः ।

* * * *

समाख्याध्यापकत्वेन वाक्यत्वं तु पराहतम् ।
तत्कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता ॥

**Colophon :**

इति (न्यायमालायां) प्रथमः पादः ॥

**End :**

नोक्तदृष्ट्यादि(ष्टयन्न)कामानामन्यत्वं प्रत्यभिज्ञया ।
नियमेऽपि चतुर्थ्येषा तादर्थ्यादुपपद्यते ॥

**Colophon :**

इति न्यायमालायां द्वितीयाध्यायस्य द्वितीयः पादः ॥

---

(*b*) भाट्टदीपिका.

BHĀṬṬADĪPIKĀ.

Foll. 10*a*—48*b*.

Same work as that described under No. 4423 of the D.C.S. MSS., Vol. IX

Contains from the second Pāda of the first Adhyāya to the end of the third Pāda of the second Adhyāya.

---

## R. No. 4225.

Palm-leaf. 16⅜ × 1 inches. Foll. 74. Lines, 6 in a page. Grantha. Injured.

Purchased in 1922–23 from M.R.Ry. Śrīraṅgācārya of Nangavaram, East Chitra street, Srirangam, Trichinopoly district.

### उत्तरचम्पुः.

### UTTARACAMPUḤ

Same work as that described under No. 12219 of the D.C.S. MSS., Vol. XXI By Vēṅkaṭādhvarin.

Incomplete.

---

## R. No. 4226.

Palm-leaf. 18 × 1 inches. Foll. 115. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1922–23 from M.R.Ry. Śrīraṅgācārya of Nangavaram, East Chitra street, Srirangam, Trichinopoly district.

### भाट्टदीपिका.

### BHĀṬṬADĪPIKĀ.

Foll. 1*a*—109*b*

Same work as that described under Nos. 4423 and 4424 of the D.C.S. MSS., Vol. IX. By Khaṇḍadēvamiśra.

Contains from the second Pāda of the second Adhyāya to the end of the third Adhyāya.

Foll. 110–115 contain a small portion of the same work.

## R. No. 4227.

Palm-leaf. 18 × 1¼ inches. Foll. 161. Lines, 11 in a page. Grantha. Injured.

Purchased in 1922–23 from M.R.Ry. Śrīrangācārya of Nangavaram, East Chitra street, Srirangam.

Foll. 1—4 are left blank.

### (*a*) सन्ध्यावन्दनमन्त्रवृत्तिः.

### SANDHYĀVANDANAMANTRAVṚTTIḤ.

Foll. 5*a*—12*a*. Fol. 12*b* is left blank.

A commentary on the Mantras contained in the Sandhyāvandana The author, whose name is not given, mentions one Varadamiśra and was the disciple of Varadaśrīnṛsiṁhārya.

Incomplete.

**Beginning :**

वरदमिश्रपदाब्जसमाश्रयप्रथिमसम्भृतसम्पदुपागमः ।
अहमवाङ्मनसावसरं हरेश्चरणपद्मयुगं शरणं श्रये ॥

* * * *

श्रुतिस्मृत्युदितं कृत्यं यदाराधनसाधनम् ॥
वरदश्रीनृसिंहार्यस्योपदेशबलोदिताम् ।
सन्ध्यावन्दनमन्त्राणां विदधे वृत्तिमन्विताम् ॥

सिद्धमिह देवतिर्यङ्मनुष्यस्थावरसंस्थानानामात्मनां भगवन्नियाम्य

* * * *

आचमनमन्त्राणां मध्ये स्वाध्यायानुपूर्व्यक्रमेण प्रातस्तनमन्त्रान् पूर्वमत्र सायन्तनमन्त्रोपादानात् जपन्नासीत सावित्रीं प्रत्यगातारकोदयादित्यभिधाय सन्ध्यां प्रातस्सनक्षत्रां तिष्ठेदासूर्यदर्शनादिति योगीश्वरेणाभिहितत्वाच्च प्रथमं सायन्तनमन्त्रा व्याख्यास्यन्ते—अग्निश्चेत्यस्य मन्त्रस्य वामदेव ऋषिस्सविता वा ।

**End :**

महे महते भूमा सम्प्रसादादध्युपदेशात् इत्यधिकरणसिद्धमन्न इत्यर्थः । रणाय पूज्याय सुखरूपमोक्षप्रदायेत्यर्थः । रमणशब्दस्य छान्दसो वा मध्यमवर्णलोपः ।

* * * *

कर्मसिद्धेरुभयत्र व्यवस्थितत्वादुभयमपां प्रसादेन सम्पद्यत इत्यनेनार्थेचैनोभयार्थं सर्वदेवतामयभगवत्प्रदापतम . . . . इति । किञ्च.

---

(*b*) विष्णुसहस्रनामभाष्यम्—भगवद्गुणदर्पणम्.

VIṢṆUSAHASRANĀMABHĀṢYAM: BHAGAVADGUNA-DARPAṆAM.

Foll. 13*a*—87*b*.

Same work as that described under No. 9073 of the D.C.S MSS., Vol. XVII. By Śrīraṅganātha, otherwise known as Parāśarabhaṭṭa, son of Śrīvatsāṅkamiśra of Hāritagōtra.

---

(c) आगमप्रामाण्यम्.

ĀGAMAPRĀMĀṆYAM.

Foll. 88*a*—114*b*.

Complete.

Same work as that described under No. 5202 of the D.C.S. MSS., Vol. XI. By Yāmunācārya.

---

(d) पाञ्चरात्ररक्षा.

PĀÑCARĀTRARAKSĀ.

Foll. 114*b*—160*b*. Foll. 133 and 161 are left blank.

Same work as that described under No 5280 of the D.C.S. MSS., Vol XI. By Vēdāntadēśika

Complete.

---

R. No. **4228.**

Palm-leaf. 13¼ × 1¼ inches. Foll. 58. Lines, 8 in a page. Grantha. Good.

Purchased in 1922–23 from M.R.Ry. Śrīraṅgācāriyar of Mangavaram, East Chitra street, Srirangam, Trichinopoly district.

वाल्मीकिसूत्रम्, सवृत्ति.

VĀLMĪKISŪTRAM WITH VṚTTI.

Same work as that described under No. 1549 of the D.C.S. MSS., Vol. III. By Trivikrama.

Breaks off in the third Pāda of the second Adhyāya.

---

R. No. **4229.**

Palm-leaf. 17⅜ × 1½ inches. Foll. 25. Lines, 9 in a page. Grantha. Injured.

Purchased in 1922–23 from M.R.Ry. Śrīraṅgācāriyar of Mangavaram, East Chitra street, Srirangam, Trichinopoly district.

पञ्चलक्षणीव्याख्या.

PAÑCALAKṢAṆĪVYĀKHYĀ.

Foll. 2*a*—24*b*. Foll. 1 and 25 are left blank.

Same work aa that described under R. No. 4220(a) ante.
Incomplete.

## R. No. 4230.

Palm-leaf. 14 × 1¼ inches. Foll. 145. Lines, 9 in a page. Grantha. Fair.

Purchased in 1922–23 from M.R.Ry. Śrīraṅgācāriyar of Mangavaram, East Chitra street, Srirangam, Trichinopoly district.
Foll. 1, 2 and 145 are left blank.

### तत्त्वचिन्तामणिदीधितिव्याख्या—भवानन्दीया.
### TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : BHAVANANDĪYĀ.

Same work as that described under Nos 4292 and 4293 of the D.C.S. MSS., Vol. VIII. By Bhavanandatarkavāgīśa.
Incomplete.

---

## R. No. 4231.

Palm-leaf. 14⅜ × 1½ inches. Foll. 9. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1922–23 from M.R.Ry. Śrīraṅgacāriyar of Mangavaram, East Chitra street, Srirangam, Trichinopoly district.

### विष्णुपारम्याविषयः.
### VIṢṆUPĀRAMYAVIṢAYAḤ.

Similar to the work described under R No. 3521 ante.
Fragmentary, incomplete and in disorder.

**Beginning:**

नारायणपरं ज्ञानं नारायणपरं तपः ।
न च नारायणादन्यत्रिषु लोकेषु विद्यते ॥

* * * *

महाभारते सर्वत्र नारायणपारम्यस्यैव प्रपञ्चितत्वादत्र शिवपारम्यस्य कथितत्वात् . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . शङ्करादिपरिग्रहादिति सिद्धान्तचन्द्रिकायामस्माभिः प्रपञ्चितं तत्रैव द्रष्टव्यम् ।

**End:**

सर्वगतश्च नित्य इतिवदुपमानतया निवेशनं युक्तमिति । तदात्मतया ब्रह्मानन्दस्य रूपणं तमसः परमज्योतिरिति श्लोकेन प्रणवार्थपञ्चकेन . . . . . .

R. No. **4232.**

Palm-leaf. $16\frac{3}{8} \times 1\frac{1}{4}$ inches. Foll. 88. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1922–23 from M.R.Ry. Śrīrangacarya of Nangavaram, East Chitra street, Srirangam, Trichinopoly district.

भगवन्माहात्म्यप्रतिपादकश्लोकसङ्ग्रहः.

BHAGAVANMĀHĀTMYAPRATIPĀDAKAŚLOKASAṄGRAHAḤ.

A collection of stanzas found in the Śrībhāgavata, purporting to establish the greatness of Lord Viṣṇu.

Incomplete.

**Beginning:**

जन्माद्यस्य यतोऽन्वयादितरश्चार्थेष्वभिज्ञः स्वराट्

* * * *

धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥

* * * *

इदानीं श्रीमद्भागवते स्थिता भगवन्माहात्म्यप्रतिपादकश्लोकास्संगृह्यन्ते—

प्रथमस्कन्धे प्रथमाध्याये . . . . .

यस्यावतारा लोकानां क्षेमाय च भवाय च ।

आपन्नस्संसृतिं घोरां यन्नामविवशोऽगृणन् ॥

* * * *

यज्ज्ञातव्यमथो जप्यं यत्कर्तव्यमिति प्रभो ।

स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा त्रिपर्ययम् ॥

**Colophon:**

प्रथमस्कन्धस्समाप्तः ॥

**End:**

एकत्रिंशे परीक्षितं प्रति शुकः—

इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शन्तमानि ।

अन्यत्र चेह च शुभानि गृणन्मनुष्यो भक्तिं परां परमहंसगतां लभेत ॥

**Colophon :**

एकादशस्कन्धस्समाप्तः ॥

द्वादशस्कन्धे तृतीयेऽध्याये कलियुगस्वभावनिरूपणे परीक्षितं प्रति शुकः—

कलौ न राजन् जगतां परं गुरुं त्रिलोकनाथानतपादपङ्कजम् ।
प्रायेण मर्त्या भगवन्तमच्युतं यक्ष्यन्ति पाषण्डविभिन्नचेतसः ॥

*

तन्मनः सृजते माया ततो जीवस्य संसृतिः ॥
स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदिष्यते ।
ततो दीपस्य दीपत्व.

---

R. No. **4233.**

Palm-leaf. 17 × 1½ inches. Foll. 76. Lines, 7 in a page. Grantha. Fair.

Purchased in 1922–23 from M.R.Ry. Raghavācāriyar, son of Raghunāthācāriyar, Kulittalai, Trichinopoly district

लक्ष्मीसहस्रव्याख्यानम्—गूढार्थविवरणम् .

LAKṢMĪSAHASRAVYĀKHYĀNAM : GŪḌHĀRTHA-VIVARAṆAM.

A commentary on Vēṅkaṭācārya's Lakṣmīsahasra, which work has been described under R. No. 733 ante

Contains the Stabakas 17 to 22; but wants 33 stanzas in the beginning of the 17th Stabaka.

**Beginning :**

य इति । हे देवि त्वदीयमेकं नामापि यः पुरुषः जानाति, तस्य हृदये सर्वाणि सुप्तिङन्तपदानि सर्वदा स्फुरन्ति । नित्यमुत्कृष्टो राजा वशीकृतश्चेत्तन्नगरस्थजनास्तस्य शि(शु)श्रूषन्त इत्यत्र कः प्रयत्नः ; राजवशीकारकं पुरुषं नगरजना इव श्रीनामस्वरूपज्ञं सर्वे शब्दास्स्वयमेवोपतिष्ठन्त इति भावः । पूर्वार्धेन श्रुत्युक्तमेकविज्ञानेन सर्वज्ञानं सूचितम् । यो वक्ति इति पाठान्तरम् । किं कुर्वत इत्यत्र किंशब्दस्य चादिपठितस्य निपातत्वेन धातोः प्राक् प्रयोगः ।

* * * *

**Colophon :**

इति लक्ष्मीसहस्रव्याख्यायां नामवैभवस्तबकस्सप्तदशः ॥

**End:**

अथापि विदितगुणालङ्करणं विचित्ररचनाविचक्षणप्रेक्षामित्यन्वयः भगवत्पक्षे । कविपक्षे तु विदितगुणालङ्करणं विचित्ररचनाविचक्षणप्रेक्षम् । अत एव कृतदशरूपकमित्यन्वयः ॥

**Colophon:**

इति लक्ष्मीसहस्रव्याख्यायां गूढार्थविवरणाख्यायां दशावतारस्तबक एकविंशः ॥

कमलायतनां चित्ते कलये यत्पदाम्बुजम् ।
चिरं विबुधसन्मौलिचित्रस्तबकभूषितम् ॥

* * * *

अघटितघटनशक्तत्वात् कृपालुत्वाच्च जघन्यस्य मादृशस्यापि हितकरणप्रार्थनामात्रेणात्यौन्नत्यमापादयसीति भावः ॥

**Colophon:**

चित्रस्तबकस्समाप्तः ॥

---

R. No **4234.**

Palm-leaf. 16¼ × 1½ inches. Foll. 50. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1922–23 from M R.Ry. Raghavācāriyar, son of Raghunāthacāriyar, Kulittalai, Trichinopoly district.

युधिष्ठिरविजयम्.

YUDHIṢṬHIRAVIJAYAM.

Same work as that described under No 11631 of the D.C.S. MSS., Vol. XX. By Vāsudēva.

Complete.

---

R. No. **4235.**

Palm-leaf. 14½ × 1¼ inches. Foll. 4(?). Lines, 6 in a page. Grantha. Fair.

Purchased in 1922–23 from M.R.Ry. Rāghavācāriyar, son of Raghunāthācāriyar, Kulittalai, Trichinopoly district

Foll. 1 and 2 contain a portion of the commentary on the eighth Sarga in Śiśupālavadha.

यादवराघवीयम्, सव्याख्यानम्.

YĀDAVARĀGHAVĪYAM WITH COMMENTARY.

Foll. 3*a*—44*a*. Fol. 44*b* contains the name of the scribe. Foll. 45 and 46 are left blank.

Same work as that described under R. No. 135 ante. By Veṅkaṭādhvarin, son of Raghunāthadīkṣita

Name of the scribe—

रङ्गसामिस्वहस्तलिखितम्.

Contains the Pūrvardha complete

---

R. No. **4236.**

Palm-leaf. 14¾ × 1¼ inches. Foll. 94. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1922-23 from M. R. Ry. Raghavacariyar, son of Raghunāthacāriyar, Kulittalai, Trichinopoly district.

लक्ष्मीसहस्रव्याख्यानम्—गूढार्थविवरणम्.

LAKṢMĪSAHASRAVYĀKHYĀNAM . GUḌHĀRTHA-VIVARAṆAM.

Same work as that described under R. No. 4233 ante

Contains the Stabakas 9--16 complete and 17th incomplete

**Beginning:**

जननीमनङ्गजननीं श्रयेय जगतां पितुश्श्रितार्तिहराम् ।
शृङ्गारजलधिवेणीं वेणाजितनीरदां मुदां मूर्तिम् ॥

पूर्वस्तबके वर्णितस्य निरतिशयसौन्दर्यसारस्य फलभूत भगवता सह दिव्यविहारमाश्रित्यास्मिन् स्तबके श्रियं स्तौति—दुर्ज्ञेयेति । या श्रीनिवासस्य विभावाद्या समुल्लसितरत्याख्यस्थायिभावमुख्यालम्बनविभावभूता अप्रसिद्धत्वेनाविज्ञेयः स्वोत्कर्षपरिच्छेदो यस्यास्सा दुग्धसागरसुता मां रक्षतु । अत्र दुग्धाब्धितनयेति विशेष्यस्य रससर्वस्वत्वसम्भवाभिप्रायगर्भत्वात्परिकराङ्कुरः ।

**Colophon:**

इति शृङ्गारस्तबकव्याख्यायां गूढार्थविवरणाख्यायां शृङ्गारस्तबको नवमः ॥

**See under the work described R. No 4233 ante, wherein see for the end.**

R. No. **4237.**

Palm-leaf. 17½ × 1¼ inches. Foll. 28. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1922–23 from M R.Ry. Rāghavacāriyar, son of Raghunāthācāriyar, Kulittalai, Trichinopoly district.

दयाशतकम्, सव्याख्यानम्.

DAYĀŚATAKAM WITH COMMENTARY

Same work as that described under R No 133 ante. By Vēdāntadēśika. The commentary is by Rāmānuja, son of Śēṣacārya and a resident of Tirupati.

Incomplete.

---

R. No. **4238.**

Palm-leaf 18½ × 1⅝ inches Foll 105 Lines, 7 in a page. Telugu. Much injured.

Purchased in 1922–23 from M R.Ry Addanki Tirumalakumāra-Vēṅkaṭācaryulayyavāralugaru, Buchireddipalem, Nellore district.

Foll. 5 and 6 are left blank

तत्त्वचिन्तामणिसारः.

TATTVACINTAMAṆISĀRAH.

Same work as that described under No. 4030 of the D.C.S. MSS, Vol. VIII. By Gōpīnatha.

Contains the Upamānakhaṇḍa and Śabdakhanda complete

R. No. **4239.**

Palm-leaf. 16½ × 1½ inches. Foll. 97. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1922–23 from M R.Ry. Addanki Tirumalakumāra-Vēṅkaṭācāryulayyavaralugāru, Bucchireddipalem, Nellore district.

तत्त्वचिन्तामण्यालोकव्याख्यानम्—सिद्धाञ्जनम्.

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀNAM: SIDDHĀÑJANAM.

Same work as that described under R. No. 1536 ante, wherein see for the beginning. By Annambhaṭṭa, son of Tirumalācārya of Rāghavasōmayāji family.

Contains upto the Avayavanirūpaṇa in the Anumanakhaṇḍa ; but wants the beginning.

**End :**

नवीनास्तु साध्योपस्थिततात्पर्यकन्यायावयवत्वं प्रतिज्ञात्वम् । हेतूपस्थिततात्पर्यकन्यायावयवत्वं हेतुत्वम् । व्याप्त्युपस्थिततात्पर्यकन्यायावयवत्वमुदाहरणत्वम् । पक्षधर्मतातात्पर्यकन्यायावयवत्वमुपनयत्वम् । अबाधिततत्वतात्पर्यकन्यायावयवत्वं निगमनत्वमिति न काप्यनुपपत्तिरिति । एतत्सर्वमभिसन्धायाह—इत्यास्तां विस्तर इति ॥

**Co ophon :**

इति श्रीमहोपाध्यायराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यस्य सूनोरन्नम्भट्टस्य कृतावनुमानालोकसिद्धाञ्जने अवयवनिरूपणं सम्पूर्णम् ॥

---

## R. No 4240.

Palm-leaf. 16¾ × 1½ inches. Foll. 309. Lines, 7 in a page Telugu. Injured.

Purchased in 1922–23 from M.R.Ry. Addanki Tirumalakumāra-Vēnkatācaryulayyavāralugāru, Buchireddipalem, Nellore district.

### तत्त्वचिन्तामण्यालोकव्याख्यानम्—सिद्धाञ्जनम्.

### TATTVACINTĀMAṆYĀLŌKAVYĀKHYANAM · SIDDHĀÑJANAM.

Same work as that described under R No 1536 ante. By Annambhaṭṭa, son of Tirumalacarya of Rāghavasōmayaji family.

Contains the Anumānakhaṇḍa incomplete

---

## R. No. 4241.

Palm-leaf. 20 × 1⅝ inches. Foll. 75. Lines, 6 in a page. Telugu. Much injured.

Purchased in 1922–23 from M.R Ry Addanki Tirumalakumara-Veṅkaṭācāryulayyavāralugāru, Buchireddipalem, Nellore district.

### तत्त्वचिन्तामण्यालोकस्फूर्तिः.

### TATTVACINTĀMAṆYĀLŌKASPHŪRTIḤ.

Same work as that described under R. No. 1677 ante, wherein see for the beginning. By Agnihōtrabhaṭṭa, son of Bhavānī and Dvādaśāhējya.

Contains upto the Pratyakṣalakṣaṇa, but wants the beginning.

**End:**

न च मितिमात्रंशसाक्षात्कारे सामान्यसामग्री हेतुः विषयसाक्षात्कारे तु विशेषसामग्रीति वाच्यम्; तथा सति प्रत्यक्षज्ञानमात्रे . . . . . . . . . . . . . पत्तेरिति नायं प्रकारस्साधुरित्यस्मन्मतमेव रमणीयम् ॥

**Colophon:**

इति भूपालान्तरदुर्लभप्रतापवितरणधराप्रथितमट्लिवंशवार्धिपूर्णसुधाकरयल्लमराजुन . . . . . . . . वीणाधिष्ठितास्थानवासिना श्रीरामान्वयभवानीद्वादशाहेज्यनन्दनेन ज्ञानेन्द्रचरणनिषेवकश्रीवासुदेवयतीन्द्रगण्टेनरसिंहभट्टारकान्नगारुयज्वविबुधकृपाविलसित . . . . . . . . . तत्त्वचिन्तामण्यध्यक्षालोकटिप्पण्यां स्फूर्त्यभिधायामध्यक्षलक्षणं परिपूर्णम् ॥

---

R. No. **4242.**

Palm-leaf. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. Foll 335. Lines, 6 in a page Telugu. Much injured.

Purchased in 1922-23 from M.R.Ry. Addanki Tirumalakumāra-Vēṅkaṭācaryulayyavāralugaru, Buchireddipalem, Nellore district.

तत्त्वचिन्तामणिदीधितिव्याख्या—सुबुद्धिमनोहरा.

TATTVACINTĀMANIDĪDHITIVYĀKHYĀ: SUBUDDHI-MANŌHARA.

Same work as that described under R. No 987 ante By Annambhaṭṭa, son of Tirumalācārya of Rāghavasōmayāji family.

Contains the Anumānakhaṇḍa without the beginning and the end.

**Beginning:**

पक्षसाध्यवैशिष्ट्यावगाहिनिर्णयत्वमिति ज्ञेयम् । विवक्षाफलं दर्शयति—तेनेति । पक्षता—पक्षस्साध्यवान् न वा साध्यं पक्षवृत्ति न वेति संशयाननुगमेन . . . . . . . . . . . . विवक्षायाः फलमाह—न वेति ।

* * * *

पञ्चम्यर्थान्वितो न प्रतिज्ञार्थः, किं तु तदेकदेशार्थ इत्येव प्रागुक्तं न तु हेत्वर्थान्वितो न प्रतिज्ञार्थ इत्युक्तमित्याशयेन प्रायमित्युक्तम् ॥

**Colophon:**

इति श्रीमहोपाध्यायराघवसोमयाजिकुलावतंसतिरुमलाचार्यवर्यस्य सूनोरन्नम्भट्टस्य कृतौ दीधितिव्याख्याने सुबुद्धिमनोहरे अवयवनिरूपणं सम्पूर्णम् ॥

**End :**

एकावच्छेदेन हेतुसाध्यज्ञानस्थलेऽपि बाधासाङ्कर्यं क्वचित् दर्शयति — सुखेति । नारकशरीरावच्छिन्नात्मा सुखवान् दुःखादित्यत्र पक्षतावच्छेदक . . . .

R. No. **4243.**

Palm-leaf. 18½ × 1⅝ inches. Foll 117. Lines, 12 in a page. Grantha Slightly injured.

Purchased in 1922–23 from M.R.Ry. Ganapati Śastrigal, Karattoluvu, Coimbatore district.

(*a*) प्रतापरुद्रीयम्.

PRATĀPARUDRĪYAM.

Foll. 1*a*—52*b*.

Same work as that described under No. 35 on pages 82 and 230 of M Seshagiri Sastri's Report No 2. By Vidyānatha.

Complete.

The scribe adds—

नीलकण्ठेन लिखितमिदं प्रतापरुद्रीयम् ॥

(*b*) भर्तृहरिसुभाषितम्.

BHARTṚHARISUBHĀṢITAM

Foll. 53*a*—68*b*.

Same work as that described under No. 12080 of the D.C.S. MSS., Vol. XX.

Contains the Śṛṅgāraśataka and Vairāgyaśataka complete and Nītiśataka incomplete

Foll. 69*a*—72*b* give the Vittalakṣaṇavisaya.

(*c*) अच्युतरायाभ्युदयम्.

ACYUTARĀYĀBHYUDAYAM.

Foll. 73*a*—90*b*.

Same work as that described under No. 11451 of the D.C.S. MSS., Vol. XX. By Rājanātha, son of Aruṇagirinātha.

**Complete.**

(d) रुक्मिणीकल्याणम्.
RUKMIṆĪKALYĀṆAM

Foll. 99a—109b.

Same work as that described under No. 11713 of the D.C.S. MSS, Vol. XX. By Rājacūḍāmaṇidīkṣita, son of Divāpradīpa Satyamaṅgala-ratnakhēṭa Śrīnivāsadīkṣita and Kāmākṣī.

Complete.

---

(e) रत्नावली.
RATNĀVALĪ.

Foll. 110a—117a. Fol 117b is left blank.

Same work as that described under No 12629 of the D.C.S. MSS., Vol. XXI. By Śrīharṣa.

Incomplete.

## R. No. 4244

Palm-leaf. 13¾ × 1½ inches. Foll. 10. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1922-23 from M.R.Ry. Ganapati Śāstrigaḷ, Kārattoluvu, Coimbatore district.

द्रौपदीपरिणयचम्पूः.
DRAUPADĪPARIṆAYACAMPŪḤ.

Same work as that described under No. 12303 of the D.C.S. MSS., Vol. XXI. By Cakrakavi, son of Lōkanātha and Ammā

Breaks off in the second Āśvāsa.

---

## R. No. 4245.

Palm-leaf. 16¼ × 1⅝ inches. Foll. 158. Lines, 8 in a page. Grantha. Injured.

Purchased in 1922-23 from M.R.Ry. Gaṇapati Śāstrigaḷ. Kārattoluvu, Coimbatore district.

Fol. 140b is left blank

युधिष्ठिरविजयव्याख्या—बालव्युत्पत्तिकारिणी
YUDHIṢṬHIRAVIJAYAVYĀKHYA : BĀLAVYUTPATTI-KĀRIṆĪ.

Same commentary as that described under No. 11635 of the D.C.S. MSS, Vol XX. By Śokkanātha, son of Acci Amba an dSudarśana-bhaṭṭa of Bhāradvājagōtra and a disciple of Hastigiribhaṭṭa of Vatsa-gōtra.

Breaks off in the fifth Āśvāsa.

R. No. **4246.**

**Palm-leaf.** 17¼ × 1⅓ inches. Foll. 48. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1922-23 from M.R.Ry. Gaṇapati Śāstrigal, Kārattoluvu, Coimbatore district

Fol. 1*a* is left blank.

(*a*) कार्त्तिकमाहात्म्यम्.

KĀRTTIKAMĀHĀTMYAM.

Foll. 2*a*—31*a*. Fol. 31*b* is left blank.

Same work as that described under R No 72(*a*) ante, with slight difference in the beginning and the end; as found in the Padmapurāṇa

Contains the Adhyāyas 1—30 complete.

**Beginning:**

शुक्लाम्बरधरं ( . . . ) शान्तये ॥

श्रीसूतः—

शृणुध्वमृषयस्सर्वे कार्त्तिकस्य तु वैभवम् ।
पुरा भगवता प्रोक्तं सत्यभामां प्रियां प्रति ॥

सत्यभामा पुरा कृष्णमेकान्ते सुखमास्थितम ।
भर्तारं लोकभर्तारं पप्रच्छातिकुतूहलात् ॥

सत्यभामा—

दानं व्रतं तपो वापि किं नु पूर्वं मया कृतम ।
येनाहं सत्यजा मर्त्या भवातीतो भवान् किल ॥

* * * *

**Colophon:**

इति श्रीपाद्मपुराणे कार्त्तिकमाहात्म्ये प्रथमोऽध्यायः ॥

**End:**

इतिहासमिमं पुराभवं शृणुयाच्छ्रावयते च यः पुमान् ।
हरिसन्निधिकारिणीं मतिं लभते कृपया जगद्गुरोः ॥

**Colophon:**

इति श्रीपाद्मे महापुराणे कार्त्तिकमाहात्म्ये सूतर्षिसंवादे पुराणश्रवणादिवक्तृपूजामाहिमानुवर्णनं नाम त्रिंशोऽध्यायः ॥

(*b*) धनुर्मासमाहात्म्यम्.

DHANURMĀSAMĀHĀTMYAM.

Foll. 32*a*—43*b*.

On the greatness and importance of the worship of Viṣṇu during the lunar month Mārgaḻi, i.e., while the sun happens to be in the Sagittarins of the zodic.

Contains the Adhyāyas 1—6 complete.

**Beginning:**

ऋषय ऊचुः—

व्यासशिष्य महाप्राज्ञ सूत पौराणिकोत्तम ।
श्रुता नानाविधा धर्मास्त्वत्तोऽस्माभिः शुभप्रदाः ॥
कार्त्तिका इरिता धर्मा माघाद्याश्चैव भूरिशः ।
सर्वकामास्सदा प्रोक्ता वैशाखाद्या नृणामिह ॥

अथापि वक्ष्ये गिरिजे विष्णुप्रीतिकरं शुभम् ।
कालं वै मार्गशीर्षाख्यं देवदेवस्य वल्लभम् ॥
यः पूजयति सद्भक्त्या चापस्थे द्युमणौ हरिम्
उषःकाले नरो देवि यो वै सम्पूज्यतेऽन्वहम्

**Colophon:**

इति श्रीब्रह्माण्डपुराणे धनुर्मासमाहात्म्ये प्रथमोऽध्यायः ॥

**End:**

इति श्रुत्वा सूतमुखाच्छौनकादिमुनीश्वराः ॥
प्रसन्नवदनाम्भोजास्सूतं पौराणिकोत्तमम् ।
गन्धपुष्पाक्षतैस्सम्यक् पूजां चक्रुर्मुदान्विताः ॥

**Colophon:**

इति श्रीब्रह्माण्डपुराणे धनुर्मासमाहात्म्ये व्यतीपातमहिमानुवर्णनं नाम षष्ठोऽध्यायः ॥

Foll. 43*b*—48*a* give the Saṅkrāntivratamāhātmya and Rathasaptamīvratamāhātmya. Fol. 48*b* is left blank.

## R. No. 4247.

Palm-leaf. $13\frac{7}{8} \times 1\frac{5}{8}$ inches. Foll. 26. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1922-23 from M.R.Ry. Gaṇapati Śastrigal, Kāratto-luvu, Coimbatore district.

Fol. 1 is left blank.

### तर्कसङ्ग्रहदीपिकाव्याख्या—नीलकण्ठप्रकाशिका.

### TARKASAṄGRAHADĪPIKĀVYĀKHYĀ : NĪLAKANṬHA-PRAKĀŚIKĀ.

Same work as that described under No 1167 of the D C S. MSS, Vol. VIII By Nīlakaṇṭhabhaṭṭa, son of Rāmabhaṭṭa of Kauṇḍinya-gōtra.

Breaks off in the Anumānaparicchēda.

---

## R. No. 4248.

Śrītāla. $16\frac{3}{4} \times 2\frac{1}{4}$ inches. Foll. 167. Lines, 14 in a page. Grantha. Fair.

Purchased in 1922-23 from M R.Ry. Gaṇapati Śastrigal, Kāratto-luvu, Coimbatore district.

Foll. 1 and 2 are left blank. Fol 3 contains a portion of the Jyōtiḥpradīpikā.

### (*a*) जैमिनिसूत्रव्याख्या— ज्योतिःप्रदीपिका.

### JAIMINISŪTRAVYĀKHYĀ : JYŌTIḤPRADĪPIKĀ.

Foll. 4*a*—23*b*.

Same work as that described under R. No. 1810(*b*) ante By Lakṣmaṇa.

Complete in two Adhyāyas.

Foll. 24*a*—25*a* contain Jyautisavisaya in Tamil. Foll. 25*b*—27*b* are left blank Fol 28 contains the horoscope of one Anantaraman.

---

### (*b*) भागवतसारसङ्ग्रहः.

### BHĀGAVATASĀRASAṄGRAHAḤ.

Foll 29*a*—148*a*. Foll. 52*b*, 87*b*, 119*b*, 126*b*, 137*b*, 148*b*, 157*b*, 163*b*, 164*b*, 165 and 166*b* are left blank. Foll. 159—167 contain Jyautiṣa-viṣaya.

Same work as that described under R. No. 1642 ante. By Brahma-nandabhāratī.

Contains the 11th Skandha incomplete.

R. No. **4249.**

Palm-leaf. $15\frac{7}{8} \times 1\frac{5}{8}$ inches. Foll. 292. Lines, 9 in a page. Grantha Slightly injured.

Purchased in 1922–23 from M.R.Ry. Ganapati Śāstrigaḷ, Kārattoluvu, Coimbatore district.

Foll. 1—5 are left blank.

## अवधूतगीता, सटीका.

## AVADHŪTAGĪTĀ WITH COMMENTARY.

Foll. 6*a*—288*a* Foll. 288*b*—292*b* are left blank

A commentary on the Avadhūtagītā, which work has been described under R No. 1777(*c*) ante: by Paramānandatīrtha, pupil of Bhāratītīrtha.

Complete

**Beginning :**

शुक्लाम्बर ( . . . ) शान्तये ॥
गोरक्षकस्य माहात्म्यं दत्तात्रेयस्य वैभवम् ।
संवादमुभयोश्चैव अद्भुतं ब्रह्मनिर्णयम् ॥
तस्य पट्टाभिषेकं च अखण्डैकरसायनैः ।
प्रश्नोत्तराभ्यां प्रथमं वर्णयन् सप्तमेन वै ॥
प्रथमं वाक्यसन्दर्भैर्नानावृत्तैश्च सत्क्रमैः ।
अनिर्देश्यमतीतं च वस्तु तत्र निरूप्यते ॥

अत्र दत्तात्रेयसंहितायां कथासन्दर्भः—

"अत्रिश्च भगवान् पूर्वमनपत्यस्तपश्चरन् ।
अतीतं रूपमुद्दिश्य पुत्रार्थं भार्यया सह ॥"

संवत्सरशतस्यान्ते ब्रह्मादयस्तस्य वरदानायागताः । ततो ब्रह्मनिष्ठं पुत्रं प्रार्थयामास । ते च तथैव दत्वा पूजितास्सन्तः यथास्थानं ययुः । ततो नि(मिष)त्रयेण भगवान् विष्णुरेव पुत्ररूपोऽभवत् । ततो जातकर्म नामकरणं दत्तात्रेय इति चकार ।

* * * *

स्वभावमात्रमिति विचिन्त्याह—येनेति ।

येनेदं पूरितं सर्वमात्मनैवात्मनात्मनि ।
निराकारं कथं वन्दे को वा वन्द्यो मदन्यतः ॥ अस्यार्थः—

येनात्मना इदं सर्वं पूरितम् । येनेति इदमिति आत्मनः प्रपञ्चस्य च भिन्नत्वेन प्रतीतमैक्यं करोति । इदं सर्वमात्मना पूरितमखण्डरसमात्रमेव सदाकारमेव

* * * *

**Colophon:**

इत्यवधूतग्रन्थे दत्तात्रेयगोरक्षकसंवादे प्रथमप्रकरणे पञ्चमप्रकरणं समाप्तम् ॥

**End:**

मग्नश्चेत् कथं वा ममोपदिष्टवान् इति चेत् महासमुद्रे मग्न इव एकरससागरे मग्नसमये प्रोक्तवान् । अनन्तरं दर्शनाभावात् मग्नमात्रं न भवति किन्तु भावितपूतः । तेन प्रलपितम् । एतेन किमुक्तमिति चेत् अनुभवनिष्ठेन आत्मदर्शनं गतेनोक्तमसत्यं न भवति । प्रमात्वेनोक्तम् । एवमङ्गीकृतं प्रलपितं विद्धि । एवमेव सुखेन तिष्ठस्वेत्यर्थः ॥

**Colophon:**

इत्यवधूतग्रन्थे दत्तात्रेयगोरक्षकसंवादे तृतीये तृतीयप्रकरणं समाप्तम् ॥

इति श्रीभारतीतीर्थशिष्यपरमानन्दतीर्थविरचितावधूतगीताटीका समाप्ता ॥

---

## R. No. 4250.

Palm-leaf. $16\frac{1}{8} \times 1\frac{5}{8}$ inches Foll. 69 Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1922-23 from M.R.Ry Gaṇapati Śāstrigaḷ, Kārattoluvu, Coimbatore district.

परिभाषेन्दुशेखरव्याख्या — गदा.

**PARIBHĀṢENDUŚEKHARAVYĀKHYĀ - GADĀ**

Same work as that described under R. No. 588 ante. By Payuguṇḍa Vaidyanātha.

Incomplete.

---

## R. No. 4251.

Palm-leaf. $17 \times \frac{1}{2}$ inches. Foll. 55. Lines, 9 in a page. Grantha. Injured.

Purchased in 1922-23 from M.R.Ry Gaṇapati Śāstrigaḷ, Kārattoluvu, Coimbatore district.

ब्रह्मसूत्रचन्द्रिका.

BRAHMASŪTRACANDRIKĀ.

Same work as that described under No. 4658 of the D.C.S. MSS., Vol. IX, wherein see for the beginning.

Almost complete.

**End:**

भोगमात्रसाम्यलिङ्गाच्च । उपासकस्योपा(स्यस्वरूप)तया सहभोगमात्रेण सह साम्यं श्रुतं न जगद्व्यापारेण । आपो वा इति साम्यलिङ्गात् । अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्.

R. No. **4252.**

Palm-leaf. 12 × $1\frac{5}{8}$ inches. Foll. 17. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1922–23 from M.R.Ry. Gaṇapati Śāstrigal, Kārattoluvu, Coimbatore district.

(*a*) परिभाषावृत्तिकारिका.

PARIBHĀṢĀVṚTTIKĀRIKĀ.

Foll. 1*a*—8*b*.

A metrical commentary on the Paribhāṣās in Pāṇini's grammar.

Contains the stanzas 1—115 complete and 116th incomplete.

**Beginning:**

भृङ्गकुलपीतमदभङ्गगजतुण्डं मङ्गलकृतां हृदयरङ्ग(वि)निविष्टम् ।
अङ्गजरिपोः प्रथममङ्गजमविघ्नं तं गणपतिं गुणनिधिं शरणमेमि ॥
गोकर्णराडाभरणं यदीयं यद्रव्यहव्यादजमाददाह ।
कुम्भेन चूडामणिरायुगान्तं पायादपायाद्गिरिजार्धमूर्तिः ॥
प्रीणितोरुगुरुपादकटाक्षाः पाणिनीयरचिताः परिभाषाः ।
अद्य पद्यगदितार्थविशेषाः कर्तुमुद्यतधियि प्रपतन्तु ॥
अब्जसम्भवमुखैरपि कृत्स्नं शब्दजातमुपदेष्टुमशक्यम् ।
सङ्ग्रहेण कथनेऽर्थविशेषस्तत्र तत्र विवृतेरवधार्यः ॥
संशयादिदमबोध(क)मित्थं नेति याभिदधती परिभाषा ।
सा पुनर्लणिति सूत्रविशेषे णानुबन्धकरणादवगम्या ॥

लणूसूत्रे वा संशयकृत् णानुबन्धपुनःकृतिः ।
व्याख्यान(तोऽ)त इत्याद्यां परिभाषामसूसुचत् ॥
न हि कार्यी निमित्तत्वेनाश्रीय(त) इतीह या ।
दीर्घविव्योर्ङित(तो)स्सा तु ज्ञाप्या गुणनिषेधतः ॥

**End :**

असति सम्भवे बाधनं भवत्युभयसंभवे तूभयं भवेत् ।
सति च सम्भवे बाधनं भवेन्मिदिति सूत्रभाष्ये त्रयं स्फुटम् ॥
आकरे न्यायसिद्धत्वेनोक्तोत्सर्गापवादयोः ।

(*b*) व्युत्पन्नपदकारिका.

VYUTPANNAPADAKĀRIKĀ.

Foll. 9*b*—15*b*. Fol. 9*a* is left blank.

A short metrical treatise in grammar based on the Siddhanta-kaumudī.

Contains the stanzas 1—116 complete.

**Beginning :**

प्रकृत्या भिन्नरूपावप्येकप्रत्ययगोचरौ ।
मुनिभिर्वर्णितावाद्यौ रामकृष्णावुपास्महे ॥
परिभाव्य गभीरार्थां प्रायस्सिद्धान्तकौमुदीम् ।
सुप्तिङ्व्युत्पन्नशब्दानां दिङ्मात्रमिह लिख्यते ।'
पद्यैरभिनवैः क्वापि हृद्यैरन्यकृतैरपि ।
शब्दभेदाववबोधार्थं प्रक्रियापि प्रकाश्यते ॥
तत्र स्वौजसमौट्छसूटाभ्यांभिसूङेभ्यांभ्यसित्यपि ।
ङसिभ्यांभ्यसूङसोसांङ्योस्सुबिति प्रत्ययास्सुपः ॥
त्रिभिस्त्रिभिर्भवेयुस्ते सुपस्सप्त विभक्तयः ।
तेऽपि त्रयो यथासङ्ख्यमेकद्विबहुवाचिनः ॥

*　　*　　*

विभक्तिरिति संज्ञेह सुपामथ तिङामपि ।
भवस्त(वेत्त)त्र सुपस्तावत्स्युः प्रातिपदिकात्परे ॥
अर्थवत्प्रातिपदिकं धातुवाक्यपदान्यृते ।
तदजन्तं हलन्तं च त्रिधा पुंस्त्रीनपुंसकैः ॥

**End :**

इह संयोगपूर्वत्वाद्यणभावेन सुश्रियौ ।
अनेकाच्त्वस्य चाभावाद्यणभावो नियाविति ॥

Foll. 16 and 17 give a small portion of Vrttivisayakagrantha.

R. No **4253.**

Palm-leaf. 16⅜ × 1⅝ inches. Foll. 24 Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1922-23 from M.R.Ry. Ganapati Śāstrigal, Kārattoluvu, Coimbatore district.

(*a*) शृङ्गारभूषणभाणः.

ŚṚNGĀRABHŪṢAṆABHĀṆAḤ.

Foll. 1*a*—10*b*.

Same work as that described under No 12704 of the D.C.S. MSS, Vol. XXI. By Vāmanabhaṭṭabāṇa of Śrīvatsagōtra.

Complete

The scribe adds---

जातवेदा वृषे वर्षे पौषे मासि रवेर्दिने ।
सम्पूर्णमलिखद्ब्राणं श्रीमान् शृङ्गारभूषणम् ॥

(*b*) शिवसहस्रनामावलिः.

ŚIVASAHASRANĀMĀVALIḤ.

Foll. 11*a*—17*b*.

Same work as that described under No 9282 of the D.C.S MSS., Vol. XVII.

Complete.

---

(*c*) आत्मार्पणस्तुतिः.

ĀTMĀRPAṆASTUTIḤ.

Foll. 18*a*—22*a*

Same work as that described under R. No. 1009 ante.

Wants the beginning ; otherwise complete.

Foll. 22*b*—24*b* contain the Pārthivalingapūjāvidhi.

## R. No. 4254.

Palm-leaf. 15 × 1⅝ inches. Foll. 106. Lines, 10 in a page. Grantha. Much injured.

Purchased in 1922-23 from M R Ry Gaṇapati Śāstrigaḷ, Kāratto-luvu, Coimbatore district

(*a*) वेदान्तसंज्ञानिरूपणम्.

VĒDĀNTASAMJÑĀNIRŪPAṆAM

Foll 1*a*—13*b*

Same work as that described under R No 1719 ante

Incomplete.

---

(*b*) ब्रह्मोपनिषद्दीपिका.

BRAHMŌPANIṢADDĪPIKĀ.

Foll 14*a*—22*b*

Same work as that described under No 664 of the D C S MSS., Vol. I, Part III. By Śaṅkarānanda, pupil of Ānandātman

Complete.

---

(*c*) कैवल्योपनिषद्दीपिका.

KAIVALYŌPANIṢADDĪPIKĀ

Foll. 23*a*—29*a*

Same work as that described under No 411 of the D C S MSS, Vol I, Part III. By Śaṅkarānanda, pupil of Ānandātman

---

(*d*) नारायणोपनिषद्दीपिका.

NĀRĀYAṆŌPANIṢADDĪPIKĀ

Foll. 29*a*—32*a*. Fol 32*b* is left blank

A commentary on the Nārāyanōpanisad, which work has been described under No. 561 of the D C S. MSS., Vol I, Part III. by Śaṅkarānanda, pupil of Ānandātman.

Complete.

**Beginning :**

नारायणोपनिषदं भेदपर्वतभेदिनीम् ।
व्याख्यास्ये ब्रह्मविद्याया जिनतिन्ना(जननीं पा)पहारिणीम् ॥
(सं)बन्धो विषयः प्रद्विवा(तद्वत्सा)धिकारिप्रयोजनः ।
सर्वोपनिषदां तुल्यस्तस्मान्नात्रोच्यते पृथक् ॥

पुरुषः(परि)पूर्णः देशकालवस्तुपरिच्छेदशून्य इत्यर्थः । ह प्रसिद्धः सर्वासूपनिषत्सु वै स्मर्यमाणः आपो नारास्ता अयनं यस्य स नारायणः ।

*

**Colophon:**

इति श्रीनारायणोपनिषद्दीपिकायां प्रथमोऽध्यायः ॥

**End:**

अमृतत्वं ब्रह्मज्ञानं तत्साध्यं फलमश्नुते प्राप्नोति । ततोऽमृतत्वमश्नुते(इत्यभ्यास) उपनिषत्समाप्त्यर्थः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यश्रीमच्छङ्करानन्दभगवतः कृतौ नारायणोपनिषद्दीपिकायां द्वितीयोऽध्यायः ॥

समाप्ता चोपनिषद् .

---

(*e*) तैत्तिरीयोपनिषद्दीपिका.

TAITTIRĪYŌPANIṢADDĪPIKĀ.

Foll. 33*a*—55*a*

Same work as that described under No 511 of the D C S MSS., Vol I, Part III. By Śaṅkarānanda, pupil of Ānandātman.

Complete, but wants the beginning.

Fol 55 contains a portion of Āruṇikōpaniṣaddīpikā.

---

(*f*) माण्डूक्योपनिषद्दीपिका.

MĀṆḌŪKYŌPANIṢADDĪPIKĀ.

Foll. 56*a*—59*b* Fol. 60 is left blank.

Same work as that described under No 707 of the D C S. MSS., Vol I, Part III. By Śaṅkarānanda, pupil of Ānandātman.

Complete.

---

(*g*) शिवमाहात्म्यवर्णनम्.

ŚIVAMĀHĀTMYAVARṆANAM.

Foll. 61*a*—82*b*. Foll. 83*a*—106*b* contain a small portion of this work.

Authoritative passages purporting to establish the supremacy of Śiva; as found in the Liṅgapurāṇa, Brahmakaivarta, etc.

Breaks off in the 5th Adhyāya.

**Beginning :**

लैङ्गे उपरिभागे सप्तत्रिंशाध्याये सनत्कुमारः—

भूयो वद गणश्रेष्ठ शिवमाहात्म्यमुत्तमम् ।
शृण्वतो नास्ति मे तृप्तिस्त्वद्वाक्यामृतमुत्तमम् ॥
कथं शरीरी भगवान् कस्माद्रुद्रः प्रतापवान् ।
सर्वात्मा वा कथं शम्भुः कथं पाशुपतव्रतम् ॥
कथं वै देवमुख्यैस्तु स्तुष्टो(तो) दृष्टस्तु शङ्करः ।

शैलादि(दिः)—

अव्यक्तादभवत्स्थाणुश्शिवः परमकारणम् ।
सत्कार्यकरणोपेत ऋषिर्विश्वाधिकः प्रभु. ॥

* * * *

**Colophon :**

द्वितीयप्रकरणे ईश्वरस्य सर्वदेवोपास्यतानिर्णयो नाम प्रथमोऽध्यायः ॥

**End :**

तदाप्रभृति लोकेऽस्मिन् लिङ्गे पूजा प्रकीर्तिता ।
प्रतिमास्वपि पूजाया लिङ्गे पूजा विशिष्यते ॥

**Colophon :**

ईश्वरोपास्यतानिर्णये द्वितीयप्रकरणे (चतुर्थोऽ)ध्यायः ॥

ब्रह्मकैवर्तकपुराणे वृद्धगिरिमाहात्म्ये द्वात्रिंशाध्याये अनवद्या—

वसद्भिरस्मिन् चिरभूधरेश आराधनीयो विधिना द्विजेन्द्रैः ।
केनाम्बया ब्रूहि मम प्रसन्नश्शिवार्चनापुण्यफलं यथावत् ॥

नाथशर्मा—

शृणु प्रिये वच्मि शिवार्चनाया विधिं फलं चाकरणेऽप्यपायम् ।
मन्वादिभिः स्मर्तृभिदी(री)श्वरेण प्रोक्ता न सङ्क्षेप न विस्तरेण ॥

*

अज्ञानतः पूर्वकृतस्य चैतदेवं किलेत्येषु न किं च कुर्यात् ॥
कुर्वंस्तु(तत्) षड्गुणितं समेति भोगेन नाशोऽस्य न चाम्यसोऽन्यैः(?) ।
जातिस्मरत्वं बहुविद्यतां च विज्ञानवत्तां पृथि.

R. No. **4255.**

Palm-leaf. 16 × 1½ inches. Foll 49. Lines, 9 in a page. Grantha. Good.

Purchased in 1922-23 from M R Ry Gaṇapati Śāstrigaḷ, Kāratto-luvu, Coimbatore district

सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Same work as that described under No. 2885 of the D.C.S. MSS., Vol. V. By Kṛsnapaṇḍita, son of Lakṣmī and Rāmabhaṭṭa of Rāghava-daivajña family.

Complete in 4 Gucchas.

The scribe adds—

प्रमाथिनामसंवत्सरे तुलामासे कृष्णपक्षे सन्ध्यावन्दनभाष्यम्.

R. No. **4256.**

Palm-leaf. 16½ × 1½ inches. Foll. 22. Lines, 10 in a page. Grantha. Much injured.

Purchased in 1922-23 from M.R Ry Gaṇapati Śāstrigaḷ, Kāratto-luvu, Coimbatore district

कणादसिद्धान्तचन्द्रिका.

KAṆĀDASIDDHĀNTACANDRIKĀ

Same work as that described under R No 57 ante. By Gaṅgādhara-sudhī

Complete.

R. No. **4257.**

Palm-leaf. 13 × 1⅝ inches. Foll. 101. Lines, 7 in a page. Grantha. Much injured

Purchased in 1922-23 from M R Ry Gaṇapati Śāstrigaḷ, Kāratto-luvu, Coimbatore district

रामायणसारसङ्ग्रहः, सव्याख्यः.

RĀMĀYANASĀRASAṄGRAHAḤ WITH COMMENTARY.

Same work as that described under R Nos. 1734 and 3500(*a*) ante; but one additional stanza is given at the beginning. By Īśvaradīkṣita of Kauṇḍinyagōtra.

Complete.

प्रणम्य सीतारमणं सलक्ष्मणं गुणाकरं कुण्डिनवंशसम्भवः ।
इमं सतामीश्वरदीक्षितः प्रियः करोमि रामायणसारसङ्ग्रहम् ॥

## R. No. 4258.

Palm-leaf. 18 × 1⅜ inches. Foll. 39 Lines, 12 in a page Grantha. Slightly injured.

Purchased in 1922–23 from M.R.Ry Ganapati Śāstrigal, Karattolavu, Coimbatore district

Foll 1—4 are left blank

(a) परिभाषावृत्तिः.

PARIBHĀṢĀVṚTTIḤ

Foll. 5a—22a Fol 22b is left blank.

Similar to the work described under No 1460 of the D.C.S. MSS., Vol. III.

Complete.

**Beginning:**

व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् । व्याख्यानतो विशेषार्थनिश्चयः सन्देहे सति कर्तव्यः; न तु सन्देहार्थप्रतिपादकं शास्त्रं स्यात् । तच्च व्याख्यानं षड्विधम्—यथाह—पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना । आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतमिति । अथोदाहरणम्—ङेराम् नद्याम्नीभ्यः ।

* * * *

**Colophon:**

इति परिभाषावृत्तौ प्रथमोऽध्यायः ॥

**End:**

तेन अस्यापत्यमिरित्यस्य प्रकृत्यर्पोयऽप न प्रत्ययानवृत्तः । वस्तुतः अकृतव्यूहपरिभाषैवेयं परिभाषा प्रपञ्चिता ॥

**Colophon:**

इति परिभाषावृत्तावष्टमोऽध्यायः ॥ इति ज्ञापकपरिभाषाः ॥

अथ प्रायेण न्यायमूलाः परिभाषा उच्यन्ते—गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः । मुख्यं प्रसिद्धं तदन्यद्गौणं यथा लोके गौरनुबध्यतामित्युक्ते बाहीको नानुबध्यत इति ।

* * * *

न परिभाषावशादनिष्टापादनं साम्प्रतमिति सर्वेष्टसिद्धिः ॥

**Colophon:**

इति परिभाषावृत्तिव्याख्यानम् ॥

(*b*) परिभाषाप्रदीपार्चिः.

PARIBHĀṢĀPRADĪPĀRCIḤ

Foll. 23*a*—37*b*.

Same work as that described under R. No. 751 ante. By Nānāpāṭhaka alias Udayaṅkara

Incomplete.

Foll. 38 and 39 are left blank

R No. **4259.**

Palm-leaf. 16¼ × 1⅝ inches. Foll. 74. Lines, 11 in a page Grantha. Slightly injured

Purchased in 1922-23 from M R.Ry. Gaṇapati Śāstrigal, Kārattoluvu, Coimbatore district.

(*a*) रुद्रप्रश्नभाष्यम्.

RUDRAPRAŚNABHAṢYAM

Foll. 1*a*—48*b* Fol 49*a* gives the Phalaśrutiślōkas of the Rudrādhyāyapārāyaṇa. Fol. 49*b* is left blank

Same work as that described under No. 134 of the D.C.S. MSS., Vol. I, Part II. By Bhaṭṭabhāskara.

Wants the beginning; otherwise complete

(*b*) शिवगीता.

ŚIVAGĪTĀ.

Foll. 50*a*—74*b*.

Same work as that described under No. 2546 of the D.C S. MSS., Vol. IV, Part II.

Contains the Adhyāyas 1—16 complete.

## R. No. 4260.

Palm-leaf. 15½ × 1⅝ inches. Foll. 192. Lines, 9 in a page. Grantha. Injured.

Purchased in 1922–23 from M.R.Ry Gaṇapati Śāstrigal, Kārattoluvu, Coimbatore district

### सामवेदब्राह्मणम्.
### SĀMAVĒDABRĀHMAṆAM.

Same work as that described under No 58 of the D.C.S. MSS., Vol. I, Part II.

Contains the Prauḍhabrāhmaṇa or Mahābrāhmaṇa, Ṣaḍviṁśabrāhmaṇa, Sāmavidhānabrāhmaṇa, Ārsēyabrāhmaṇa, Dēvatadhyāyabrahmaṇa, Saṁhitōpaniṣadbrāhmaṇa, Chāndōgyabrahmaṇa and Vaṁśabrahmaṇa complete.

## R. No. 4261.

Palm-leaf. 18 × 1⅞ inches. Foll. 111. Lines, 7 in a page. Grantha Slightly injured.

Purchased in 1922–23 from M R Ry Gaṇapati Śāstrigal, Kārattoluvu, Coimbatore district

### (*a*) वेदान्तपरिभाषा.
### VĒDĀNTAPARIBHĀṢĀ.

Foll 1*a*—20*b*. Fol 9 is left blank

Same work as that described under No 1727 of the D.C.S MSS, Vol. IX. By Dharmarājādhvarīndra, disciple of Vēṅkaṭanātha.

Complete.

---

### (*b*) वेदान्तपरिभाषाप्रकाशिका.
### VEDĀNTAPARIBHĀṢĀPRAKĀŚIKĀ

Foll. 21*a*—66*b*.

Same work as that described under No. 4737 of the D.C.S. MSS., Vol IX, wherein see for the beginning. By Peṭṭādīkṣita, son of Nārāyaṇadīkṣita.

Complete

**End:**

विवरणाचार्यैरपि शारीरकभाष्यन्यायसङ्ग्रहे ग्रन्थान्तरे देवताधिकरणे यो देवानां प्रत्यबुध्यत स एव तदभवत्तदर्षीणां तथा मनुष्याणामिति

वाक्योदाहरणेन यस्य ज्ञानं तस्यैव मुक्तिरित्युक्तम् । नन्वविद्याया एकत्वेन जीवस्यापि तथात्वाच्चैत्रावगते मैत्रस्याप्यनुसन्धानप्रसङ्ग इत्यादि दूषणं स्यादित्यत आह—तस्मादिति ॥

**Colophon:**

इति पेत्तादीक्षितविरचितायां वेदान्तपरिभाषाप्रकाशिकायां प्रयोजनपरिच्छेदस्समाप्तः ॥

विशयो विषयश्चैव पूर्वपक्षस्तथोत्तरम् ।
प्रयोजनं च पञ्चैते प्राञ्चोऽधिकरणं विदुः ॥

इति वेदान्तपरिभाषाटीका सम्पूर्णा ॥

The scribe adds—

चित्स्वरूपरामभद्राश्रमेण लिखितं वेदान्तपरिभाषाव्याख्यानम् ॥

---

(c) मानसोल्लासवार्त्तिकव्याख्यानम्.

MĀNASŌLLĀSAVĀRTTIKAVYĀKHYĀNAM

Foll 67a--102a Fol 102b is left blank

A commentary on Śurēśvara's Mānasōllāsavārttika, which itself is an amplificatory commentary in verse, on Śaṅkarācārya's Dakṣiṇāmūrtistōtra, which work has been described under No. 10998 of the D.C.S. MSS., Vol XIX: by Rāmatīrtha

Complete.

**Beginning:**

प्रोद्यच्छाखमहावटद्रुमतटे योगासनस्थं प्रभुं
प्रत्यक्तत्त्वबुभुत्सुभिः प्रतिदिनं प्रोद्वीक्ष्यमाणाननम् ।
मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शिवं
हृद्यन्तः कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्त्तिकम् ॥
नत्वा श्रीशङ्कराचार्यमुख्यान् सर्वान् गरीयसः ।
मानसोल्लासवृत्तान्तं वर्णयामि यथामति ॥

इह खलु भगवान् भाष्यकारः श्रीशङ्कराचार्यो नाम मन्दमतींस्तत्त्वजिज्ञासूननुग्रहीतुं दक्षिणामूर्तिस्तोत्रव्याजेन समस्तवेदान्तार्थरहस्यमाविश्चकार दश-

भिः पद्यबन्धैः । तच्छिष्येण विश्वरूपाचार्येण सुरेश्वराचार्यापरनाम्ना तत्पद्यप्रबन्धार्थतत्त्वं तात्पर्यतो मानसोल्लासनाम्ना वार्त्तिकात्मना ग्रन्थसन्दर्भेणा विष्कृतम् । तमिमं ग्रन्थं यथामति विवृणोमि । तत्र शिष्टाचारपरिपाल नाय कृतमङ्गलाचरणद्योतकोऽयमाद्यश्लोकः—मङ्गलमिति । अस्य स्तोत्रस्य वेदान्तशास्त्रप्रकरणरूपत्वात्तस्य च शास्त्रैकदेशसम्बन्धत्वादिलक्षणत्वात्तद्दर्शनाय शास्त्रीये विषयप्रयोजने तावदाह—आत्मलाभादित्यादिना । आत्मा प्रत्यक्तमस्सर्वसाक्षी तस्य लाभः परागर्थसम्भेदभेदनेनोद्धृत्य ब्रह्मस्वरूपेणावगमः तस्माल्लाभात् परोऽन्यो वा

* * * *

**Colophon:**

इति श्रीमानसोल्लासे प्रथमो वृत्तान्तः ॥

**End :**

इदानींमशेषं स्तोत्रं तात्पर्यतो व्याख्याय ग्रन्थप्रचयविघ्नोपशान्तये शिष्टाचारसंरक्षणाय च मङ्गलं स्वेष्टदेवताप्रार्थनारूपमाचरति—प्रकाशात्मिकयेति । आदित्यादिप्रकाशानामपि प्रभाकर इत्यर्थः । स्वयमेव प्रकाशतामित्यर्थः । दशमश्लोकव्याख्योपसंहारश्लोकः—

इति श्रीदक्षिणामूर्तिस्तोत्रार्थप्रतिपादके ॥
इति श्रीमानसोल्लासप्रबन्धोऽयं यथामति ।
व्याख्यातो रामतीर्थेन गुरुदेवप्रसादतः ॥
अनेन भगवान् श्रीमद्दक्षिणामूर्तिरीश्वरः ।
गुर्वात्मा प्रीयतां नित्यं तत्त्वज्ञानप्रदस्सताम् ॥

**Colophon :**

इति श्रीदक्षिणामूर्तिस्तोत्रव्याख्याप्रबन्धो मानसोल्लासदशमवृत्तान्तविलासस्समाप्तः ॥

---

(d) दक्षिणामूर्त्यष्टकम्, मानसोल्लासवार्त्तिकसहितम्.

DAKSIṆĀMŪRTYAṢṬAKAM WITH THE COMMENTARY MĀNASŌLLĀSAVĀRTTIKA

Foll. 103a—111a Fol. 111b is left blank

Same work as that described under No 10996 of the D.C S MSS., Vol XIX By Surēśvarācārya alias Viśvarūpācārya

Complete.

R. No. **4262.**

Palm-leaf. 17¼ × 1¼ inches. Foll. 55. Lines, 8 in a page. **Grantha.** Slightly injured.

Purchased in 1922-23 from M.R.Ry. Ganapati Śāstrigal, Kārattoluvu, Coimbatore district.

फुल्लसूत्रम्, सभाष्यम्.

PHULLASŪTRAM WITH COMMENTARY.

Same work as that described under No. 939 of the D.C.S. MSS., Vol. II. By Ajātaśatru.

Contains the Stōbhagatāgataprakaraṇa, Uccanīcaprakaraṇa, Padagāna, Sandhigāna and Saṅkruṣṭavikruṣṭa.

R. No. **4263.**

Palm-leaf. 13½ × 1½ inches. Foll. 94. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1922-23 from M.R.Ry. Ganapti Śastrigal, Kārattoluvu, Coimbatore district.

(*a*) व्याघ्रपुरमाहात्म्यम्.

VYĀGHRAPURAMĀHĀTMYAM.

Foll. 1*a*—54*a*. Fol. 54*b* is left blank.

On the greatness and religious sanctity of the Śaivakṣētra, Vyāghrapura (Puliyur), now known as Cidambaram. Compiled by Sukhaprakāśa, pupil of Paramaśivānanda.

Contains the Adhyāyas 1—19 complete; as found in the Skāndapurāṇa.

**Beginning:**

नैमिशिया ऊचुः--

ब्रूहि पूजाफलं विद्वन्! कृपया भुक्तिमुक्तिदम् ।

श्रीसूत उवाच—

वक्ष्ये पूजाफलं सम्यक् शृणुध्वं मुनिपुङ्गवाः ।

पूजया भुक्तिमाप्नोति पूजया मुक्तिमाप्नुयात् ॥

पुरा कश्चिन्महापापी पुल्कसः पुरुषाधमः ।

ब्राह्मणानां कुलं हत्वा गवां वेदविदां वराः(न्) ॥

अपहृत्य धनं मार्गे प्राणिहिंसापुरस्सरम् ।

स्वच्छन्दो निर्घृणो विप्रश्चचार पृथिवीतले ॥

*

पुण्यक्षेत्रे महातीर्थे पुराणे वसुधातले ।
मुनिभिस्सिद्धगन्धर्वैरसुरैश्च सुसेविते ॥
श्रीमद्व्याघ्रपुरे यत्र प्रनृत्यत्यम्बिकापतिः ।
तत्र भक्तिपरो भूत्वा स्नात्वा प्रातस्समाहितः ॥

* * * *

**Colophon:**

इति श्रीसूतसंहितासङ्ग्रहे श्रीमद्व्याघ्रपुरमाहात्म्ये स्थानसंरक्षणशिवपूजाफलमहिमानुवर्णनं नाम प्रथमोऽध्यायः ॥

**End:**

वाञ्छितान्यपि लब्ध्वान्ते मोक्षमापुर्द्विजोत्तमाः ।
अस्मिन्नार्तितिथौ शम्भुः परमानन्दनिर्भरः ॥
सर्वेषामपि रक्षार्थं करोत्यानन्दताण्डवम् ।
तस्मादिदं व्रतं पुण्यं व्रतानामुत्तमं द्विजाः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यविरचिते श्रीमत्परमशिवानन्दपूज्यपादशिष्यश्रीसुखप्रकाशयतिसङ्गृहीते श्रीमत्स्कान्दे पुराणे शिवरहस्यखण्डे-(ण्डो)क्तव्याघ्रपुरमाहात्म्ये एकोनविंशोऽध्यायः ॥

(*b*) हेमसभानाथमाहात्म्यम्.

HĒMASABHĀNĀTHAMĀHĀTMYAM.

Foll. 55*a*—94*b*.

On the greatness of Hēmasabhanātha, also called Kanakasabhāpati, who is no other than Naṭarāja worshipped at Cidambaram

Contains the Adhyāyas 82—92 complete; as found in the Śaṅkaravilāsa of Vidyāraṇya.

**Beginning:**

वसिष्ठं वदतां श्रेष्ठं वेदवेदाङ्गपारगम् ।
प्राज्ञं शिवरहस्यज्ञं पर्यपृच्छन्महर्षयः ॥

*

पुण्डरीकपुरं श्रीमदधिकृत्य शिवोदितम् ।
पुराणं दिव्यमाहात्म्यं पुण्यं शृणुत सुव्रताः ॥

इदं पुराणमाश्चर्यं देवोऽदभ्रसभापतिः ।
स्कन्दाय प्रोक्तवानादौ स्वमाहात्म्योपबृंहितम् ॥

* * * *

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यविद्यारण्ययोगिविरचिते भक्तचित्ततिमिरनिकरनिरोधनमिहिरोदये हेमसभानाथमाहात्म्यं नाम द्व्यशीतितमोऽध्यायः ॥

**End:**

किमत्र बहुनोक्तेन यद्यदिच्छति वैभवम् ।
तत्तदाप्नोति माहात्म्यं श्रुत्वा हेमसभापतेः ॥

*

सोऽयं हेमसभापतिः सुखमयीं पुष्णातु वस्सम्पदम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यविद्यारण्ययोगिविरचिते भक्तचित्ततिमिरनिकरनिरोधनमिहिरोदये शिवकथामृतसारसङ्ग्रहे शङ्करविलासे हेमसभानाथमाहात्म्ये नटेश्वरोत्सववर्णनं नाम द्विनवतितमोऽध्यायः ॥

## R. No. 4264.

Palm-leaf. $18\frac{5}{8} \times 1\frac{5}{8}$ inches. Foll. 156. Lines, 11 in a page. Grantha. Fair.

Purchased in 1922–23 from M.R.Ry. Ganapati Śāstrigal, Kārattoluvu, Coimbatore district.

### (*a*) परिभाषेन्दुशेखरम्.

### PARIBHĀṢENDUŚEKHARAM

Foll. 1*a*—40*b*.

Same work as that described under No. 1463 of the D.C.S. MSS., Vol. III. By Nāgōjibhaṭṭa.

Complete.

### (*b*) गजसूत्रवादार्थः.

### GAJASŪTRAVĀDĀRTHAḤ.

Foll. 41*a*—54*b*.

Same work as that described under No. 1520 of the D.C.S. MSS., Vol. III. By Ayya-Vēṅkaṭācārya, son of Śrīnivāsācārya.

Complete with one additional stanza given at the end :

णेरणाविितिसूत्रस्थं भट्टोजिगजपीडितम् ।
भाष्यस्वरससिंहेन कैयटं मोचयाम्यहम् ॥

(c) णेरणाविितिसूत्रार्थविचारः.

ṆĒRAṆĀVITISŪTRĀRTHAVICĀRAḤ.

Foll. 55a—59b.

Same work as that described under Nos. 1114 and 1117 of the D.C.S. MSS., Vol. III. By Nāgōjibhaṭṭa, son of Satī and Śivabhaṭṭa.

This portion is taken from the Śabdēnduśēkhara.

(d) व्याकरणपत्रम्.

VYĀKARAṆAPATRAM.

Foll. 60a—70a.

Similar to the work described under R. No. 598 ante.

Complete.

**Beginning :**

लण्सूत्रेऽकारश्चेत्यकारस्येत्संज्ञा प्रतिज्ञायते ।

तत्रेदं वक्तव्यम्—यद्यकारस्येत्संज्ञा, तर्ह्यतो ल्रान्तस्येति सूत्रे लकारग्रहणं व्यर्थं स्यात् लाघवाद्रान्तस्येत्येव ब्रूयात् । किं च य(दि य)ण् प्रत्याहार आश्रीयते, तत्रापि लाघवेन य इत्येव ब्रूयात् । यदि रप्रत्याहार इष्टस्तदा रादिफ इति सूत्रेण विधीयमान इफप्रत्ययो लकारादपि स्यात् । उरण् रपर इति सूत्रे लपर इति वक्तव्यमेव अतोऽत्राकारस्येत्संज्ञा सूत्रविरुद्धा न्यायविरुद्धा चेति प्रतिभाति ।

* * * *

एवं च हलूङ्याब्भ्यादिसूत्रे दीर्घग्रहणं प्रत्याख्येयमेव । अत एव स्थानिवत्सूत्रे ङ्याब्ग्रहणे दीर्घ इतिवत् जरसादेशस्य स्थानिवद्भावप्रतिषेधो वार्त्तिककृतारब्धः । एवं चाकारप्रश्लेषोऽपि भाष्यविरुद्ध इति प्रतिभाति ।

**End :**

औपदेशिकतरबितिरूपस्य ग्राह्यतया प्रत्ययस्यैव तत्सम्भवात् नदीतरे तरबितिरूपस्योपदेशाभावात् घसंज्ञाया अप्रवृत्तेः । तस्मात्तरप्तमपौ घ इत्येव वक्तव्यमिति सुधियो विदाङ्कुर्वन्तुतराम् ॥

(*e*) रप्रत्याहारमण्डनम्.

RAPRATYĀHĀRAMAṆḌANAM.

Foll. 70*a*—76*b*. Fol. 77 is left blank.

A critical discussion in support of "रप्रत्याहार" which is condemned by Nāgōśa while commenting upon the Sūtra "लण्" at the beginning of the Śabdōnduśōkhara.

Complete.

**Beginning:**

सञ्चिन्त्य वादिप्रवरं जेतारं श्रीपतञ्जलिम् ।
कुर्वे वादिविलासार्थं रप्रत्याहारमण्डनम् ॥

लण् लकारादकारोऽनुनासिकः प्रतिज्ञायते । तेन लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोस्संज्ञेति कैयटहरदत्तदीक्षितादयः । अत्र वदन्ति— अस्यानुनासिकत्वे अतो ल्रृतिसूत्रे पाणिनिरकारं नोच्चारयेत् रप्रत्याहारेणैव निर्वाहात् । किं चास्येत्संज्ञकत्वे यणघटितसूत्रेषु बहुष्वप्यर्धमात्रालाघवानुरोधेन यप्रत्याहारेणैव व्यवहरेत् ।

**End:**

उच्चार्यमाणगुणस्य विवक्षितत्वेन सोऽस्तीत्यादावपि दोषाभावः तत्रास्मद्प्रत्याहारस्वीकारे दोषाभावात् भाष्यादिसकलसम्मतत्वाच्च कौमुदीव्याख्याप्रवृत्तस्य दुराग्रहेण रप्रत्याहारखण्डनमनुचितमिति दिक् ॥

(*f*) तर्कग्रन्थः.

TARKAGRANTHAḤ.

Foll. 78*a*—82*b*.

Similar to the work described under R. No. 528 ante.

Wants the beginning and the end.

**Beginning:**

पदार्थसामान्यस्य किं वा लक्षणमित्युक्ते अभिधेयत्व, ज्ञेयत्वं वाच्यत्वं प्रमेयत्वं पदार्थत्वं च । सामान्यतः पदार्थो द्विविधः—भावोऽभावश्च । भावत्वं च समवाय स्वसमवेतसमवायान्यतरसम्बन्धेन सत्तावत्त्वम् । अभावत्वं च भावभिन्नत्वम् । भावष्षड्विधः—द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् । अभावो द्विविधः—संसर्गाभावः अन्योन्याभावश्चेति ।

**End :**

तत्प्रतीतीच्छयोच्चारितत्वं तात्पर्यस्य लक्षणम् । चैत्रस्तण्डुलं पचतीत्यत्र चैत्रपदस्य चैत्रत्वावच्छिन्नमित्यर्थः । तण्डुलपदस्य तण्डुलत्वावच्छिन्नमित्यर्थः । अम्प्रत्ययस्य कर्मत्वमर्थः । पचधातोः पाकोऽर्थः । आख्यातस्य कृतिरर्थः । (तथा च तण्डुलकर्मकपाकानुकूलकृतिमांश्चैत्रः).

---

(*g*) व्याकरणक्रोडपत्रम्.

VYĀKARAṆAKRŌḌAPATRAM.

Foll. 83*a*—109*a*.

Similar to the work described under R. No 598 ante

Incomplete.

**Beginning :**

प्रत्याहारेष्वितां न ग्रहणमनुनासिक इत्यादिनिर्देशसामर्थ्यात् न ह्यत्र ककारे परेऽचूकार्यं दृश्यत इति यत्कौमुद्यामुक्तम् । तत्र विचार्यते—तत्र यदि णसधातोर्ण्वुलि नासिकाशब्दो व्युत्पद्यते तदा अच्कार्यशब्देन यदि यण् विवक्षितः तर्हि प्रत्ययस्थादितीत्वविधिसामार्थ्यादिह यण्परिहर्तुमुचितः । यस्येति चेतीकारलोपस्तु न शङ्कितुं योग्यः ककारस्याच्त्वेऽपि प्रत्ययस्य तदादित्वाभावेन स्वादित्वाभावेन भत्वस्यैवाभावात् ।

**End :**

नेन्द्रस्य परस्येति सूत्रेण एकादेशापेक्षया पूर्वोत्तरपदाश्रयं कार्यं प्रथमं भवतीति ज्ञापनात् । अन्यथा न्यायेन सोमेन्द्रमित्यादौ वृद्धेरप्राप्त्या तन्निषेध एव व्यर्थः स्यात् । तस्मात्सहस्य सभावे नानुपपत्तिः ।

Fol. 110 contains a small portion on Vyakaraṇaviṣaya. Fol. 109*b* is left blank.

---

(*h*) परिभाषार्थसङ्ग्रहः.

PARIBHĀṢĀRTHASAṄGRAHAḤ.

Foll. 111*a*—119*a*. Fol. 119*b* is left blank.

Same work as that described under No 1474 of the D.C.S. MSS., Vol. III. By Vaidyanātha, son of Ratnagiridīkṣita.

Incomplete.

Foll. 120*a*—128*b* contain the Īkṣatyadhikaraṇavicāra (Madhvamatakhaṇḍanarūpa) of Advaita School. Foll. 129*a*—131 contain Agnistuti.

(१) ईशानस्तोत्रम्.

ĪŚĀNASTŌTRAM.

Foll. 131*b*—135*a*.

A eulogy addressed to Śrī-Śaṅkarācārya. It is intended to be a rival analogue to Trivikramapaṇḍitācārya's Vāyustuti, which work has been described under No. 9810 of the D.C.S. MSS., Vol. XVIII: by Ahōbilapaṇḍitācārya.

Complete.

**Beginning:**

ईशानं मादृशानामपि मनसि चरं तत्त्वसिद्धान्तसिन्धोः
कर्णारं कीर्तनीयं शुचिरुचिरहृदा जप्तविद्यानवद्यम् ।
मर्मोद्धारे सुलग्नं सकलनयकृतामग्रगण्यं शरण्यं
वन्देऽहं विश्ववन्द्यं विधिहरिपरमं शङ्करं निष्कलङ्कम् ॥
साङ्ख्यन्यायादिभाष्यप्रमुखकृतिमहाव्याकृतिश्रेणिकारै-
र्वाचस्पत्यादिसद्भिर्गुरुभिरभिमतैर्मण्डनाचार्यवर्यैः ।
भट्टाचार्यैस्सदार्यैस्तुतपदकमलग्रन्थकारैर्नवीनैः
बौद्धध्वान्तादिबाह्योदितमतभयदैस्सेव्यमीशानमीडे ॥

**End:**

तस्मादीशानमेनं गुरुकुलतिलकं शङ्करं नित्यशान्तं
वेदव्यासोपमानश्रुतिमतकृतितः स्मार्तकर्मप्रतिष्ठाः ।
भाट्टप्राभाकरादिस्फुटविवृतिकृतस्सर्वतन्त्रस्वतन्त्रा
धीरोदात्ता नमन्तो भुवि बहुविभवैः कीर्तिमूर्त्या वसन्ति ॥
काणादीमाक्षपादीमतिकठिनगिरं कापिलीं याभिकीं तां
वेदस्मृत्यादिवाणीफणिपतिभणितं सर्वतन्त्रप्रबन्धान् ।
व्याकुर्वन्तो न तुष्टा यतिविभुवचसां व्याकृतेस्तोषणीं तां
धीरान् नत्वा महाहोबलमुनिकथितं स्तोत्रमार्या भजन्तु ॥

Foll. 135*a*—138*b* contain the Advaitastuti of Śaṅkarabhāratī. Fol. 139 contains a letter written in Sanskrit by Kailāsanātha. Foll. 140—141 contain Kṛṣṇastuti Fol. 142 contains a letter written by Kailāsanātha in Sanskrit. Foll. 143—156 contain in Tamil the method of preparing certain medicines.

## R. No. 4265.

Palm-leaf. 17 × 2 inches. Foll. 206. Lines, 12 in a page. Grantha. Slightly injured.

Purchased in 1922-23 from M.R.Ry. Ganapati Śastrigal, Karattoluvu, Coimbatore district.

### सामवेदब्राह्मणभाष्यम्.

### SĀMAVĒDABRĀHMAṆABHĀṢYAM.

Same work as that described under No. 66 of the D.C.S. MSS, Vol. I, Part II. By Mādhavācarya.

Contains the Mahābrāhmaṇa and Ṣaḍviṃśabrahmaṇa complete.

---

## R. No. 4266.

Śrītāla. $14\frac{1}{2}$ × $2\frac{1}{8}$ inches. Foll. 248. Lines, 14 in a page. Grantha. Slightly injured.

Purchased in 1922-23 from M.R.Ry. Gaṇapati Śastrigal, Kārattoluvu, Coimbatore district.

### (*a*) ब्रह्मसूत्रभाष्यव्याख्या—शारीरकन्यायनिर्णयः.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚĀRIRAKANYĀYANIRNAYAḤ.

Foll. 1*a*—240*b*. Foll 237 and 238 are left blank.

Same work as that described under No. 4683 of the D.C.S. MSS, Vol. IX. By Ānandajñāna.

Contains the Adhyāyas 1 and 2 complete.

---

### (*b*) व्यासपूजाविधिः.

### VYĀSAPŪJĀVIDHIḤ.

Foll 241*a*—214*b*. Foll. 245—248 are left blank.

Same work as that described under No 8703 of the D.C.S. MSS, Vol. XVI.

Complete.

---

## R. No. 4267.

Palm-leaf. $17\frac{1}{2}$ × $1\frac{3}{8}$ inches. Foll. 62 Lines, 6 in a page. Grantha. Much injured.

Purchased in 1922-23 from M.R.Ry. Gaṇapati Śāstrigal, Kārattoluvu, Coimbatore district.

### गृह्यपरिशिष्टम्.

### GṚHYAPARIŚIṢṬAM.

Foll. 1*a*—60*a*.

Same work as that described under R. No. 3998 ante. The procedure laid down herein is intended to Chandōgas

Contains the Prapāṭhakas one and two complete, but wants the beginning of the first Prapāṭhaka.

**Beginning :**

अथातश्शौचविधिं व्याख्यास्यामः . . . . . . . . . . . विशेदहन्युत्तरतो निशायां दक्षिणत उभयोस्सन्ध्ययोरुदङ्मुखम . . . . . . . . . . . वल्मीके मूषिकस्थले प्रत्यग्निं प्रतिसूर्यं च प्रतिगृहं प्रतिब्राह्मणमित्याह भगवान् ।

* * * *

**Colophon:**

प्रथमः प्रपाठकस्समाप्तः ॥

अथातोऽग्निविभागं व्याख्यास्यामो गोमयेन गोचर्ममात्रमुपलिप्य तत्र गृह्याग्निं प्रणीय ।

**End:**

प्रथमं चरित्वा शुचिः पूतः कर्मण्यो भवति । द्वितीयं चरित्वा यत्किञ्चिदन्यन्महापातकेभ्यः पापं कुरुते तस्मात्प्रमुच्यते । तृतीयं चरित्वा सर्वस्मादेनसो मुच्यतेऽथैतांस्त्रीन् कृच्छ्रांश्चरित्वा सर्वेषु वेदेषु स्नातो भवति सर्वैर्देवैर्ज्ञातो भवति यश्चैवं वेद यश्चैवं वेदेत्याह भगवान् गौतमः ॥

**Colophon :**

इति गृह्यपरिशिष्टे द्वितीयप्रपाठके षड्विंशः खण्डः ॥

Foll 61*a*—62*a* give the Ṣaṣṭipūrtiśanti Foll. 60*b* and 62*b* are left blank

---

R. No. **4268.**

Palm-leaf. $14\frac{3}{8} \times 1\frac{7}{8}$ inches. Foll 111. Lines, 15 in a page. Grantha. Slightly injured.

Purchased in 1922–23 from M.R.Ry Gaṇapati Śāstrigal, Kārattoluvu, Coimbatore district.

(*a*) परिभाषेन्दुशेखरव्याख्या—सर्वमङ्गला.

PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ : SARVAMAṄGALĀ.

Foll. 1*a*—50*a*.

Same work as that described under No. 1473 of the D.C.S. MSS., Vol. III. By Śēṣaśarman, who was a Pandit in the court of Śrī Kṛṣṇarāja Wodeyar III, the grandfather of the present Maharaja of Mysore.

Incomplete.

(*b*) अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Foll. 52*a*—58*b*. Fol. 51*a* contains some prose passages of Śakuntalanāṭaka. Foll. 50*b* and 51*b* are left blank.

Same work as that described under R. No. 167(*a*) ante.

Contains the first Act incomplete.

(*c*) स्मृतिमुक्ताफलम्.

SMṚTIMUKTĀPHALAM.

Foll. 62*a*—75*b* Foll. 59—61 and 76 are left blank

Same work as that described under No. 2798 of the D.C.S. MSS., Vol. V. By Vaidyanāthadīkṣita.

Contains the Prāyaścittakāṇḍa incomplete

(*d*) उपक्रमपराक्रमः.

UPAKRAMAPARĀKRAMAḤ.

Foll. 77*a*—106*b*.

Same work as that described under R. No. 1109 of the D.C.S. MSS., Vol. IX, wherein see for the beginning. By Appayadīkṣita.

Complete.

**End:**

अर्वाचीनैः स्वमतस्येतरमतवैलक्षण्यप्रकटनाय कल्पितोऽयमुपक्रमोपसंहारबलाबलव्यत्ययो यवनगुरूपदिष्टशौचमुखक्षालनपूर्वापरव्यत्ययवदुपेक्षणीयः प्रामाणिकैरिति प्रसिद्धम् ॥

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलिरस्त्यप्पदीक्षित इति प्रथितस्तनूजः ॥

अकरोदयमक्लिष्टमात्मबुद्धिविशुद्धये ।
उपसंहृतदुर्न्यायमुपक्रमपराक्रमम् ॥

Foll. 107*a* and 108 contain a portion of Paribhāṣēnduśēkhara. Foll. 107*b* and 109—111 are left blank.

## R. No. 4269.

Palm-leaf. 15½ × 1½ inches. Foll. 272. Lines, 9 in a page. Grantha. Injured.

Purchased in 1922-23 from M.R.Ry. Gaṇapati Śāstrigal, Kārattoluvu, Coimbatore district.

Foll 270—272 are left blank

### द्राह्यायणश्रौतसूत्रभाष्यम्.

### DRĀHYĀYANAŚRAUTASŪTRABHĀSYAM.

Same work as that described under R. No. 2148(b) ante, wherein see for the beginning. By Dhanvin.

Complete.

**End** :

पृष्ठ्यादेशरोहसिद्धिरिति । अमावास्यायाः प्रसवे सहस्रसंवत्सरे— इति प्रजापतेस्सहस्रसंवत्सरं विश्वसृजायमानं सहस्रसंवत्सरं च द्वे अप्यमा. वास्याप्रसवे भवतः, अमावास्यायां प्रथमसुत्या ·यस्य तदमावास्याप्रसवम् । तथा सति पूर्वपक्षोत्थानसिद्धिरिति ॥

**Colophon** :

एकत्रिंशः पटलः ॥

इति काश्यपगोत्रेण सुतसोमेन धन्विना ।
सूत्रस्यारोपितो दीपः प्रीयतां पुरुषोत्तमः ॥
निदानकल्पोपग्रन्थब्राह्मणानि पुनः पुनः ।
निरीक्ष्य धन्वी सूत्रस्य दीपमारोपयत् स्फुटम् ॥

The scribe adds—

रामभद्रस्वहस्तलिखितम्.

## R. No. 4270.

Palm-leaf. 15¾ × 1⅞ inches. Foll. 17. Lines, 12 in a page. Grantha. Injured.

Purchased in 1922-23 from M.R.Ry. Gaṇapati Śāstrigal, Kārattoluvu, Coimbatore district.

### चण्डकौशिकम्.

### CAṆḌAKAUŚIKAM

Same work as that described under No. 12514 of the D.C.S. MSS., Vol. XXI. By Kṣēmēśvara.

Complete.

---

R. No 4271.

Palm-leaf. 18¾ × 1⅝ inches. Foll 47. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1922–23 from M.R.Ry. Sūryanārayana Śāstrigaru, Melanathur, Amadalapadu, Muthukuru post, Nellore district

छन्दोविचितिः, सभाष्या.

CHANDŌVICITIḤ WITH COMMENTARY.

Same work as that described under No 906 of the D.C.S. MSS., Vol. II. By Yādavaprakāśa.

Complete.

R. No. 4272.

Palm-leaf. 18½ × 1½ inches. Foll. 66. Lines, 8 in a page Telugu. Much injured.

Purchased in 1922–23 from M.R.Ry. Sūryanārāyana Śastrigāru, Melanathur, Amadalapadu, Muthukuru post, Nellore district

काव्यदर्पणः.

KĀVYADARPAṆAḤ.

Same work as that described under R. No 191 ante. By Rajacūḍāmaṇidīkṣita.

Contains the seventh Ullāsa complete.

---

R. No. 4273.

Palm-leaf. 18¾ × 1½ inches. Foll. 43. Lines, 9 in a page. Telugu. Much injured.

Purchased in 1922–23 from M.R.Ry. Sūryanārāyaṇa Śastrigāru, Melanathur, Amadalapadu, Muthukuru post, Nellore district.

महाभाष्यप्रदीपोद्द्योतनम्.

MAHĀBHĀṢYAPRADĪPŌDDYOTANAM

Foll. 6*a*—39*a*. Foll. 1*a*—5 and 39*b*—43*b* are left blank.

Same work as that described under R. No. 271, 1515(*a*) and 3143(*a*) ante. By Annambhaṭṭa.

Contains the Āhnikas 1—3 in the first Pāda of the first Adhyāya.

R. No. **4274.**

Palm-leaf. 16 × 1⅝ inches. Foll. 25. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1922-23 from M.R.Ry. Sūryanārāyaṇa Śāstrigāru, Melanathur, Amadalapadu, Muthukuru post, Nellore district.

(*a*) विरूपाक्षपञ्चाशिका, सव्याख्या.

VIRŪPĀKṢAPAÑCĀŚIKĀ WITA COMMENTARY.

Foll 1*a*–17*a*

(This work is printed as Vol IX of Trivandrum Sanskrit series)

A commentary on Virūpākṣanātha's Virūpakśapañcāśikā which is a metaphysical work in fifty stanzas, in close connexion with the Pratyabhijñā School: by Mahāmahēśvarācārya alias Vidyacakravartin

Complete.

**Beginning**:

नमो विश्वशरीराय विश्वैकात्म्यावभासिने ।
नित्यप्रत्यवमर्शाय शम्भवे विश्वसिद्धये ॥

संवित्सिद्धान्तसिद्धार्थसारसङ्ग्रहरूपिणीम् ।
पञ्चाशिकां विरूपाक्षप्रोक्तां व्याकुर्महे वयम् ॥

इह विश्वानुग्रहैकरसिकः श्रीमान् परमशिवभट्टारकः परिगृहीतलीलाविग्रहः श्रीविरूपाक्षनाथपादनाम्ना परिभ्रमन् कदाचिद् दिविषदां नाथं

* * * *

चतुस्स्कन्धमिदं शास्त्रम् । अवान्तरभेदास्तत्रोपवर्ण्यन्ते । अथ ग्रन्थं व्याकुर्मः । तत्र शास्त्रमवतारयितुं पीठिकाबन्धमारचयति ---

(मू) गन्धगजसमररसिकायेन्द्राय प्रकटिताद्रियुगसमरः ।
निजसिद्धिबीजमस्मै कथयति पृष्टो विरूपाक्षः ॥

पृष्ट इति प्रश्नलिङ्गानुमेयेन शक्तिपातेन तस्य तत्त्वोपदेशार्हत्वादधिकारित्वं सूचितम् । कथयतीति शाब्दीं दीक्षामुपक्रमते ।

* * * *

**Colophon:**

इति श्रीमहामहेश्वराचार्यश्रीविद्याचक्रवर्तिनः कृतौ श्रीविरूपाक्षपञ्चाशिकाविवरणे विश्वशरीरत्वविवेचनस्कन्धः प्रथमः ॥

**End :**

पशुत्वमवधूय स्वमात्मानं शिववदपश्यत् । शिवो बोधकत्वेन पुरोऽवस्थिताः श्रीविरूपाक्षनाथपादाः । एवं बोधितस्य गुरुव्यतिरेकेण शिवान्तरस्यासम्भवात्, तद्वदपश्यत् । तदानीमनयोर्बोध्यबोधकयोर्ज्ञाने न तारतम्यकला काचित् ; अपि तु अग्रतोऽस्य गुरुस्साक्षात्परमेश्वर एवास्तीति निष्प्रत्यवायं प्रतिपद्यत इति शिवम् ॥ आहत्य ५२ ॥

स्वरूपप्रत्यभिज्ञानमनायासेन लिप्सुभिः ।
पञ्चाशिकाया विशदा वृत्तिरेषा निषेव्यताम् ॥
कृतेयं विवृतिर्लघ्वी श्रीविद्याचक्रवर्तिना ।
गोविन्दचन्द्रधीनाम्नो निकषा विनिषेविना ॥

**Colophon :**

इति श्रीमहामहेश्वराचार्यश्रीविद्याचक्रवर्तिनः कृतौ श्रीविरूपाक्षपञ्चाशिकाविवरणे विभूतिस्कन्धः चतुर्थः ॥

समाप्तोऽयं ग्रन्थः ॥

Date of transcription—13th day of the dark fortnight of the lunar month Phālguna in the year Pārthiva. Name of the scribe—Raṅgā Śāstrin.

Fol. 17*b* contains a few stanzas in the X Skandha of the Bhāgavata.

## (*b*) विरूपाक्षपञ्चाशिका.

## VIRŪPĀKṢAPAÑCĀŚIKĀ.

Foll. 18*a*—19*b*.

Text is the same as that described under subdivision (*a*) of this number.

Complete in four Skandhas.

**Beginning :**

गन्धगजसमररसिकायेन्द्राय प्रकटितादिदुर्गसमरः ।
निजसिद्धिबीजमस्मै कथयति पृष्टो विरूपाक्षः ॥

**End :**

इति बोधितस्स इन्द्रो देवेष्वधिकारमलमपोह्य स्वम् ।
आविष्टशक्तिपातश्शिववदपश्यत्स्वमात्मानम् ॥

**Colophon :**

इति श्रीविरूपाक्षपञ्चाशिकायां विभूतिस्कन्धश्चतुर्थः ॥

---

(*c*) षट्चक्रनिरूपणम्.

ṢAṬCAKRANIRŪPAṆAM.

Foll. 20*a*—24*a*. Fol 24*b* is left blank.

On the description of six diagrams, viz., मूलाधार, स्वाधिष्ठान, मणिपूर, विशुद्ध, आज्ञा and अनाहत in a human body : by Pūrṇānanda.

Complete.

**Beginning :**

अथ तन्त्रानुसारेण षट्चक्रादिक्रमोद्गतः ।
उच्यते परमानन्दनिर्वाहप्रथमोऽङ्कुरः ॥

मेरोर्बाह्यप्रदेशे शशिमिहिरसिरे सव्यदक्षे निषण्णे
मध्ये नाडी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्याग्निरूपा ।
धुर्तूरस्मेरपुष्पा प्रथिततमवपुस्स्कन्धमध्याच्छिरस्स्था
वज्राख्या मेढ्रदेशाच्छिरसि परिणता मध्यमस्या ज्वलन्ती ॥

*

ध्यात्वैतन्मूलचक्रान्तरविवरलसत्कोटिसूर्यप्रकाशात्
वाचामीशो नरेन्द्रस्स भवति सहसा सर्वविद्याविनोदी ।
आरोग्यं तस्य नित्यं निरवधि च महानन्दचित्तान्तरात्मा
वाक्यैः काव्यप्रबन्धैः सकलसुरगुरून् सेवते शुद्धशीलः ॥

**End :**

योऽधीते निशि मध्ययोरथ दिवा योगी स्वभावस्थितः
मोक्षज्ञाननिदानमेतदमलं शुद्धं सुशुद्धक्रमम् ।
श्रीमच्छ्रीगुरुपादपद्मयुगलालम्बी यतान्तर्मनाः
तस्यावश्यमभीष्टदैवतपदे चेतो नरीनृत्यते ॥

**Colophon :**

इति श्रीपूर्णानन्दविरचितं षट्चक्रनिरूपणं समाप्तम् ॥

Fol. 25 contains a few stanzas with meaning in the XI Skandha of the Bhāgavata.

## R. No. 4275.

Palm-leaf. 17⅝ × 1⅝ inches. Foll. 21. Lines, 8 in a page. Telugu. Much injured.

Purchased in 1922–23 from M.R.Ry Sūryanārāyaṇa Śāstrigāru, Melanathur, Amadalapadu, Muthukuru post, Nellore district.

तन्त्रराजव्याख्या—मनोरमा.

TANTRARĀJAVYĀKHYĀ : MANŌRAMĀ

Foll 1*a*—19*b*

Same work as that described under Nos 5635—5637 of the D C S MSS, Vol XII. By Subhagānanda.

Contains the Paṭalas 9—14 complete.

Fol. 20*a* gives a portion of the eighth Paṭala of this work. Foll 20*b* and 21 are left blank

---

## R. No. 4276.

Palm-leaf. 18 × 1½ inches. Foll. 72. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1922–23 from M.R.Ry Sūryanārāyaṇa Śāstrigāru, Melanathur, Amadalapadu, Muthukuru post, Nellore district

(*a*) वर्षतन्त्रम्, आन्ध्रटीकासहितम्.

VARṢATANTRAM WITH TELUGU MEANING

Foll 1*a*—26*a*

Similar to the work described under R. No. 157(*a*) ante.

Incomplete.

**Beginning:**

वर्षतन्त्रं प्रवक्ष्यामि सर्वेषामुत्तमोत्तमम् ।
अतीव सुलभोपायं सूर्यसिद्धान्तसम्मितम् ॥
नागाष्टशैलनिगमा (४७८८) सम्मिते कलिवत्सरे ।
सङ्क्रमव्यवहारादि वेदाभ्रनिगमामराः (३३४०४) ॥

वर्षे वर्षे—

सङ्क्रान्तिगतिरर्कस्य वर्षे वर्षे प्रकल्पयेत् ।
भूस्तिथ्यः कुगुणाः क्रमिजिना वर्षे घि(दि)नादिकम् ॥
इष्टाब्दसङ्ख्यया हत्वा षष्ट्यान्त्या द्विपरादिकम् ।
उपर्युपरिसंयुक्तमाद्यं सप्तविभाजितम् ॥

शेषं वारध्रुवयुतं भानोर्मध्यमसङ्क्रमः ।
द्विदिनं दश नाड्यस्तु त्रयोदश विलिप्तिकाः ॥
मध्यसङ्क्रमतस्त्यक्त्वा स्फुटसङ्क्रम उच्यते ।

**End :**

व्युत्क्रमेण षडेवैते भवन्तीष्टास्तुलादयः ।
गतभोग्या सर्वकार्या भास्करादिष्टकालिकात् ॥

---

(*b*) सूर्यसिद्धान्तः.

SŪRYASIDDHĀNTAḤ

Foll 26*a*—33*a* Fol. 33*b* is left blank.

Same work as that described under No. 13513 of the D.C.S. MSS., Vol XXIV.

Breaks off in the III Adhyaya.

---

(*c*) कालनिर्णयः.

KĀLANIRNAYAḤ

Foll 34*a*—58*b*

Similar to the work described under R. No. 969(*a*) ante.

Complete

**Beginning:**

सर्वानुष्ठानसिद्ध्यर्थं कालनिर्णय उच्यते ।
कालनिर्णयमज्ञातः(त्वा) कुर्यात्कर्माणि न क्वचित् ॥
उक्तकाले फलं दद्युरनुक्ते निष्फलानि तु ।
तस्मात्सूक्ष्मतरः कालः स्थूलमार्गेण वक्ष्यते ॥
लघ्वक्षरसमा मात्रा निमेषः काल उच्यते ।

* * *

अथायननिर्णयः उच्यते—

मृगादिषट्कगे भानौ सौम्यायनमिति स्मृतम् ।
कर्कटादिकषट्सूर्ये याम्यायनमिति स्मृतम् ॥

**End :**

रत्नावल्याम्—

पूर्वतः परतो वापि नवम्यावर्तनी भवेत् ।
तस्यां व्रतमुपक्रम्य विधिवद्राममर्चयेत् ॥

**Colophon:**

इति कालनिर्णयस्समाप्तः ॥

Date of transcription—13th day of the bright fortnight of the lunar month Pusya in the year Nandana. Name of the scribe—Peddagayya Narasimha Śāstrin

(*d*) कालादर्शः.

KĀLĀDARŚAḤ.

Foll. 59*a*—72*a* Fol. 72*b* is left blank

Text is the same as that described under No. 3115 of the D C S. MSS., Vol VI. By Ādityasūri

Incomplete.

---

R. No. **4277.**

Śrītāla. 22 × 2¼ inches. Foll. 58. Lines, 15 in a page. Telugu. Slightly injured.

Purchased in 1922-23 from M R Ry Sūryanārayana Śastrigaru, Melanathur, Amadalapadu, Muthukuru post, Nellore district

Foll. 1 and 2 are left blank,

(*a*) प्रियदर्शिका.

PRIYADARŚIKĀ.

Foll 3*a*—12*b*

A Nāṭikā in four Acts having for its plot the story that led to the marriage of Priyadarśikā with Vatsarāja : by Śrīharṣa.

Complete.

**Beginning:**

धूमव्याकुलदृष्टिरिन्दुकिरणैराह्लादिताक्षी पुनः
पश्यन्ती वस(र)मुत्सुकानतमुखी भूयो ह्रिया ब्रह्मणः ।
सेर्ष्या पादनखेन्दुदर्पणगते गङ्गां दधाने हरे
स्पर्शादुत्पुलका करग्रहविधौ गौरी शिवायास्तु वः ॥

अपि च—

कैलासाद्रावुदस्ते परिचलति गणेषूल्लसत्कौतुकेषु
क्रोडं मातुः कुमारे विशति विषमुचि प्रेक्षमाणे सरोषम् ।
पादावष्टम्भसीदद्वपुषि दशमुखे याति पातालमूलं
क्रुद्धोऽप्याश्लिष्टमूर्तिर्भयघनमुमया पातु हृष्टः शिवो वः ॥

नान्द्यन्ते सूत्रधारः (परिक्रम्य)—

अद्याहं वसन्तोत्सवे सबहुमानमाहूय नानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः—यथास्मत्स्वामिनापूर्ववस्तुरचनालङ्कृता प्रियदर्शिका नाम नाटिका कृतेति अस्माभिः श्रुता न प्रयोगतो दृष्टा ।

**End:**

निश्शेषं दृढवर्मणा पुनरपि स्वाराज्यमध्यासितं
त्वं कापेन सुदूरमप्यपहृता सद्यः प्रसन्ना मम ।
जीवन्ती प्रियदर्शना च भगिनी भूयस्त्वया सङ्गता
किं नः स्यादपरं प्रियं प्रियतमे यत् साम्प्रतं प्रार्थ्यते ॥

तथापीदमस्तु भरतवाक्यम्—

उर्वीमुद्दामसस्यां (जनयतु विसृजन्वासवो) वृष्टिमिष्टा-
मिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः ।
आकल्पान्तं च भूयात् स्थिरसमु(प)चिता सङ्गतिः सज्जनानां
निश्शेषं यान्तु शान्तिं पिशुनजनगिरो दुस्सहा वज्रलेपाः) ॥

इति निष्क्रान्तास्सर्वे ॥

**Colophon:**

चतुर्थोऽङ्कः ॥

समाप्ता च प्रियदर्शिका नाम नाटिका ॥

(*b*) रत्नावली.

RATNĀVALĪ

Foll. 14*a*—23*b* Fol. 13 is left blank

Same work as that described under No. 12629 of the D.C.S. MSS., Vol. XXI. By Śrīharṣa.

Complete

(*c*) अमरुशतकम्.

AMARUŚATAKAM.

Foll. 24*a*—26*b*.

Same work as that described under No. 11917 of the D.C.S MSS., Vol. XX, but with a different colophon as given below :—

इति वीरनारायणसकलविद्याविशारदकोमटिवेमभूपालविरचितम् ॥
इति श्रीमच्छङ्कराचार्यविरचितममरुकं नाम शृङ्गारकाव्यं समाप्तम ॥

(*d*) अमरुशतकम्, शृङ्गारदीपिकाव्याख्यासहितम्.

AMARUŚATAKAM WITH THE COMMENTARY ŚṚṄGĀRA-DĪPIKĀ.

Foll 27*a*—41*b*.

Same work as that described under Nos. 17 and 18 of M Seshagiri Sastri's Report No. 2 By Peddakōmaṭi Vēmabhūpala.

Complete.

The scribe adds—

अमृगं नाम शृङ्गारकाव्यं व्याख्यानसंयुतम् ।
कोशं विलिख्य गोविन्दपुरीवंशाब्धिचन्द्रमाः ॥
ब्रह्माभिधो ददौ कृष्णप्रीतये शम्भवे ततः ।
ये पठन्तीदमाख्यातं ते रसज्ञा भवन्ति हि ॥

(*e*) प्रबोधचन्द्रोदयः.

PRABŌDHACANDRŌDAYAḤ.

Foll. 42*a*—53*b*

Same work as that described under R. No 1108 ante

Complete.

The scribe adds—

प्रबोधचन्द्रोदयनामनाटकं विलिख्य हिङ्गदधिसोमरूपिणे ।
ददौ च लक्ष्मीधवनामधारिणे ब्रह्माभिधः काश्यपगोत्रजो मुदा ॥

(*f*) रसमञ्जरी.

RASAMAÑJARĪ.

Foll. 54*a*—57*b*.

Text is the same as that described under R No 680 ante. By Bhānudatta.

Complete.

Fol. 58 gives the Padyamañjarī of Pērusūri.

R No. 4278.

Palm-leaf. 15 × 1½ inches. Foll. 74. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1922–23 from M.R.Ry. Sūryanārāyaṇa Śāstrigāru, Melanathur, Amadalpadu, Muthukuru post, Nellore district

शिवनामकल्पवल्ल्यालवालम्, सुधापूरसहितम्.

ŚIVANĀMAKALPAVALLYĀLAVĀLAM WITH SUDHĀPŪRA

A treatise in 117 stanzas describing the importance and value of devotion towards Śiva The text is by Bhāskararāya, son of Gaṁbhīrarāyabhāratīdīkṣita and disciple of Bāla-Gōpālēndrayati The work is followed by a commentary by Vēṅkaṭapati, who wrote the commentary to please one Kaśīpati. The text is also called Ratnāvalī and the commentary as Sudhāpūra.

Complete.

**Beginning:**

वेदान्तगीतविभवं पुरुषं पुराणमात्मानमाद्यमनघं करुणावतीर्णम् ।
यस्यावलम्बनवशाद्विलयं प्रयाति विघ्नान्धकारनिचयस्तमहं भजामि ॥

* * * *

अद्वैताब्धिगसत्सुधारसयुतैर्द्वैतप्रभावोद्भवैः
पद्यैस्सूक्तिनिरुक्तिवाक्यरचनैर्न्यायामृतच्छाविंतैः ।
विद्याबोधनतः प्रसिद्धविभवान् विद्वत्समाजोल्लस-
द्गोपालेन्द्रयतीन्द्रपूज्यचरणान् श्रीबालपूर्वान् भजे ॥

* * * *

स्कान्दाद्रौ शिवनामकल्पलतिकां रूढां पुमर्थैः फलै-
रानम्रामुपलभ्य भास्करमखी रत्नालवालं व्यधात् ।
वृत्तानां शतकं ससप्तदशकं यत्राभितस्तत्सुधा-
सारैः पूरयति स्म वेङ्कटपतिः काशीपतिप्रीतये ॥

* * * *

इह खल्वखिल . . . . . . . रत्यन्तमनादिभावनैकबद्धाशयैश्चित्तमशान्तिमलभमानान् प्रबलकलिमलकलुषीकृतान्तस्वान्तान् जन्मव्याधिजरामृत्युतापसन्तप्तान् . . . . . . . . . . . .

* * * *

सन्दर्शनसन्दर्भतत्त्वज्ञः श्रीमद्गम्भीररायभारतीदीक्षितार्यवर्यात्मजवैभवोल्लसित-भारतीविलासास्पदश्रीमद्भास्कररायदीक्षिताग्निचित् परमेश्वरभक्ताग्रगण्य . . .

*   *   *   *

शिवनामनिर्वचनाढ्यां रत्नावल्याख्यस्तुतिं प्रणिनीषुस्तत्परिसमाप्तिप्रतिबन्धक-प्रत्यूहापोहाय परमपुरुषार्थसम्प्राप्तये चाचरितं परमशिवप्रतिपादकं मङ्गल-मशेषजनानुजिघृक्षया ग्रन्थतो निबध्नाति मोक्षस्यैकेति ।

मोक्षस्यैकनिदानमब्जनयनब्रह्मेन्द्रचन्द्रादिभिः
देवैः प्राणपदीकृतं कलिमलप्रध्वंसि धर्माङ्कुरः ।
भारत्यापि सुदुर्निरूपमहिमा त्रय्यन्तरे गोपितं
वक्तुर्मङ्गलदं शिवेति विमलं नामैव नस्तारकम् ॥

धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेष्वपि अचिन्त्यनिरतिशयानन्दावाप्ति-रूपमोक्ष एव परमपुरुषार्थः ; न स पुनरावर्तते न स पुनरावर्तत इति श्रुत्या तस्यैव परमत्वावगमादित्यतस्तत्प्राप्तिसाधनमेवादौ दर्शयति—मोक्षस्यैक-निदानमिति । मोक्षस्य सालोक्यसायुज्यसारूप्यसामीप्यकैवल्याख्यस्य पञ्च-विधस्यापवर्गस्य एकं निदानमादिकारणमित्यर्थः । अनितरसाधारणसाधन-प्राप्यत्वमाविष्कर्तुमेकेति ।

**End:**

प्रागुपक्रान्तमुपसंहरति—इतीति ।

इति काशिनिवासिसाग्निचित्यक्रतुकृद्भास्कररायभारती ।
जनुषः सफलत्वसिद्धये शिवनामाष्टशतं व्यवर्वरीत् ॥

अग्निचित्येन सहितं क्रतुं करोतीतिसाग्निचित्यक्रतुकृत् । काशिनिवासी चासौ सचेति तथा । भारत्यन्तमेकं पदम् । भारतीति कतुरुपनाम भास्करा-यस्य । भारती वाणीति वार्थः सैव ग्रन्थकर्त्रीति यावत् । व्यवर्वरीत् विवृत वान् । वृणोतेर्व्युपसृष्टाद्यङ्लुकि लङि रूपम् । अत्र प्रथमश्चरण औपच्छन्द-सिकस्य । इतरे त्रयो वैतालीयस्य । अत एव काशीपदस्य ह्रस्वान्तः पाठः ।

*   *   *   *

श्रीमच्छङ्करसंहिताशिवरहस्यादिप्रसिद्धात्मनां
नाम्नामष्टशतस्य साष्टकशतश्लोक्या निरुक्तिं व्यधात् ।

श्रीभारत्युपनामभास्करकृती तां विस्तराद्दुस्तरां
व्याचख्यौ पटुवङ्कटाचलपातः काशीपतिप्रीतये ॥
शिवनामकल्पवल्ल्या भास्करकविरालवालमाबध्नात्
तद्वेङ्कटाचलसुधीः सुधाभिरापूरयामास ॥

**Colophon:**

इति श्रीवेङ्कटाचलसुधीप्रणीतः श्रीशिवनामकल्पलतालवालसुधापूरस्समाप्तः ॥

The scribe adds—

वर्षेऽस्मिन्नीश्वराभिख्ये मार्गशीर्षे सितेऽपि च ।
पक्षे भानुसमायुक्तपञ्चम्यां लिखितोऽह्निना ॥
श्रीमत्कौशिकवंशदुग्धजलधेः चन्द्रायितः कीर्तिमान्
एतां श्रीशिवनामकल्पलतिकां सर्वार्थसम्पादिनीम् ।
सर्वप्राकृतसंस्कृतान्ध्रविषये प्रज्ञावतां सूरिणां
श्रेष्ठः श्रीशिवतोषणस्य कृतये व्यालिख्य तां सर्पराट् (?) ॥

## R. No. 4279.

Palm-leaf. 14½ × 1½ inches. Foll. 36. Lines, 10 in a page. Telugu. Injured.

Purchased in 1922-23 from M.R.Ry Sūryanārāyaṇa Śāstrigāru, Melanathur, Amadalapadu, Muthukuru post, Nellore district.

### (a) अद्वैतमकरन्दः, रसाभिव्यञ्जिकासहितः.

### ADVAITAMAKARANDAḤ WITH RASĀBHIVYAÑJIKA.

Foll. 1a—14a Fol 14b is left blank.

Same work as that described under No 1522 of the D.C.S. MSS., Vol IX. The text is by Lakṣmīdhara and the commentary by Svayamprakāśayati who was the pupil of Kaivalyanandayōgīndra

Complete.

---

### (b) राजयोगलक्षणविषयः.

### RĀJAYŌGALAKṢAṆAVIṢAYAḤ

Foll. 15a—24b.

Similar to the work described under No. 4374 of the D.C.S. MSS., Vol. IX.

Incomplete

**Beginning :**

हठयोगलक्षणं विस्तरेण निशम्य प्राकृतस्सद्गुरुमेवमवादीद्राजयोगं वद कृपयेति । स तु विनयसद्वचनं गुरुभक्ताग्रगण्यं शिष्यं शृणु सावधानेनेत्यादरेणेदमाह--राजयोगो राज्ञ उपयुक्तो योगस्तथोच्यते । योगानां राजेति वा । पूर्वोक्ता योगा देहप्रयासकराः । अयं तु निरायासेन मोक्षरूपपुरुषार्थवादः । हठवदस्याष्टा(ब)ङ्गानि सन्ति ।

**End :**

हृदयकमले भगवत्सत्तामात्रमुक्तान्तर्लक्ष्यरूपमवाप्य सुषुप्त्यवस्थया मुक्तब्रह्मानन्दस्मृतिं लब्ध्वा एक एवाहं न द्वितीयः, कञ्चित्कालमज्ञानवृत्त्या विश्वोऽस्मि, जाग्रद्व्यसनानुभवेन तैजसोऽस्मि, तदुभयनिवृत्त्या प्राज्ञ इदानीमस्म्य - . . . .

(*c*) वाक्यवृत्तिः, वाक्यवृत्तिप्रकाशिकासहिता.

VĀKYAVṚTTIḤ WITH VĀKYAVṚTTIPRAKĀŚIKĀ

Foll. 25*a*—36*a*. Fol. 36*b* is left blank.

Same work as that described under No 4722 of the D.C.S. MSS., Vol. IX. The text is by Śaṅkarācārya and the commentary by Viśvēśvarapaṇḍita

Complete.

---

## R. No. 4280.

Palm-leaf. 17⅜ × 1½ inches. Foll. 109. Lines, 9 in a page. Telugu. Much injured.

Purchased in 1922-23 from M.R.Ry. Sūryanārāyaṇa Śāstrigāru, Melanathur, Amadalapadu, Muthukuru post, Nellore district

(*a*) हरिमीडेस्तोत्रम्, भावदीपिकाव्याख्यासहितम्.

HARIMĪḌESTŌTRAM WITH THE COMMENTARY BHĀVADĪPIKĀ

Foll. 1*a*—37*a* Fol 37*b* is left blank

Same work as that described under No. 10472 of the D.C.S. MSS., Vol. XVIII. The text is by Śaṅkarācārya and the commentary by Svayaṁprakāśayati.

Wants the beginning ; otherwise complete.

The commentary is also called Haritattvamuktāvalī.

(*b*) आचार्यभुजङ्गप्रयातस्तोत्राष्टोत्तरशतम्, सव्याख्यानम्.
ĀCĀRYABHUJAṄGAPRAYĀTASTŌTRĀṢṬŌTTARAŚATAM WITH COMMENTARY.

Foll 38*a*—109*b*

A eulogy in 108 stanzas addressed to Śiva in the Bhujaṅgaprayāta metre: by Śaṅkarācārya

The work is followed by a commentary.

Complete

**Beginning:**

सदेकं परं केवलं निर्विकारं निराकारमानन्दमात्रं पवित्रम् ।
स्वयंज्योतिरव्यक्तमाकाशकल्पं श्रुतिर्ब्रह्म यत्प्राह तस्मै नमस्ते ॥

वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम् ।
रक्तशुक्लप्रभामिश्रमतर्क्यं त्रैपुरं महः ॥
रज्जुसर्पवदुत्पन्नं सर्वमेतज्जगद्यतः ।
वन्दे तं प्रत्यगात्मानं भूमानं परमेश्वरम् ।

इह खलु कश्चिद्भक्तः—

"यावदायुस्त्रयीविद्या वेदान्ता गुरुरीश्वरः ।
आदौ विद्याप्रसिद्ध्यर्थं कृतघ्नत्वापनुत्तये ॥"

इति स्मृतिमनुस्मरन् कृतघ्ने नास्ति निष्कृतिरिति मन्वानस्सन् यत्कृतभाष्यश्रवणेन स्वयं कृतार्थत्वं प्राप्तवान् तदाय भुजङ्गप्रयातं स्तोत्रमारभमाणः शिष्टाचारपरिपालनार्थमिष्टदेवतास्मरणरूपं मङ्गलमाचरति—सदेकमिति । सत् कालत्रयाबाध्यत्वेन सत्यमेकं मुख्यम् । अत एव परं मिथ्याभूतत्वेन निकृष्टात्प्रपञ्चाद्विलक्षणं सर्वोत्कृष्टं केवलमद्वितीयम् ।

**End:**

इदानीं श्रवणफलं वदन् उपसंहरति—इति श्रीगुरोरिति । शङ्कराचार्यनाम्नः शङ्कराचार्य इति नाम संज्ञा यस्य तस्य श्रीगुरोः श्रिया प्रकाशमानया विद्यया गुशब्दवाच्यमन्धकारं निरोधयति स्वभक्तानां यस्तस्य प्रत्यगभिन्नब्रह्मस्वरूपस्य परमार्थतो निरुपाधेः व्यवहारतस्सकलविमलसत्त्वगुणोपाधेः परमात्मनः परमेश्वरस्य इति एवंप्रकारेण स्वरूपप्रकाशं याथार्थ्यप्रकाशकं भुजङ्गप्रयातमिदं स्तोत्रम् अत्रास्मिन् लोके यः पुमान् भक्तितः भक्त्या शृणोति गुरुमुखादाकर्णयति

* * * *

एतद्भुजङ्गप्रयातश्रवणादेव तदर्थविचारजनिताद्वितीयात्मज्ञानात्मिकां परमार्थतः चिद्रूपावस्थितिरूपां व्यवहारतः . . . . . . . . . . . . . . . . . . मात्मिका भक्तिरिह भवतीति सर्वमनवद्यम् ॥

**Colophon:**

इति श्रीमदाचार्यभुजङ्गप्रयातिस्तोत्राष्टोत्तरशतकव्याख्या समाप्ता ॥

## R. No. 4281.

Palm-leaf. 18⅝ × 1½ inches. Foll. 50. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1922-23 from M.R.Ry Sūryanārāyaṇa Śāstrigaru, Melanathur, Amadalapadu, Muthukuru post, Nellore district.

Fol. 1 contains the Upākarmaviṣaya. Foll. 2 and 3 contain a portion of Kālamādhava.

(*a*) कर्मकालप्रदीपिका.

KARMAKĀLAPRADĪPIKĀ.

Foll. 4*a* – 13*b*

Similar to the work described under No. 3106 of the D.C.S. MSS, Vol VI. By Vijñānayōgin.

Complete.

**Beginning:**

प्रजापतिं नमस्कृत्य लोकानुग्रहकाम्यया ।
विज्ञानयोगी तनुते कर्मकालप्रदीपिकाम् ॥
नित्य एको महान् कालो जगदुत्पत्तिकारणम् ।
सर्वेषामेव भावानामवस्थानाच्च कारकः ॥
जन्योऽप्यन्योऽपि कालोऽस्ति संवत्सरपुरस्सरः ।
यस्यैवावयवैर्लोके क्रियन्ते सकलाः क्रियाः ॥
चान्द्रस्सौरस्सावनश्च बार्हस्पत्यस्तथैव च ।
नाक्षत्रश्चेति विज्ञेयो वत्सरः पञ्चलक्षणः ॥

**End:**

नित्यनैमित्तिकान्येवं कुर्वन् श्राद्धानि सर्वतः ।
यतः श्रियं च विपुलामन्ते स्वर्गं च सोऽश्नुते ॥

विज्ञानयोगिना प्रोक्तां कर्मकालप्रदीपिकाम् ।
सम्यगालोच्य वर्तध्वं यथेष्टं सर्वकर्मसु ॥

Date of transcription—7th day of the dark fortnight of the lunar month Āsāḍha in the year Raktākṣin. Name of the scribe—Appayyangār.

---

(*b*) स्मृतिमुक्ताफलम् .

SMṚTIMUKTĀPHALAM

Foll. 14*a*—34*b*

Same work as that described under R No 158(*a*) ante. By Vaidyanātha.

Contains the Kalaparicchēda complete

Foll 35*a*—50*b* contain the Laghumanasatīkā in Telugu.

---

R. No **4282.**

Palm-leaf. 18¾ × 1½ inches. Foll. 57. Lines, 8 in a page Telugu. Much injured.

Purchased in 1922–23 from M.R.Ry Sūryanarayaṇa Śāstrigāru, Melanathur, Amadalapadu, Muthukuru post, Nellore district.

प्राकृतमणिदीपः.

PRĀKṚTAMAṆIDĪPAḤ

Foll 1*a*—32*b*.

Same work as that described under R. No. 2346(*a*) ante, wherein see for the end By Appayadīkṣita.

Complete.

**Beginning :**

पाणिग्रहे पाण्ड्यकुमारिकायाः पायात्स मी(ई)शं(शः) परमेश्वरेण ।
अन्योऽन्यलाभाच्छिवयोर्विचित्रं यस्मिन् जयोऽभूदुभयोस्समानः ॥

अश्रान्तकलितोन्मेषमनञ्जनकृतव्यधम् ।
अनाविलमिदं चक्षुस्साहित्यं ब्रह्म पश्यताम् ॥

सूक्ष्मार्थं ग्राहयतां मन्दानपि नाटकं मृदूपायः ।
तस्यापि जीवितमिदं प्राकृतमप्राकृतेन यन्मिश्रम् ॥

ये त्रिविक्रमदेवेन हेमचन्द्रेण चेरिताः ।
लक्ष्मीधरेण ये ग्रन्था भोजेन च महीक्षिता ॥

ये पुष्पवननाथेन ये वा वाररुचा अपि ।
वार्त्तिकार्णवभाष्याद्या अप्पयज्वकृताश्च ये ।

ते विस्तृतत्वात्प्रायेण सङ्क्षेपरुचिभिर्जनैः ।
अगृहीता विलम्ब्यन्ते सन्ध्यार्ककिरणा इव ॥
अतः प्राकृतशब्दानामन्धे तमसि मज्जताम् ।
प्रकाशनाय क्रियते सङ्क्षिप्ता मणिदीपिका ॥
प्राकृतरूपमशेषं पश्यत मणिदीपिकां करे कृत्वा ।
स्वल्पेऽपि को विचारो जठरे खलु भाति जगदिदं विष्णोः ॥

* * * *

अनुग्रहाद्ब्राह्मणपुङ्गवानामवाप्तविद्यश्चिनबोम्मभूपः ।
करोम्यहं प्राकृतरत्नदीपं मन्दानिलस्पन्दनिभैर्वचोभिः ॥

सू—सिद्धिर्लोकाच्च । प्राकृतशब्दानां मध्ये एते प्रयोज्या एते न प्रयोज्या इति व्यवस्थायास्सिद्धिर्निश्चयो न केवलं वक्ष्यमाणसूत्रेभ्य एव किं तु काव्यज्ञलोकव्यवहारादपि स्यात् । तेनात्र शास्त्रे सूत्रानुशिष्टोऽपि काव्याभियुक्तव्यवहारस्थो ह्रस्व एव साधुरिति सिद्धम् ।

Foll. 33*a*—35*b* contain a portion of some Prahasana. Foll. 36 and 37 are left blank

## R. No 4283.

Śrītāla. 20 × 2¼ inches. Foll. 25 Lines, 8 in a page Telugu. Injured.

Purchased in 1922–23 from M.R.Ry. Suryanarayana Sastrigaru, Melanathur, Amadalapadu, Muthukuru post, Nellore district

### रामायणप्रसङ्गरत्नावली.

### RĀMĀYAṆAPRASAṄGARATNĀVALI.

Similar to the work described under No. 11560 of the D.C.S. MSS, Vol. XXV. By Vīrarāghava, son of Pōlamma and Pauṇḍarikadhvarin of Vādhūlagōtra.

Complete.

Date of transcription—Saturday, the 4th day of the dark fortnight of the lunar month Vaiśakha in the year Īśvara. Name of the scribe—Buccayya of Elur who copied the original MS. for one Vēṅkaṭadri, elder brother of Raṅgayya.

**Beginning:**

रविवंशोद्भवं (रामं) राजीवायतलोचनम् ।
राजाधिराजं वरदं जानकीरमणं भजे ॥

पोलम्माख्या च जननी पौण्डरीकाध्वरी पिता ।
अभूतां पितरौ यस्य तेनैव कविनाधुना ॥
वर्ळमान्यन्वयाम्भोधिसञ्जातहिमभानुना ।
वाधूलगोत्रमुख्येन वीरराघवसूरिणा ॥
समाहृत्य पुराणानि विदुषां प्रीतये मुदा ।
रामायणे प्रसङ्गाय रत्नावळिरिति क्रमात् ॥
सविस्मयश्च ग्रन्थोऽयं वाल्मीकीये विरच्यते ।

आदौ बालकाण्डे षोडशसर्गे परमान्नविभाग उच्यते—

कौसल्यायै नरपतिः पायसार्धं ददौ तदा ।
अर्धादर्धं सुमित्रायै ददौ चापि नराधिपः ॥
कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् ।
प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् ॥

*   *   *   *

अष्टांशवन्ताविति वाल्मीकिरामायणे व्याख्यानकृद्भिः कैश्चिन्निगद्यते । तदनुपपन्नम्; अध्यात्मरामायणे—

ऋश्यशृङ्गवासिष्ठाभ्यामनुज्ञातो ददौ हविः ।
कौसल्यायै स कैकेय्याश्चार्धमर्धं . . . . ॥

**End:**

रावणेन सकलराक्षसयुद्धं सप्तरात्रमष्टमीदिने शिष्टामावास्यायां रावणवधः । दिनत्रय लङ्कासमीपे . . . . . . . . पुष्पकमधिरुह्य पञ्चम्यामेकेनाह्ना पुनः प्रवेशः । पञ्चदशवर्षे चैत्रशुक्लपक्षे शिष्टपञ्चम्यां नन्दिग्रामप्रवेशः । शिष्टाष्टम्यां पट्टाभिषेक इति ग्रन्थान्तरेण प्रतिपादनात् ।

---

R No. **4284.**

Palm leaf. 18¾ × 1⅝ inches. Foll. 86. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1922–23 from M.R.Ry Sūryanārāyana Śāstrigaru, Melanathur, Amadalapadu, Muthukuru post, Nellore district.

(a) तत्त्वचिन्तामणिव्याख्या—फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ : PHAKKIKĀ.

Same work as that described under No. 1019 of the D.C.S. MSS., Vol. VIII. By Madhurānāthatarkavācaspati.

Contains the Viśēṣyatāvacchēdakatārahasya complete.

(b) परिभाषावृत्तिः.

PARIBHĀṢĀVṚTTIḤ.

Foll 26a—62a Foll 62b—86b are left blank

Same work as that described under No 1160 of the D.C.S. MSS., Vol. III. By Sīradēva.

Incomplete.

**Beginning :**

स्फुरदभिनवरागा भास्वराभा प्रगल्भा
प्रसभशमित(दोषा) स्फीतसल्लोकचक्रा ।
विहितहितविचारा जाड्यजातोपशान्त्यै
प्रभवति परिभाषावृत्तिरासेवितैषा ॥

व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् । व्याख्यानादाचार्यपारम्पर्योपदेशात् । सन्देहेऽपि विशेषावगमो भवति ; न तु लक्षणाभावे इति ।

* * * *

**Colophon :**

इति श्रीमहोपाध्यायसीरदेवविरचितायां परिभाषावृत्तौ प्रथमः पादः ॥

**End :**

न हि क्विपः प्रयोगोऽस्ति अश्रावितत्वात् ॥

**Colophon :**

इति श्रीसीरदेवकृतायां परिभाषावृत्तौ प्रत्ययपादः ॥

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य ।

* * * *

एरनेकाचोऽसंयोगपूर्वस्येति यणादेशश्च । ज्ञापकं चात्र परिमाणाख्यायां सर्वेभ्य इत्यत्र सर्वग्रहणम् । तद्धि द्वौ कालौ त्रयः काला इत्यत्रा(पि)यण्बाधनार्थम् । अन्यथा पुरस्तादपवादन्यायेन समीपस्यैव.

R. No. **4285.**

Palm-leaf. 17 × 1½ inches. Foll. 29. Lines, 9 in a page. Telugu. Much injured.

Purchased in 1922-23 from M.R.Ry. Sūryanārāyaṇa Śāstrigāru, Melanathur, Amedalapadu, Muthukuru post, Nellore district.

शृङ्गारमञ्जरी.

ŚṚṄGĀRAMAÑJARĪ

A drama in one Act belonging to the Bhāṇa kind, which was intended to be enacted on the occasion of the spring festival of god Raṅganātha worshipped at Srirangam. The author, whose name is not given, has also written a poem called Rāmacandrōdaya.

Incomplete.

**Beginning:**

कल्याणानि दिशन्तु वः कररुहाः कस्यापि दैत्याग्रणी-
वक्षःकीकसपाटनस्रुतवसावर्णोत्तराः कामि(नाम्) ।
पत्रालीरचनाछलेन . . . . . . . . . . .
. . . . . . . . . . विदधतः खण्डान् शशाङ्कस्य च ॥

अपि च—

काश्चिद्भ्रूललितेन गानसुधया काश्चिद्दृशा स्निग्धया
काश्चित्काञ्चननर्मणा सनयनात्काश्चित्समालिङ्गनात् ।
काश्चित् . . . . . . . . . . . काश्चिच्च सर्वास्समं
गोपीर्मोहयतः पुनातु चरितं गोपस्य कस्यापि वः ॥

नान्द्यन्ते सूत्रधारः सकौतुकं परितोऽवलोक्य मा—चकास्ति खलु इयं

* * * *

निखिलनरदुरितभङ्गकरी श्रीरङ्गनगरी । इदानीं खल्वत्रस्यामखिलसुरासुरमकुट-तटसुघटितमणिगणघृणिराजिनीराजितचरणराजीवस्य . . . . . . . . . . . . निगमजेगीयमाननिजप्रभावस्य देवादिदेवस्य श्रीरङ्ग-नायकस्य चैत्रमहोत्सवः ।

* * * *

अद्य खलु—तस्य महान् रथोत्सवः ततस्तत्सेवार्थम्—

आसेतुशीताचलमाप्रतीच्यप्राच्याचलं चाखिलभक्तिलभ्यः ।
. . . . . . . . . . सभायां सर्वे पुनस्संवलिता इहैव ॥

वयं पुनस्तदाराधनार्थमास्माकीनै . . . रूपकप्रयोगकुशलैः कुशीलवैस्सह किमपि रूपकमभिनीय सकलाविलासवैभवस्य . . . . सम्पादयामहे । (नेपथ्ये) साधु भरतमूर्धन्य । संप्रति सनकादीनामपि दुर्बोधमहिम्नः सकल . . तिनामपि दुरभिधेयगुणगणस्य चतुर्मुखशतमखमुखनिखिलमखभुजामपि . . . . करूपधेयस्य नमज्जननतगेयस्य नरलोकभागधेयस्य श्रीरङ्गनायकस्य सन्निधौ भवता शृङ्गाररसनिष्यन्दसुन्दरं किमपि रूपकमभिनेतव्यम् ।

* * + *

षट्छास्त्रीपारदृश्वा सरसमृदुवचश्श्लाघ्यनानाकवीन्द्र-
स्तुत्यः स्वाशेषभाषाकृतबहुमधुरोदारचित्रप्रबन्धः ।
साहित्ये सार्वभौमस्सकलगुणनिधिस्साङ्गसङ्गीतविद्या-
निष्णातस्स्तूयते यो दिशि दिशि विबुधैश्चन्द्रिकाचारुकीर्तिः ॥

श्रीरामचन्द्रोदयमुख्यभव्यकाव्यात्मना सम्प्रति येन गुम्भिताः ।
प्रौढोक्तिमुक्तालतिकास्सुहृत्कृतेः कण्ठस्थलेषु प्रतिभान्ति सन्ततम् ॥

* * * *

सकलसुगुणधामा संस्तुतौदार्यभूमा
सततविततधैर्यस्स क्षमादेववर्यः ।
पृथुलतरनिजौजाः प्रीतये रङ्गधाम्नः
प्रचुररसधुरीणं भाणमेकं व्यभाणीत् ॥

शृङ्गारमञ्जरी नाम्ना स भाणः प्रथितो भुवि ।
सारशृङ्गारनिष्यन्दस्साक्षाद्यत्र पदे पदे ॥

End:

पौराणां कलकलः । किं ब्रवीषि? चित्राङ्गदस्य गृहाङ्गणे चरणायुधयुद्धं प्रवर्तत इति । पौरास्सर्वेऽपि समेत्य . . . . . . . . . . . . . किंचिद्दूरं गत्वा पुरोऽवलोक्य सखि लीलावति पश्य पश्य । आर्या—कलयति कौतुकमक्ष्णोरपि . . . . . . . . . . ।

(साश्चर्यं) कथमेतौ प्रवृद्धरोषौ चिरश्रान्तावपि . . . .
निस्त्रासात् क्षुण्णनासौ प्रसभमतकुदुन्निद्रभीमाट्टहासौ

R. No. **4286.**

Palm leaf 17⅞ × 1⅜ inches. Foll. 31 Lines, 7 in a page. Telugu. Very much injured.

Purchased in 1922-23 from M.R.Ry. Sūryanārāyaṇa Śāstrigāru, Melanathur, Amadalapadu, Muthukuru post, Nellore district.

(*a*) शिवमोहिनीविलासः.

ŚIVAMŌHINĪVILĀSAḤ

Foll 1*a*—17*b*.

A poem in 12 Sargas describing the love of god Śiva towards Mōhinī at the time of the churning of the milky ocean; by Bhāskara, pupil of Śivarāmamunīndra.

Contains the Sargas 1—12 complete.

**Beginning:**

सान्द्रं चन्द्रकरैर्न(वै)रसुरभितं कुन्दैर्लतामन्दिरं

. . . . . . . . . . . . श्रियः ॥

श्रीभारतीरसविलासमनोविहारी
गौरीपदाम्बुजमरन्दरणन्मिलिन्दः ।
श्री(शङ्क)रस्मरकला(रचना)प्रबन्धं
बध्नाति भास्करविपश्चिदसौ कवीन्द्रः ॥

सरस्वतीमुखाम्भोजमकरन्दसरस्वती ।
रसज्ञायास्सुता यस्माद्रसज्ञायास्त्वियं ततः ॥

भाषायोषावदेषा रुचिकृदपरुषा कण्ठभूषाविशेषा
शेषाशेषास्यघोषान्वितगुणनिकषा वर्जिताशेषदोषा ।
ईषातोषार्थमेषा कृतिरुरुविदुषामार्यविद्वज्जिगीषा-
द्वेषान्वेषातिरोषा . . . . . . . जुषा भाषिताहीशभूषा ॥

गिरिशकीर्तनगानमनोऽस्ति चेच्चतुरकेलिकलासु च कौतुकम्
ललितसुन्दरमार्दवशब्दितां स्मरत सम्प्रति भास्करभारतीम् ॥

मारविरागो गीयते—

. . . सकलजगन्निकरेरिततनो

प्रथित तव सङ्गमनोऽङ्गविलासं-

शङ्कराहत श्रीशिवरूप जय गिरिशाधिपते ॥

*    *    *    *

श्रीशिवराममुने . . . . नकगीतमहेशविहारं

दारुवने रचितं विदधातु सुखं सततं भज सारम् ॥

**Colophon :**

इति (श्रीशिवराममुनीन्द्रपादशिष्यभास्करसूरि)विरचिते शिवमोहिनी-विलासे प्रथमोऽयं सर्गः ॥

**End:**

विलिख तिलकं फाले कालेयकेन . . . .

विरलतरलस्फारङ्कारं विभूषय साम्प्रतम् ।

वितर मम दृशोरन्ते कान्ते समञ्जनमञ्जनं

. . तदुदितः प्रेयान् भूयोऽप्यचीकरदीप्सितम् ॥

**Colophon :**

इति श्रीशिवराममुनीन्द्रपादशिष्यभास्करसूरिविरचिते वर्णितशिवमोहिनी-विलासे द्वादशोऽयं सर्गः ॥

(*b*) गीतगङ्गाधरः.

GĪTAGAṄGĀDHARAḤ.

Foll. 18*a*—31*b*.

A poem written in praise of god Śiva, after the model of Gītagōvinda, by Nañjaraja, son of Vīrarāja of Kaḷile. For other particulars see the extracts given below.

Complete.

**Beginning :**

श्रीशैलजाचरणसारससक्तचित्तः श्रीकण्ठपादसरसीरुहचञ्चरीकः ।

श्रीवीरराजनृपशेखरसत्कुमारः श्रीनञ्जराजसुकविः कुरुते प्रबन्धम् ॥

अस्ति प्रशस्तमहसामवनीपतीनामाजन्मभास्वदकलङ्कगुणोत्तराणाम् ।

वंशस्सुधाजलधिवद्विमलस्स यस्मिन् जज्ञे महीशमकुटीमहितः सुधांशुः ॥

तस्मिन्नन्वयजलधौ समजनि सकलैर्बुधैः स्तुत्यः ।
धीरस्तिम्मनृपालः कलन्दिकाम्भोधिकौस्तुभः श्रीमान् ॥
सुतवान् बभूव स नृपः कृतवीर्यसुतोपमेयशौर्येण ।
काम्पयनृपेण विमताः कदलीभङ्गं बभञ्जिरे येन ॥
तस्मात्काम्पमहीपतेरुदभवत्कन्दर्पभव्याकृतिः
धीरो दोड्डमहीपतिस्त्रिजगतीविख्यातशौर्योन्नतिः ।
यद्दानाम्बुयशस्सितच्छदकुलैर्लोकत्रये संवृते
नोत्थातुं शयितुं च शौरिरभवत्प्राप्याच्छरत्नं शयात् ॥

*          *          *          *

दलितविमतजालो दोड्डयक्षोणिपालो
विदितसुकृति (पु)ञ्जं वीरराजाधिराजम् ।
अजनयदमरेन्द्रानन्दनीयैश्चरित्रै-
(र)जनकमठशिष्यः स्वर्वधूगीतकीर्त्तिः ॥

*          *          *          *

तस्य द्वौ तनुजातावभिजातावखिलभुवनविख्यातौ ।
दीव्यति देवनृपालः प्रथमः प्रत्यर्थिदलनकरवालः ॥

*          *          *          *

धीरस्तस्यानुजन्मा पुरहरचरणाम्भोजसेवाप्रकर्ष
प्रादुर्भूताखिलश्रीरखिलनरपतिश्लाघनीयप्रतापः ।
सर्वज्ञस्सत्यसन्धः परयुवतिकथालेशदूरः कृपावान्
विद्वद्रक्षाधुरीणो जगति विजयते नञ्जराजक्षितीन्द्रः ।

*          *          *          *

इत्थं विश्रुत . . . . . . . श्रीवीरराजात्मजः
सोदर्यः . . . . . . . . . . . कवीनां मुदे ।
काव्यं कोमलमेकमुत्तमगुणैराकलिपतं कल्पये-
त्येतं सम्प्रति बोधितो बुधगणैः भूपेन्द्र बन्धं नवम् ॥
(निर्दो)षामलवृत्तो . .  . . . . . . . . . . तः ।
कलयति नञ्जनृपालः कविहृदयानन्द(दं वरं)काव्यम् ॥
क्रीडाकौतुकतत्परे परशिवे साकं मुनिप्रेयसी-
[illegible] [illegible]मपेत्य विवशा मोहाकुलाभूदुमा ।

पश्चात्सङ्गतयोस्सखीवचनतः सप्रेम सञ्जल्पतोः
गौरीशङ्करयोर्जयन्ति कपिलातीरे मिथःकेलयः ॥

चारुस्मेरकिशोरचन्द्रशकलप्रोल्लासिफालस्थली-
लीलावल्गदुदारनीलचिकुरैर्मुग्धाननाम्भोरुहः ।
श्यामोद्दामतमालकण्ठरुचिभिः संशोचयन्नम्बुदान्
कान्तालिङ्गनकौतुकी परशिवः पायादुमायाः पतिः ॥

**Colophon:**

इति श्रीककुवे(कलिले)कुलतिलकवीरराजगर्भपयःपारावारराकासुधाकर-नञ्जराजशेखरविरचिते गीतगङ्गाधरे प्रथमस्सर्गः ॥

**Colophon:**

चतुर्थस्सर्गः ॥

**End:**

नीत्वा कथंचिदपि तां रजनीं दिनादौ कोपातिरेकरभसेन भृशं श्वसन्ती ।
सव्रीडकैतववचांसि वदन्तमग्रे सा तं विलोक्य गिरिजा हरमित्युवाच ॥

* * * *

वीरनृपालकनन्दननञ्जमहीपतिविरचितगीतम् ।
धीरजनाय तनोतु शुभानि सदाशिववर्णनपूतम् ॥

## R. No. 4287.

Palm-leaf. $16\frac{5}{8} \times 1\frac{1}{8}$ inches. Foll. 74. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1922-23 from M.R.Ry. Sūryanārāyaṇa Śāstrigāru, Melanattur, Amadalapadu, Muthukuru post, Nellore district.

### (*a*) चम्पुरामायणम्.

### CAMPURĀMĀYAṆAM.

Foll. 1*a*—13*b*. Foll. 14 and 15 are left blank.

Same work as that described under No. 12256 of the D.C.S. MSS., Vol. XXI. By Bhōjarāja.

Breaks off in the course of the Ayōdhyākāṇḍa.

(b) राघवपाण्डवीयम्, सव्याख्यानम्.

RĀGHAVAPĀṆḌAVĪYAM WITH COMMENTARY.

Foll. 16a—73b. Fol. 74 is left blank.

This poem, as its name indicates, describes the story of the Rāmāyaṇa and Mahābhārata, each stanza being so composed as to admit of being interpreted in two different ways. The text is by Kṛṣṇapaṇḍita, son of Lakṣmīdēvī and Anantapaṇḍita and pupil of Ānandatīrtha. It is followed by a commentary called Kalpavallī, by Rāmasūri of Ḍēgaramūḍi.

Contains the Sargas 7 and 8 only.

**Beginning :**

उन्मनोरथहरिद्विरदोग्रैः स्वैर्बलैः (परबलैः) स समग्रैः ।
युद्धमाकलयते स्म विशङ्कं पार्थिवो धृतिविमुक्तकलङ्कम् ॥

अथ सर्गद्वयेन नानावृत्तैर्युद्धं वर्णयति—उन्मन इति । सः पार्थिवः धर्मजः उन्मनसः उत्काः रथाश्शताङ्गानि हरयोऽश्वा द्विरदा गजाश्च तैरुग्रैस्समग्रैः स्वैः स्वकीयैः बलैस्सैन्यैः कर्तृभिः तथोक्तैरेव परबलैस्सह वीत(वि)शङ्कं वीतभयं धृत्या धैर्येण विमुक्तः कलङ्कः द्रौपदीपरिभवाद्यपवादो यस्मिन् कर्मणि तत्तथोक्तं युद्धमाकलयते स्म कारयामास । पार्थिवो रामः उन्मनोरथा उत्कृष्टाभिलाषाः हरिद्विरदा द्विरदसदृशाः कपयः तैरुग्रैस्समग्रैश्च स्वैर्बलैः उन्मनोभिः रथहरिद्विरदैरुग्रैस्समग्रैश्च परबलैस्सहाधृत्या अधैर्येण हेतुना विमुक्तं त्यक्तं कं सुखं यस्यां सा लङ्का यस्मिन् कर्मणि तद्यथा तथा युद्धमाकलयते स्म ।

* * * *

**Colophon :**

इति श्रीडेगरमूडिरामसूरिविरचितायां राघवपाण्डवीयव्याख्यायां कल्पवल्लीसमाख्यायां सप्तमस्सर्गः ॥

**End :**

श्रीधान्यै राष्ट्रमाश्वत्सकलभुवि तदावर्षदब्दो यथेष्टं
गोसस्याद्यैर्जजृम्भे क्षितिररिविततिर्नामशेषा बभूव ।
नास्तां रोगापमृत्यू श्रुतिमलभत नो जारचोरप्रवृत्तिः
वृत्तिर्वर्णाश्रमाणां व्यजयत चरणैरास्त धर्मश्चतुर्भिः ॥

श्रीधान्यैरिति । तदा राज्यपरिपालनकाले राष्ट्रं देशः श्रीभिस्सम्पद्भिः धान्यैश्च आश्वत् शुशुभे । सकलभुवि अब्दो मेघः यथेष्टमवर्षत् । क्षितिर्जगती गोसस्याद्यैः जजृम्भे विजृम्भते स्म । अरिविततिश्शत्रुसमूहः नामैव

शषो यस्यास्सा बभूव । रोगश्चापमृत्युश्च तौ नास्तां नाभूताम् । जार-चोराणां प्रवृत्तिर्वार्ता श्रुतिं श्रवणं नो अलभत । वर्णा ब्राह्मणादयः आश्रमा ब्रह्मचर्यादयस्तेषां वृत्तिर्वर्तनं व्यंजयत सर्वोत्कर्षेण वर्तते । स्वस्वधर्माननु-लङ्घ्य बभावित्यर्थः । धर्मश्चतुर्भिश्चरणैरास्त अवर्तत । उभयत्र समोऽर्थः ॥

**Colophon:**

इति श्रीहयग्रीवानुग्रहसुग्रहसमग्रकविताविभवस्य इटिकिलकुलपण्डितयो-र्लक्ष्मीदेव्यनन्तपण्डितयोस्तनूभवस्य श्रीमदानन्दतीर्थगुरुकरुणालब्धवैष्णवकला-वितानस्य कृष्णपण्डिताभिधानस्य कृतौ सकलसुकविसम्भाव्ये राघवपाण्ड-वीये महाकाव्ये अष्टमस्सर्गः ॥

इति डेगरमूडि रामसूरिविरचितायां राघवपाण्डवीयव्याख्यायां कल्पवल्ली-समाख्यायामष्टमस्सर्गः ॥

राघवपाण्डवीयाख्यं काव्यं समाप्तम् ॥

Foll. 75*a*—76*b* give the Samāsacakra.

## R. No. 4288.

Palm leaf. 15¾ × 1 inches. Foll. 36. Lines, 7 in a page. Telugu. Very much injured.

Purchased in 1922-23 from M.R.Ry Śūryanarayana Śastrigaru, Melanathur, Amadalapadu, Muthukuru post, Nellore district

### सनत्कुमारसंहिता.
### SANATKUMĀRASAMHITĀ.

Foll. 1*a*—30*b*. Foll. 31*a*—36*b* give the portion of the first Paṭala in this work.

This forms a part of the Skāndapurāṇa and deals with the Mantraśāstra.

Wants the beginning of the first Patala and breaks off in the fifth Paṭala.

**Beginning:**

. . . . . . . . . . . . . . . मुच्यते
विनियोगश्चतुर्वर्णः नित्यदा संस्मरेन्मुने ॥
न्यासं च सम्प्रवक्ष्यामि षडङ्गं भुवि विश्रुतम् ।
ततस्सर्वाक्षरन्यासं प्रवक्ष्यामि समासतः ॥

वर्णैरेकेन हृदयं त्रिभिश्चैव शिरो मतम् ।
चतुर्भिश्च शिखा प्रोक्ता तथैव कवचं मतम् ॥
नेत्रे तथा चतुर्वर्णैः द्वाभ्यामस्त्रं तथा न्यसेत् ।
एवं मन्त्रेण विन्यस्य मन्त्रवर्णांस्तथा न्यसेत् ॥

*     *     *     *

बहुना किमिहोक्तेन धर्मकामार्थमुक्तिदम् ।
मन्त्रमेतत्समाख्यातं किं भूयः श्रोतुमिच्छसि ॥

**Colophon:**

इति सनत्कुमारतन्त्रे प्रथमः पटलः ॥

**End:**

पूजार्थं तीर्थमादाय विसृज्यार्के सुरापगाम् ।
संहारमुद्रया स्तोत्रं पठन् पूजागृहं व्रजेत् ॥

**Colophon:**

इति सनत्कुमारसंहितायां गोपालमन्त्रकल्पे चतुर्थोऽध्यायः ॥

अथ प्रक्षाल्य चरणौ करौ चाचम्य मन्त्रतः ।
पवित्रमुद्राढ्यकर ऊर्ध्वपुण्ड्राङ्कमस्तकः ॥

*     *     *     *

पूजयामि तर्पयामि ॥

ओं नमो विश्वरूपाय सृष्टिस्थित्यन्तहेतवे ।

विश्वरूपाय.

---

R. No. **4289**.

Palm-leaf. 13 × 1½ inches. Foll 180. Lines, 7 in a page. Telugu and Grantha. Very much injured.

Purchased in 1922–23 from M.R.Ry. Sūryanārāyaṇa Śāstrigāru, Melanathur, Amadalapadu, Muthukuru post, Nellore district.

(*a*) वामकेश्वरतन्त्रम्.

VĀMAKĒŚVARATANTRAM.

Foll. 29*a*—59*b*.

Same work as that described under R. No. 2109(*h*) ante.

Contains the Paṭalas 1—5.

Foll. 1*a*—28*b* contain a portion of this work without beginning and end.

**Beginning:**

श्रीदेव्युवाच—

भगवन् सर्वतन्त्रा(श्च) भवता मे प्रकाशिताः ।
चतुष्षष्टिश्च तन्त्राणि मातृणामुत्तमानि तु ॥
महामायाशाम्बरं च योगिनीजालशाम्बरम् ।
तत्त्वसन्तानकं चैव भैरवाष्टकमेव च ॥
बहुरूपाष्टकं चापि यामलाष्टकमेव च ।
चन्द्रज्ञानं वासुकिं च महासम्मोहनं तथा ॥

* * * *

इति सर्वतन्त्रोत्तमे वामकेश्वरतन्त्रे नित्याषोडशिकार्णवे प्रथमः पटलः ॥

**End:**

कलानामानि भूतानि नव चक्राण्यनुक्रमात् ।
. . . . . पुष्येण पूजयेत् सर्वसाधकान् ॥

इति पञ्चमः पटलः ॥

---

(*b*) सौन्दर्यलहरीव्याख्या.

SAUNDARYALAHARĪVYĀKHYĀ.

Foll. 60*a*—180*b*.

Same commentary as that described under No. 10866 of the D.C.S. MSS, Vol. XIX.

Incomplete and in disorder.

---

## R. No. 4290.

Palm-leaf. 13 × 1½ inches. Foll. 78. Lines, 6 in a page. Telugu. Very much injured.

Purchased in 1922-23 from M.R.Ry. Sūryanārāyana Śāstrigāru, Melanathur, Amadalapadu, Muthukuru post, Nellore district.

त्रिपदोद्द्योतिनी.

TRIPADŌDDYŌTINĪ.

A treatise on Sanskrit grammar dealing with the changes of verbal roots when preceded by certain Upasargas or prepositions. The author Arra Mādhavabhaṭṭa of Śrīvatsagōtra was the son of Brahmābhaṭṭa of Ālūr and was a pupil of Vibudhēndrayatīndra.

Apparently complete.

**Beginning:**

मन्दारदामनवकङ्कणदोश्चतुष्कं स्तम्भान्तरस्फुरदुरोमणिवेदिकायाम् ।
नित्यानुवृत्तनदराजसुताविवाहमाराध्नुमो हरिमहोबलनारसिंहम् ॥
श्रीवत्ससगोत्रेण ब्रह्मभट्टात्मजेन शब्दविदा ।
त्रिपदद्योतव्याख्या क्रियते कृतिररूरमाधवार्येण ॥
वीरप्रतापवेङ्कटदेवमहारायपण्डितेष्वेकः ।
अहमररूमाधवार्यो लिखाम्यमुं बालबोधाय ॥
अत्र तु कर्तरि धातोः क्वचिदुपसर्गात् क्वचिच्च गणपाठात् ।
अनुबन्धादर्थात्तङ् . . . . भयं च तिङ्विषयः ॥

* * * *

**Colophon:**

इति श्रीम(दहोबलश्रीनृसिंहसमा)सादितसर्वतन्त्रेण श्रीविबुधेन्द्रयतीन्द्रचन्द्रश्रीचरणकरुणापात्रेण श्रीवत्ससगोत्रेण चिनब्रह्मभट्टोपाध्यायपुत्रेण सिद्धान्तसूक्तिरत्न(हट्टेन) अररूमाधवभट्टेन विरचितायां त्रिपदाद्योतनीसंज्ञितायां कृतौ यवर्गवर्गस्सम्पूर्णः ॥

**End:**

आख्यातमणिविचित्रां भूषां कण्ठस्य . ययोस्साध्याम् ।
. . . . . . . . . . . . . . . . अररूमाधवार्यस्य ॥

**Colophon:**

इति श्रीमदहोबलश्रीनृसिंहसमासादितसर्वतन्त्रेण (श्रीविबुधेन्द्रयतीन्द्रचन्द्रश्रीचरणकरुणापात्रेण) श्रीवत्ससगोत्रेण चिनब्रह्मभट्टोपाध्यायपुत्रेण सिद्धान्तसूक्तिरत्नहट्टेन अररूमाधवभट्टेन विरचिता त्रिपदोद्योतनी-

R. No. **4291.**

Palm-leaf. 12 × 1⅝ inches. Foll. 143. Lines, 9 in a page. Grantha and Tamil.

Presented in 1922-23 by M.R.Ry. N. C. Narasimhācariyar, B.A., B.L., Karur.

**रहस्यत्रयसारटिप्पणी.**

RAHASYATRAYASĀRAṬIPPAṆĪ.

Foll. 1*a*—139*b*.

A short commentary on Vēdantadēsika's Rahasyatrayasāra which is a treatise in 32 chapters dealing with Rahasyatraya, i.e., Aṣṭākṣara, Dvaya and Caramaślōka.

Complete.

**Beginning:**

श्रीमान् वेङ्कटनार्यः ( . . . ) सन्निधत्तां सदा हृदि ॥

गुरुभ्य इत्यादि । अत्र गुरुशब्दः स्वाचार्यपरः पूजायां बहुवचनान्तः । तद्गुरुशब्दस्तदाचार्यादिभगवत्पर्यन्तसर्वगुरुपरः । एवं निर्देशो गुरून् प्रपद्य प्रथमं तद्गुरूंश्च ततो हरिमिति श्रीपाञ्चरात्ररक्षोदाहृतवचनक्रमानुसारेणेति भावः । नम इत्येतावत्येव पर्याप्ते वाक्शब्दप्रयोगः प्रह्वीभावात्मनिवेदनादि-कृत्स्नार्थविवक्षाभिप्रायेण, अन्यथा सकृत्प्रयुक्त इति न्यायादेकार्थ एव प्रतीयेतेति भावः ।

**End:**

पराशरपराङ्कुशादीनां सम्मतः सम्मतिविषय इत्यर्थः । यद्वा आशंसायां भूतवच्चेति आशंसार्थनिष्ठान्तस्सम्मतशब्दः सम्यङ्मन्तुं चिन्तयितुमभीष्टः अतिगम्भीरतया तेषामपि श्रुतिस्मृतीतिहासान्विहायात्रैव परिचयः कार्यः इत्याशंसाविषय इत्यर्थः । समगृह्यत अनपेक्षितविस्तारमपेक्षितसङ्कोचं च विना सङ्गृहीत इति भावः ॥

रहस्यत्रयसाराब्धौ सारार्थाः कतिचिन्मया ।
सञ्चार्य सारास्वादिन्या नावा लब्ध्वा प्रकाशिताः ॥

The scribe adds—

ग्रन्थोऽयं चक्रवर्तिवेङ्कटवीरराघवाचार्यस्य टिप्पणं तारणवर्षे समाप्तम् ॥

Foll. 140—143 contain the Mūlamantravākyārthayōjana of Rāmabhadra.

---

## R. No. 4292.

Palm-leaf. 15 × 1⅝ inches. Foll. 80. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1922–23 by M.R.Ry. V. Vōṅkaṭācalamayyagāru, High Court Vakil, Nellore

(*a*) अलङ्कारनिरुक्तिका.
ALAṄKĀRANIRUKTIKĀ.

Foll. 1*a*—7*b*.

A commentary on Jayadēva's Candrālōka, which work has been described under No. 12871 of the D.C.S. MSS., Vol. XXII.

Incomplete.

**Beginning:**

वन्दे वन्दारुमन्दारमिन्दुचूडामणिं शिवम् ।
यत्प्रसादादहं कुर्यामलङ्कारनिरुक्तिकाम् ॥

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।
हंसीव कृष्ण ते कीर्तिस्स्वर्गङ्गामवगाहते ॥

अत्र यत्पदं यादृशवाक्यार्थपरं तदुत्तरत्रल्प्रत्ययार्थो घटकत्वम् द्विपदस्य वर्ण्यावर्ण्यात्मकप्रकृताप्रकृतोभयमर्थः । सप्तम्या वृत्तित्वम् । उत्पूर्वकलसधातोः ज्ञानमाख्यातस्याश्रयत्वं चार्थः । सादृश्यलक्ष्मीः सादृश्यसमृद्धिः सम्पूर्णसादृश्यम् । तथा च यादृशवाक्यार्थघटकप्रकृताप्रकृतोभयवृत्तित्वप्रकारकज्ञाननिरूपितविशेष्य(ता)सम्बन्धावच्छिन्नाश्रयत्ववत्सम्पूर्णसादृश्यम्, तादृशवाक्यार्थ उपमालङ्कारः ।

**End:**

अत्रापि विरुद्धत्वरूपैकधर्मेण ज्ञानज्ञानाभावयोरेकत्वाद्विरुद्धत्वावच्छिन्नस्य एकसामान्यस्य वाक्यद्वयेऽपि जानाति न विजानातीति पदाभ्यां पृथङ्निवेशात् कथञ्चिल्लक्षणानुगमः दृष्टान्तः । तदलङ्कृतिः सा चासावलङ्कृतिरिति तदर्थः ।

Date of transcription—Saturday, the 14th day of the dark fortnight of the lunar month Bhādrapada in the year Śukla. Name of the scribe—Rāma Śāstrin.

(*b*) चाटुश्लोकाः.
CĀṬUŚLŌKĀḤ.

Foll. 8*a*—15*a*. Fol. 15*b* is left blank.

Same work as that described under No. 12016 of the D.C.S. MSS., Vol. XX; with slight difference.

Incomplete.

(c) कुवलयानन्दश्लोकावली.

KUVALAYĀNANDAŚLŌKĀVALĪ.

Foll. 16a—34b.

A collection of stanzas illustrated by Appayadīkṣita in his Kuvalayānanda.

(d) रसमञ्जरी.

RASAMAÑJARĪ.

Foll. 35a—56b. Fol. 57a contains the genealogy of Paṭṭābhirāma. Fol. 57b is left blank.

Text is the same as that described under R. No. 680 ante. By Bhānu.

Complete.

(e) रसमञ्जरीव्याख्या.

RASAMAÑJARĪVYĀKHYĀ

Foll. 58a—79b.

A short commentary on Bhānukavi's Rasamañjarī which is a treatise on poetics, illustrating the emotional elements connected with love (शृङ्गार).

Complete.

**Beginning:**

नित्यं दयार्द्रहृदयेन्धनसंप्रयोगदाक्षायणीविरहदारुणपावकस्य ।
उद्भूतधूमकलिकामुपकण्ठमूलं क्ष्वेलच्छलेन वहते महते नमोऽस्तु ॥

प्रारिप्सितग्रन्थस्य निर्विघ्नपरिसमाप्तये अर्धनारीश्वरचरणं प्रार्थयते—आत्मीयमिति । नन्वत्रामोदपरिमलनामकौ(के)व्याख्यानौ(ने)तिष्ठतः । तदपेक्षयास्मिन्विशेषः किमिति चेन्न; तौ बहुलतया बालस्य तयोः प्रवेशाभावेन लक्षणविवेचनं परित्यज्य सुलभतया श्लोकार्थ एव निरूप्यते ।

* * * *

विद्वत्कुलेति । विद्वत्कुलस्य यन्मनः तदेव भृङ्गः तस्य रससम्पत्तिकारणाय श्रीमद्भानुनामकेन कविना एषा रसमञ्जरी प्रकाश्यत इत्यर्थः ॥

**End:**

विदर्भभूः विदर्भभूमिः यस्य श्रीभानोर्देशो भवति । वाग्देवीश्रुतिपारिजातकुसुमस्पर्धाकरी वाग्देव्याः श्रीसरस्वत्याः ये श्रुती तयोर्निष्ठं यत्पारिजात-

कुसुमं तेन स्पर्धा(करी)साम्यङ्करी श्रीभानुनामकेन कविना तथ्येन याथार्थ्येन स्वकृतेन स्वकृत्या योजिता मञ्जरी रसमञ्जरी विजयत इत्यर्थः ॥

**Colophon:**

रसमञ्जरीसङ्क्षेपव्याख्यानं सम्पूर्णम् ॥

Fol. 80*a* contains some stray stanzas. Fol. 80*b* is left blank.

---

R. No. **4293.**

Palm-leaf. $18\frac{7}{8} \times 1\frac{1}{2}$ inches. Foll. 161. Lines, 8 in a page. Telugu. Injured.

Presented in 1922-23 by M.R.Ry. Vēnkaṭâcalamayyagâru, High Court Vakil, Nellore.

(*a*) बाधरहस्यम्.

BÂDHARAHASYAM.

Foll 10*a*—30*a*.

Same work as that described under No. 4274 of the D.C.S. MSS., Vol. VIII.

Complete.

Foll. 1*a*--8*a* contain the 6th Sarga of Śiśupālavadhavyākhyā. Fol. 8*b* is left blank. Foll 9*a*—10*a* contain the Nirdhâraṇaṣaṣṭhyarthaśābdabōdhavicāra.

---

(*b*) त्रिंशच्छ्लोकी, सव्याख्या.

TRIMŚACCHLŌKĪ WITH COMMENTARY.

Foll. 30*b*—59*b*.

Thirty stanzas in praise of Dakṣiṇāmūrti, a manifestation of god Śiva; the work is followed by a commentary by Paṭṭābhirāma.

Complete.

**Beginning:**

आम्नायमौलिषु विचक्षणमानसेषु न्यग्रोधसीम्नि पुरतश्च दृशोर्ममैकम् ।
यद्वस्तु वास्तवमनस्तमितप्रबोधमाशास्महे तदिदमद्भुतशक्ति किंचित् ॥

सिद्धान्ताः परमभ्यधायिषत ये श्लोकैरिह त्रिंशता
तानेतान् विशदीकरोमि न ततो दोषो गुणो वापि मे ।
सिद्धान्तो यदि वा तदन्यविषयस्सम्पद्यतां तावता
श्लाघामूलकृतोऽथ वा परिभवो राज्ञो यथा सैन्यतः ॥

वक्ष्यमाणार्थानां प्रामाणिकत्वमुपपादयन् प्रयोजनप्रदर्शनपूर्वकं निरूपणं प्रतिजानीते—

स्वानुभूत्येकशरणा विषयाः पूर्वपक्षिणाम् ।
उच्यन्ते तत्र तत्रार्थाः श्लोकैर्द्वात्रिंशता मया ॥

नन्वेतन्निरूपणस्य किं प्रयोजनमत आह—विषया इति । पूर्वपक्षिणां विदुषां सभासु पूर्वपक्षं पातयतां विषयाः पर्यनुयोज्यतया रहस्यत्वेन गोपनीया इत्यर्थः ।

**End:**

यद्यपि बहु वक्तव्यं, तथापि ग्रन्थान्तरे बहुशः प्रपञ्चितत्वात् ग्रन्थविस्तरभयाच्च विरम्यते ॥

**Colophon:**

त्रिंशच्छ्लोकीटीका सेयं पट्टाभिरामेण ।
क्षिप्ता वक्षसि साक्षात् (सु)कुसुममालेव दक्षिणामूर्तेः ॥
पट्टाभिरामजीत(सु)ग्रथिता सेयं प्रसूनमालेव ।
त्रिंशच्छ्लोकीटीकाद्रियतां श्रीत्रिपुरसुन्दरीदेव्या ॥

---

(c) तर्कभाषाव्याख्या—भावार्थदीपिका.

TARKABHĀṢĀVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Foll. 60*a*—101*b*.

Same work as that described under No. 4134 of the D.C.S. MSS., Vol. VIII By Gaurīkānta.

Complete.

---

(d) तत्त्वचिन्तामण्यालोकव्याख्या.

TATTVACINTĀMAṆYĀLOKAVYĀKHYĀ

Foll. 103*a*—160*b*. Fol. 102*a* gives the name of this work. Fol 161 (*a*) contains the colophon of the Advaitadīpikāvivaraṇa. Foll. 102*b* and 161*b* are left blank.

Same work as that described under R No. 1655 ante.

Wants the beginning and the end in the Prāmāṇyavāda.

Complete.

R. No. **4294**.

Palm-leaf. 17¾ × 1¼ inches. Foll. 87. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1922-23 by M.R.Ry. Vēṅkaṭācalamayyagāru, High Court Vakil, Nellore.

मनुस्मृतिः.

MANUSMṚTIḤ.

Same work as that described under No. 2663 of the D.C.S. MSS., Vol. V.

Contains the Adhyāyas 1—9 only.

R. No. **4295.**

Śrītāla. 20⅝ × 2 inches. Foll. 213. Lines, 15 in a page. Telugu. Slightly injured.

Presented in 1922-23 by M.R.Ry. Vēṅkaṭācalamayyagāru, High Court Vakil, Nellore.

रामायणम्.

RĀMĀYAṆAM.

Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I

Contains the Kāṇḍas 1—6 complete

The scribe adds—

कीलके वत्सरे चैत्रे शुक्लपक्षेन्दुवासरे ।
दशम्यामादिकाव्यं च रामायणमभीष्टदम् ॥
नृसिंहपण्डितेन्द्रस्य श्रीताले पुस्तके मया ।
परमेशाभिधानस्य पण्डितेन्द्रस्य धीमतः ॥
परमेशाख्यविदुषा पुस्तकं लिखितं मया ।

R. No. **4296.**

Palm-leaf. 17 × 1½ inches. Foll. 189. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1922-23 by M.R.Ry. Vēṅkaṭācalamayyagāru, High Court Vakil, Nellore.

मन्त्रमहोदधिः, सव्याख्यः.

MANTRAMAHŌDADHIḤ WITH COMMENTARY.

Text is the same as that described under No 8007 of the D.C.S. MSS., Vol. XV. It is followed by a commentary called Naukā. By Mahīdhara.

Complete in 25 Taraṅgas.

**Beginning:**

प्रणम्य लक्ष्मीनृहरिं महागणपतिं गुरुम् ।
तन्त्राण्यनेकान्यालोच्य वक्ष्ये मन्त्रमहोदधिम् ॥

अस्यार्थः—तत्र तावन्मन्त्रमहोदधिनामकं तत्र(न्त्रं) चिकीर्षुराचार्यः शिष्टाचारप . . . . . . . . . ग्रन्थकरणं प्रतिजानीते—प्रणम्येति । लक्ष्म्या युक्तो नृहरिः लक्ष्मीनृहरिः मध्यमपदलोपी समासः । गुरुं नृसिंहाश्रमम् । मन्त्रा एव महान्त्युदकानि धीयन्तेऽस्मिन्निति मन्त्रमहोदधिर्ग्रन्थः। तत्र प्रातरारभ्यं मन्त्रिणः कृत्यमाह—प्रातरिति ।

प्रातरुत्थाय शिरसि ध्यात्वा गुरुपदाम्बुजम् ।
आवश्यकं विनिर्वर्त्य स्नातुं यायात्सरित्तटे ॥

* * * *

**Colophon:**

इति श्रीमहीधरविरचिते मन्त्रमहोदधौ भूतशुद्धिकथनं नाम प्रथमस्तरङ्गः ॥

**End:**

ग्रन्थान्ते आशिषमाह—अविच्छिन्नेति । श्लोकत्रयेणेष्टदेवं प्रार्थयते—नरसिंह इति । नरसिंहो मे मुदे हर्षायास्तु । देवानां वा(रे)ण समूहेन नतः । नृसिंह इति । नृसिंहो मां सदाव्यात् । कीदृशः उत्सङ्गे समुद्रजा लक्ष्मीर्यस्य सः । समुद्रे जातं यत् श्वेतद्वीपं तत्र यद्गृहं तत्रोपविष्टः । समुत् सहर्षः । रजोहीनमतिः विरजाः । समुद्रा अञ्जल्यादिमुद्राविदः ये भक्तास्तेषां सर्वसिद्धिदाता । राजलक्ष्मीं नृसिंह इति । विभक्तिसप्तकेन हरिं स्तौति । नृहरिणा महान्तो दैत्याधीशा अहिं(ह)सत आहताः । हन्तेर्लुङि कर्मणि चिण्वदिडभावे रूपम् । श्रीनृसिंहाय श्रीनृसिंहं प्रसादयितुं नौमि स्तौमि । क्रियार्थोपपदस्य कर्मणि स्थानिन इति चतुर्थी । हे श्री-

नृसिंह भक्तमव रक्ष । ग्रन्थनिष्पत्तिस्थान् काशीस्थान् देवान् स्मरति—विश्वेश इति । ग्रन्थनिष्पत्तिकालमाह—विक्रमार्कादिति । बाणवेदनृपैर्मिते वर्षे पञ्चचत्वारिंशदुत्तरषोडशतमे विक्रमनृपे हृते सति शिवस्य रामेश्वरस्याग्रे मन्त्रमहोदधिस्समाप्तिमगमत् ॥

Colophon :

इति श्रीमहीधरविरचितायां मन्त्रमहोदधिनौकायां षट्कर्मादिनिरूपणं नाम पञ्चविंशस्तरङ्गः ॥

Foll. 188*b* and 189 are left blank.

## R. No. 4297.

Palm-leaf. 18 × 1½ inches. Foll. 118. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1922–23 by M.R.Ry. V. Vēṅkaṭācalamayyagāru, High Court Vakil, Nellore.

Fol. 1 gives the contents of this work.

### (*a*) जातकाभरणम्.

### JĀTAKĀBHARAṆAM.

Foll. 2*a*—99*b*. Foll. 18*a*, 96*b* and 100 are left blank.

Same work as that described under R. No. 1933 ante. By Dhuṇḍirāja, son of Daivajña.

Complete.

---

### (*b*) दशाफलम्.

### DAŚĀPHALAM.

Foll. 101*a*—107*a*. Fol. 107*b* is left blank.

Same work as that described under No. 13768 of the D.C.S. MSS., Vol. XXIV.

Wants the beginning ; otherwise complete.

### (*c*) ज्यौतिषविषयः.

### JYAUTIṢAVIṢAYAḤ.

Foll. 108*a*—118*a*. Fol. 118*b* is left blank.

Similar to the work described under No. 13491 of the D.C.S. MSS., Vol. XXIV.

Incomplete.

**Beninning:**

पूर्वाभाद्रगते भानौ जीमूतै: परिवेष्टितैः ।
आर्द्रायां च प्रवर्षन्ति एकैकस्य त्रयोदश ॥
धनुर्मासे षोडशदिने रात्रौ घटिकात्रयपर्यन्तं मिथुनमासस्य गर्भः ।

**End:**

यदा शुक्रेन्दुसौरिज्ञा भौमनाडीप्रगोचराः ।
जलं सर्वयुतं तत्र जलमेघायते मही ॥

## R. No. 4298.

Palm-leaf. $17\frac{3}{8} \times 1\frac{1}{4}$ inches. Foll. 133. Lines, 7 in a page. *Grantha.* Slightly injured.

Presented in 1922–23 by M.R.Ry. Tandalam Rāmakṛṣṇa Śāstriyār, Saiva Muthia Mudali street, Madras.

Foll. 1—6 are left blank.

हरिश्चन्द्रोपाख्यानम्.

HARIŚCANDRŌPĀKHYĀNAM.

Same work as that described under No. 2596 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

The scribe adds—

कालयुक्तिशरन्मीनसितकामेज्यवासरे ।
ग्रन्थमेतं तु कौण्डिन्यः सुब्रह्मण्योऽलिखत्स्वयम् ॥

---

## R. No. 4299.

Palm-leaf. $18\frac{3}{8} \times 1\frac{3}{4}$ inches. Foll. 63 Lines, 10 in a page. Telugu. Slightly injured.

Presented in 1922–23 by M.R.Ry. Taṇḍalam Rāmakṛṣṇa Śāstriyār, Saiva Muthia Mudali street, Madras.

रामायणम्.

RĀMĀYAṆAM.

Foll. 3*a*—60*b*. Foll. 1*a*—2*b* and 61—63 are left blank.

Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Bālakāṇḍa complete and breaks off in the course of Ayōdhyākāṇḍa.

## R. No. 4360.

Palm-leaf. 15 × 1½ inches. Foll. 94. Lines, 8 in a page. Grantha. Much injured.

Presented in 1922-23 by M.R Ry. Tāṇḍalam Rāmakṛṣṇa Śāstriyār, Saiva Muthia Mudali street, Madras.

### अभिज्ञानशाकुन्तलव्याख्यानम्—कुमारगिरिराजीयम्.

### ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM: KUMĀRAGIRI-RĀJĪYAM.

Same work as that described under R. No 295(b) ante. By Kāṭayavēmabhūpati, son of Kāṭayabhūpati.

Wants the introductory portion; otherwise complete.